आर्द्रां पुष्कारिणीं पुष्टिं पुष्टिसाधनभूताम् । पोषयित्रीमित्यर्थः । सुवर्णां सुवर्णाम् । हेममालिनीं हेमस्रग्भिरलङ्कृताम् । सूर्यां सूर्येण भगवता नित्यसंबद्धाम् । सूर्ये ? तथाच पुराणे मैत्रेये—"केशवः सूर्यः प्रभावैः कमलालया" इति प्रभासूर्ययोरैक्यात् सूर्येत्युच्यते ... ...पुरुषांश्च परिचारकमनुष्यांश्चाहं लभेयम् । हे जातवेदः तां लक्ष्मीं मदर्थमावहेति सम्बन्धः । यस्याः प्रसादात् सर्वसम्पत्समृद्धिर्भवति । तां लक्ष्मीमस्मदर्थं हे जातवेद आवहेति समस्तोऽर्थः ।

Colophon:

—श्रीसूक्तभाष्यं समाप्तम् ॥

Author:

Remarks—The Ms. is old and decayed. The Bhaṣyam is lucid and logical. The meaning of words is given with their derivations.

॥ गायत्रीव्याख्यानम् ॥

No. 53. C. GĀYATRĪVYĀKHYĀNAM.

C. O. L. No. 1937 C.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—2. 9 lines per page and 16 letters per line. No. of Granthas—18.

Owner—Same as No. 53 A.

Subject—An exposition of the famous Gāyatrī-mantra.

Beginning:

वेदा यत्रैव तिष्ठन्ति देवाः कर्मणि चाग्नयः ।
लोकाश्च तं महामन्त्रं व्याख्यास्यामि गुणातिगः ॥
आत्मा ब्रह्मेति विज्ञानमस्मिन्मन्त्रे विवक्षितम् ।
स य इत्यादिवाक्येषु यथा तदिति वर्ण्यते ॥
भर्गो ब्रह्मेति विज्ञेयं विज्ञानानन्दलक्षणम् ।
तद्धीमहीति विज्ञानं ज्ञाने ब्रह्माहमद्वयम् ॥

End:

जगत्कारणभूतस्य ब्रह्मणो यत् परं पदम् ।
तदेवास्मि न सन्देहो ... ... ॥

दुरितानि अज्ञानकृतकार्याणि भेदप्रतीतिनिमित्तभूतानि । अज्ञानं तत्कार्याण्यपोह्य ज्ञानेन ब्रह्मात्मैक्यमनुभवाम इत्यर्थः ।

Remarks—Only two leaves are extant and it seems that a leaf in the middle has been lost.

॥ पुरुषसूक्तव्याख्यानम् ॥

No. 53 D. PURUṢASŪKTAVYĀKHYĀNAM.

C. O. L. No. 1937 D.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—9. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas 162. Incomplete.

Owner—Same as No. 53 A.

Subject—A concise gloss on Puruṣasūkta touching all the relevant facts mentioned in various other commentaries.

Beginning :

यतः प्रपञ्चसम्भूतिविभूतिपरिभूतयः ।
भवन्ति तं हरिं वन्दे जगतामादिकारणम् ॥
दुर्ज्ञानं पौरुषं सूक्तं व्याकरोमि यथामति ।
श्रुतिस्मृतिपुराणानि सेतिहासानि वीक्ष्य च ॥
विलोक्य पूर्वभाष्याणि पूर्वाचार्यकृतानि च ।
श्रीमच्छास्त्रं सुदुर्ज्ञानं साक्षान्नारायणेरितम् ॥
तच्चालोक्य(?) च तथा गुरूणां चोपदेशतः ।

स्वमनीषिकया चात्र न किञ्चिदभिधीयते ॥
सुखग्रहार्थं भाष्याणि केवलं संक्षिपाम्यहम् ।
उक्तज्ञानेष्वशक्तानामनुक्तोक्तौ तु का कथा ॥
नह्यलब्धानुगमनः क्रोडारोहाय रोदिति ।
अर्थानां विप्रकीर्णानां संक्षेपेणावधारणम् ॥
सुखग्रहार्थमिष्टं हि पण्डितानां बहुश्रुतम् ।
तदेतत् पौरुषं सूक्तं यजुःष्वष्टादशर्चकम् ॥
ऋग्वेदे षोडशर्चं स्यात् पञ्च वाजसनेयके ।
सप्तर्चं सामवेदे तु तथैवाथर्वणेष्वपि ॥

End:

उक्तमर्थमुपसंहरति "यज्ञेन यज्ञ" मिति । एवं यज्ञसाधनभूतेन चतुर्मुखाख्येन हविषा देवा यज्ञं यष्टव्यं नारायणमयजन्त । यागात्मकतया कृतानि तानि धर्माणि । धर्माः प्रथमाः । प्रथमान्यासन् । एवं यागं कृत्वा महिमानः महिमवन्तः ते देवाः नाकं परमे व्योम सचन्ते । असचन्त प्राप्तवन्तः । यत्र परमे व्योम्नि पूर्वे साध्याः देवाः सन्ति वर्तन्ते तन्नाकमेतेऽप्यासचन्त । "नाकः स्वर्गेऽम्बरे व्योम्नि वर्तते सूर्यमण्डले" इत्यस्ति वैकुण्ठसंहितायाम् । 'मुकुन्दो वरदो नाक' इति भगवन्नाम चाप्यस्ति । यास्कश्चाप्याह—'कं सुखम् अकमित्यसुखम् । नाकमिति परमसुख'मिति ।

Colophon:

श्रीशास्त्र पुरुषसूक्तसंहितायां पुरुषसूक्तार्थः संक्षेपेण प्रतिपादितः ॥

Author:

Remarks—The work is modelled on that of Śrīraṅganātha, another commentator on Puruṣasūkta. One leaf contains a description of Viṣṇupūjāvidhāna in Malayāḷam language. The language exhibits ച്ചിന്റു, ക്കിന്റു and other features of old Malayāḷam and so the work might have been written some five centuries ago. Seven leaves comprise a part of some drama of mixed Sanskrit and Prakrit. Six leaves discuss some topic on Mīmāmsā and the last four leaves deal with Vāstupūja. The Ms. is much decayed. Some leaves in the middle are missing.

॥ आश्वलायनगृह्यसूत्रभाष्यम् ॥

No. 54. ĀŚVALĀYANAGṚHYASŪTRABHĀṢYAM.

C. O. L. No. 815.

Substance—Paper. Size—11″ × 8⅝″. Pages—193. About 20 lines per page and 27 letters per line. Script—Devanāgarī. No. of Granthas—3200. Complete.

Owner—C. O.

Subject—Same as No. 48.

Beginning:

श्रीगणेशाय नमः । श्रीलक्ष्मीनारायणाभ्यां नमः । हरिः ॐ । उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः । श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

आश्वलायनगृह्यसूत्रभाष्यमारभ्यते उक्तानीति । उक्तानि व्याख्यातानि कथितानि । कानि वैतानि(कानि) । क उक्तानि । अग्न्याधेयप्रभृतीन्याह वैतानिकानीत्येवमारभ्येति सत्राणीत्येवमन्तानि । उक्तस्यानुकीर्तने किं प्रयोजनम् । प्रकृतिरेषाचार्यस्य उत्तरार्धविवक्षया उक्तस्यानुकीर्तनं करोति । तद्यथान्यत्रापि । "उक्ता देवताः प्रदानानामुक्ताः प्रैषा" इति । यद्येवं तत्रोक्तशब्दस्य प्रयोजनवत्त्वादिहापि प्रयोजनेन भवितव्यम् । इह तर्ह्येतत् प्रयोजनम् । उक्तान्येव वैतानिकानि । वक्ष्यमाणानां वैतानिकसंज्ञां निवर्तयति गृह्याणीति । संज्ञान्तरोपदेशान्न भविष्यति । संज्ञासमावेशदर्शनादुभयसंज्ञाप्रवृत्तिः स्यात् । को दोषः । एतस्य समाम्नायस्येति यो यो यं यं(?)नियमः प्रारब्धः स एतेषामपि प्रसज्येत वैतानिकसंज्ञालाभात् । सति नियमे ममाग्ने वर्च इति प्रत्यृचं समिध इति । इह दशर्चमिष्यते । अग्न्याधेयोत्तरकालं च प्रसङ्गः स्यात् । तत्प्रभृतित्वात् कर्मणाम् । तस्माद् वैतानिकसंज्ञाः निवर्तयितव्याः । यद्येवमप्राप्तत्वात् संज्ञाया नैव निवर्तयितव्याः । कथमप्राप्ता शास्त्रभेदात् पूर्वे द्वादशाध्यायाः शौनकस्य कृतिः । अमी चत्वारः आश्वलायनस्य कृतिः ।

End:

नमः शौनकायेति शाखान्तरगतत्वात् । आचार्यस्य शौनकस्य अथवा आचार्येभ्यो नमस्कारं कृतवानिति ।

Colophon:

इति आश्वलायनगृह्यसूत्रभाष्ये देवस्वामिसिद्धान्ति-

कृते चतुर्थाध्याये नवमखण्डः समाप्तः ।

इति आश्वलायनगृह्यसूत्रभाष्यं समाप्तम्

ॐ

शके १८०६ संवत् १९४१ ज्येष्ठमासशुद्ध १५ समाप्तश्च ।

Author—Devasvāmisiddhāntin.

Remarks—Towards the end of the 1st chapter is seen:

"संवत् १९४० शके १८०५ जयनामसंवत्सरे माघशुक्लदशम्यां शुक्रवासरे तद्दिने इदं पुस्तकं भोले इत्युपनाम्ना जनार्दनस्य सूनुना गोविन्देन काश्यां लिखितम्"

Hence this chapter must have been written in the year 1058 M. E. at Benares and the portion posterior to the 4th chapter in the subsequent year.

॥ आश्वलायनगृह्यसूत्रभाष्यम् ॥

No. 55. ĀŚVALĀYANAGṚHYASŪTRABHĀṢYAM.

C. O. L. No. 380.

Substance—Paper. Size—13½″ × 8½″. Pages—272. About 16 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—1806. Incomplete.

Owner—C. O.

Subject—Same as No. 48.

Beginning :

नमस्कृत्य सरस्वत्यै गुरुभ्यश्चैव सर्वशः ।
शौनकं तु विशेषेण प्रणम्य प्रयतः शुचिः ॥
अर्थविस्मरणार्थं तु किञ्चिद्वक्ष्यामि(यत्नतः) ।
(अर्थप्रयत्नमालम्ब्य प्रयतिष्ये) यथास्मृतम् ॥
गृह्याणां यानि सूत्राणि तेषां चादौ यथार्थतः ।
ग्रहणं वक्ष्यते यत्तु तदन्तं सूत्रमुच्यते ॥
(सू.) उक्तानि वैतानिकानि । गृह्याणि वक्ष्यामः ।

तत्रेदं प्रतिज्ञासूत्रम् । उत्तरस्य विधिर्विस्तरेण वक्ष्यते । गृह्याणीति । गृहे यानि कर्माणि तानि गृह्याणि । तत्रायं गृहशब्दः त्रिष्वर्थेषु । यथा तावद् भार्यायां शालायाम् आश्रम इति । तत्र शालायां तावत् क देवदत्त इत्युक्ते गृह इति ।

End :

महद्वै भूतं स्नातको भवतीति विज्ञायते । यन्महद्भूतं स्नातकः तस्मान्नाभ्यापद्येतेत्येतदुच्यते

Colophon :

इति देवस्वामिविरचिते . आश्वलायनगृह्यभाष्ये द्वितीयोऽध्यायः समाप्तः ।

Author—Devasvāmin.

Remarks—The work extends upto the 9th Khaṇḍikā in chapter 3. The author does not seem to be identical with Devasvāmisiddhāntin referred to in No. 54 as the variants in the beginning testify.

॥ आश्वलायनगृह्यसूत्रवृत्तिः (अनाविला) ॥

No 56 A. ĀŚVALĀYANAGṚHYASŪTRAVṚTTI.

(Anāvila.)

C. O. L. No. 733 A.

Substance—Palm leaf. Size—21″ × 2″. Leaves—86. About 11 lines per page and 86 letters per line. Script—Old Malayāḷam. No. of Granthas—2500. Complete.

Owner—Subject—Same as No. 48.

Remarks—This Ms. has been published as No. 78 in the T. S. S.

॥ आश्वलायनगृह्यमन्त्रव्याख्या ॥

No. 56 B. ĀŚVALĀYANAGṚHYAMANTRA-VYĀKHYĀ.

C. O. L. No. 733 B.

Substance—Palm leaf. Size—21″ × 2″. Leaves—86. About 9 lines per page and 76 letters per line. No. of Granthas—3700. Complete.

Owner—Subject—Beginning—End—Same as No. 48.

Colophon :

इति हरदत्तविरचितायामाश्वलायनगृह्यमन्त्रवृत्तौ चतुर्थोऽ
ध्यायः ।

आश्वलायनगृह्योक्तमन्त्राणां वृत्तिरादरात् ।
लिखिता नीलकण्ठेन हरदत्तविनिर्मिता ॥
हन्त चित्त न जानीषे सन्ततं हितमात्मनः ।
चिन्तयान्तःस्थितं देवं किं तया बहुचिन्तया ॥
शिवमस्तु ।
अपि त्रिलोकीनालीकमात्मायतनवन्ति ये ।
तेभ्यः कल्याणहेतुभ्यो भूदेवेभ्यो नमाम्यहम् ॥

Author—Haradatta.

Remarks—Same as No. 48.

॥ बोधायनधर्मशास्त्रम् ॥

No. 56 C. BODHĀYANADHARMAŚĀSTRAM.

C. O. L. No. 733 C.

Substance—Palm leaf. Size—21″ × 2″. Leaves—14. About 8 lines per page and 84 letters per line. Script—Old Malayāḷam. No. of Granthas—588. Incomplete.

Owner—Same as No. 48.

Subject—The science of socio-religious *dharmas* connected with *Varṇas* and *Āśramas*.

Beginning :

तपस्यमपामवगाहनम् । अथ हस्तौ प्रक्षाल्य कमण्डलुं मृत्पिण्डं च गृह्य तीर्थं गत्वा त्रिः पादौ प्रक्षालयते त्रिरात्मानम् । अथ हैके ब्रुवते । श्मशानमापो देवगृहं गोष्ठं यत्र च ब्राह्मणः अप्रक्षाल्य तु पादौ तन्न प्रवेष्टव्यमिति । अथाप्युदाहरन्ति ।

End :

त्रिरन्तर्जले पठन् सर्वस्मात् पापात् प्रमुच्यतेऽपि वा प्रणवमेव त्रिरन्तर्जले पठन् सर्वस्मात् पापात् प्रमुच्यते । तद्धर्मशास्त्रं नापुत्राय नाशिष्याय नासंवत्सरोषिताय दद्यात् । सहस्रदक्षिणाय ऋषभैकाद(शाः?शं) गुरुप्रसादो गुरुप्रसादो वेति ।

Colophon :

इति बोधायनीये धर्मशास्त्रे अष्टत्रिंशोऽध्यायः । समाप्तं चेदं धर्मशास्त्रम् ।

* * *

तोलियाचलनाथस्य पादाब्जे नतिशालिना ।
नारायणेन लिखितं धर्मशास्त्रमिदं स्यात् ॥

Author—Bodhāyana.

Remarks—Leaves much decayed. Bodhāyanadharmasūtra with the commentary of Govindasvāmin, has been published as No. 34 in M. O. L. S. Though both the works are identical they differ in the arrangement of chapters.

॥ आग्नेयधर्मशास्त्रम् ॥

No. 56 D. ĀGNEYADHARMAŚĀSTRAM.

C. O. L. No. 733 D.

Substance—Palm leaf. Size—21″ × 2″. Leaves—15. About 8 lines per page and 80 letters per line. Script—Old Malayāḷam. No. of Granthas—600.

Owner—Same as No. 48.

Subject—Course of procedure inexcusable in ordinary circumstances but allowable in times of extreme distress, etc.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

आसन्नमागमिष्यन्तं कलिं ज्ञात्वा महर्षयः ।
द्वापरान्ते समासीना नैमिशे सत्रिणोऽभवन् ॥
एकीकृत्यर्षयः सर्वे शौनकाद्या विभावसुम् ।
स्वं स्वं सत्रं समासीनाः सहस्रसममुत्तमाः ॥
कथान्तरे कदाचित्तु सायं हुतहुताशनाः ।
हुताशनं प्रज्वलितं पप्रच्छुस्ते द्विजोत्तमाः ॥
भगवंस्त्वन्मुखोत्सृष्टान् धर्मान् वर्णाश्रमादिकान् ।
श्रोतुमिच्छामहे वह्ने सामान्यांश्चापदि श्रुतान् ॥
फलं च कुर्वतां सम्यग्वायथावत्प्रकुर्वताम् ।
अकुर्वताञ्च तल्लोकान् प्रेत्य तज्जन्म वाखिलम् ॥
प्रायश्चित्तविधानञ्च परं नैश्श्रेयसं नृणाम् ।
देशद्रव्यात्मकालानां शुद्धिरूपग्रहानापि ॥

श्राद्धक्रियाश्च विधिवत् श्रोतुमिच्छा प्रवर्तते ।
कर्मतन्त्रांश्च निखिलान्यथावद्वक्तुमर्हसि ॥
इति पृष्टः कविर्विप्रैः शरदङ्कनिभप्रभः ।
रूपं तेजोमयं कृत्वा वक्तुमेवोपचक्रमे ॥

End :

नारायणात्मकं ध्यायन् ससांख्यः स विमुच्यते ।
इत्युक्त्वा भगवान् वह्निः सायं हुतहुताशनः ॥

(तत्रैवान्त) दृष्टे तावत् पश्यतां भावितात्मनाम् ।

Colophon :

इत्याग्नेयधर्मशास्त्रे धर्मप्रद्योतनीयं समाप्तम् ॥

Author :

Remarks—This work is composed in metrical form and the subjects dealt with are noted below :—

सृष्टिप्रकरणम् ।
वर्णाश्रमधर्मवृत्तिप्रकरणम् ।
श्राद्धप्रकरणम् ।
दुष्टमासनिर्णयप्रकरणम् ।
राजधर्मप्रकरणम् ।
प्रायश्चित्तप्रकरणम् ।
आशौचप्रकरणम् ।
धर्मप्रद्योतनीयम् ।

॥ आश्वलायनगृह्यसूत्रवृत्तिः (अनाविला) ॥

No. 57 A. ĀŚVALĀYANAGṚHYASŪTRA-VṚTTI (Anāvilā).

C. O. L. No. 989 A.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—64. About 10 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—2500. Complete.

Owner—Tuppan Tuppan Nampūrippād, Kunnattunād, Travancore.

Subject—Beginning—End—Same as No. 48.

Colophon :

इति हरदत्तमिश्रविरचितायामाश्वलायनगृह्यवृत्तावनाविलायां चतुर्थोऽध्यायः । हरिः ओम् ।

येन प्रणीतमृषिणा सूत्रं वाचार्यसम्मतम् ।
तमाश्वलायनं वन्दे विद्यानद्याः शिलोच्चयम् ॥

हरिः । श्रीगणपतये नमः । आश्वलायनगृह्यसूत्रव्याख्यानम् ।

Author—Haradattamiśra.

Remarks—Same as No. 56 A.

॥ आश्वलायनगृह्यमन्त्रव्याख्या ॥

No. 57 B. ĀŚVALĀYANAGṚHYAMANTRA VYĀKHYĀ.

C. O. L. No. 989 B.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—113. About 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—3700. Complete.

Owner—Same as No. 57 A.

Subject—Beginning—End—Same as No. 48.

Colophon :

इति हरदत्तविरचितायामाश्वलायनगृह्यमन्त्रवृत्तौ चतुर्थोऽध्यायः ।

बिन्दुसह्लिपिविचित्रवीचिका-
भङ्गपङ्क्तिपदहीनदूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं
क्षन्तुमर्हति समीक्ष्य सज्जनः ॥

वामदेवेन लिखितमिदं पुस्तकम् ।

Author—Remarks—Same as No. 48.

॥ आश्वलायनप्रयोगसारः (सभाष्यः) ॥

No. 58. ĀŚVALĀYANAPRAYOGASĀRA with Bhāṣya.

C. O. L. No. 309.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—578. About 18 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—5000. Complete.

Owner—C. O.

Subject—Application of the Gṛhya Sūtras of Āśvalāyana.

Text—Beginning :

वन्दे वन्दारुदेवेन्द्रमुखवृन्दारकान्तिकम् ।
वारणं वदने देवं वारणं नमदापदाम् ॥
वात्स्येन संसर्दीशेन नारायणतनूभुवा ।
प्रयोगसारसंज्ञोऽयं क्रियते सारसंग्रहः ॥
आश्वलायनगृह्यस्य व्याख्या बह्वीः स्मृतीस्तथा ।
आलोक्य शौनकीयं च यद्युक्तं तदिहोच्यते ॥
नाग्राहि कस्यापि मतं योऽर्थः सूत्रस्य सङ्गतः ।
स एव परिगृह्योक्तः परीक्ष्यो हि विचक्षणैः ॥
समत्सरः समस्तोऽपि लोकोऽयं जीवतः कृतौ ।
न तथा गुणगृह्यः स्याद् यद् गृह्णीयाद् गुणाधिकम् ॥

अथ पुण्याहविधिः

गोमयेनोपलिप्य रङ्गवल्ल्यादिभिरलंकृते गृहे गुरुः सूत्रवेष्टितं सिततण्डुलपूर्णेन पात्रेण पल्लवैश्च पिहिताननम् अभ्यर्चितम् अपां पूर्णं कुम्भं बिभ्रदुदङ्मुखस्तिष्ठेत् ।

Commentary—Beginning :

तन्महःस्मरणान्नृणां कार्यावारणकारणम्(?) ।
प्रणौमि वारणं वक्त्रे यदकारणकारणम् ॥
अनार्षाणां गिरां लोके प्रामाण्यायोगतः स्वतः ।
प्रामाण्यं परतो वक्तुं व्याख्येयं नार्थगौरवात् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तये विशिष्टदेवतां नमस्करोति वन्दे इत्यादिना ।

End :

एवमेव प्रोष्ठपद्या अनन्तरामित्यादि । इदमत्र गृह्यम् "एतेन माघावर्षं प्रोष्ठपद्या अपरपक्षे" इति । अस्यार्थः—एतेनेति । पूर्वेद्युःप्रभृति कृत्स्नकर्मातिदिश्यते । प्रोष्ठपद्या अनन्तरं योऽपरपक्षः तत्राष्टम्यां माघावर्षश्राद्धं नाम कर्तव्यम् । तच्चैतेनाष्टकाकर्मणा व्याख्यातमिति । अत्रापि सप्तम्याद्यासु तिसृषु तिथिषु कार्यम् । अत्र भगवान्—

"एतेनैव प्रकारेण माघावर्षाभिधानकम् ।
श्राद्धं प्रोष्ठपदे मासि कृष्णपक्षे समाचरेत् ॥"

इति । नवावरान् भोजयेत् । अयुजो वेत्यादिकं सर्वमत्राप्युपतिष्ठत एव ।

Colophon :

इति प्रयोगसारव्याख्याने पाणिहोमविधिः समाप्तः ।
इति माघावर्षाभिधश्राद्धं समाप्तम् ॥

Author—Samsadīśa (Sabhāpati), son of Nārāyaṇa.

Remarks—The name of the author may be Sabhā-

pati. The commentator elucidates the details of the application of each Sūtra. But nothing is found indicating the identity of the author. The Ms. comprises 56 prakaraṇas from Puṇyāhavidhi to Māghāvarṣaśrāddha.

॥ आश्वलायनश्रौतसूत्रभाष्यम् ॥

No. 59. ĀŚVALĀYANAŚRAUTASŪTRABHĀṢYAM

C. O. L. No. 305.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8''$. Pages—759. About 17 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—9950.

Owner—C. O.

Subject—An elaborate exposition of the Śrauta Sūtras of Āśvalāyana prescribing rules for पौर्णमासेष्टि & पशुसोमाग्रायण

Beginning:

सू— पौर्णमासेनेष्टिपशुसोमा व्याख्याताः ।

भा— पौर्णमासं व्याख्यातम् । तेन पौर्णमासेन इष्टयः पशवः सोमाश्च व्याख्याताः । इज्यन्ते आभिः देवता इति इष्टयः । पशुगुणकं कर्म पशुरित्युच्यते । तच्च तृतीयेऽध्याये वक्ष्यते । एते इष्टिपशुसोमाः पौर्णमासेन व्याख्याता इत्यर्थः ।

तत्र पौर्णमास इत्ययं शब्दः काले च दृश्यते कर्मणि च । काले तावत्:—

सू— तैरमावास्यायां पौर्णमास्यां वा यजेत ।

End :

ननु व्रते नियम्यमाने दक्षिणाग्रहणमपार्थकं भवति । उच्यते—यद्यपि प्राकृतो विहितदक्षिणः, तथापि भयस्य(?) श्रुतिश्चोदयतीत्यर्थः । एवं दक्षिणावचनं द्रष्टव्यम् । ते पुनः दक्षिणावचनस्य प्रयोजनमाचक्षते सत्राङ्गत्वादयमपि पृष्ठशमनादयः(?) अदक्षिण एव स्यादिति इष्यते । कथमेवादक्षिणत्वं स्यादिति तस्मात् श्रुतिवाक्येन दक्षिणावचनं कृतम् । दक्षिणाप्रापणार्थं वचनम् । एवं केचित् । नमो ब्रह्मणे नम आचार्येभ्यः । ब्रह्मणे आचार्येभ्यश्च नमस्कारं करोति इष्यते च । यज्ञशास्त्रं समापितमिति कृत्वा त्रयाणामपि वाक्यानां द्विरभ्यासं करोति शास्त्रसमाप्तिप्रज्ञापनाय । नम आचार्येभ्यः ॥

Colophon :

इति श्रीमदाश्वलायनसूत्रव्याख्यायां देवस्वामिकृतायां द्वादशोऽध्यायः समाप्तः ॥

Author—Devasvāmin.

Remarks—This Bhāṣya is more lucid and elucidative than that of Devatrāta though the subject-matter in both is the same. References about this Devasvāmin, are made by Viṣṇugūḍabhaṭṭopādhyāyagūḍa in his Āśvalāyanaprayogabandha, by Traividyavṛddha of Tālavṛndavana and by Nārāyaṇa.

॥ आश्वलायनश्रौतसूत्रभाष्यम् ॥

No. 60. ĀŚVALĀYANAŚRAUTASŪTRABHĀṢYAM.

C. O. L. No. 519.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8''$. Pages—358.

About 20 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—4925.

Owner—C. O.

Subject—An elaborate exposition, with concrete illustrations, of Āśvalāyanaśrautasūtra relating to Bahvṛcas by Viṣṇumitra making the visible gods such as Mātṛdevas and Pitṛdevas and invisible gods such as Indra etc., important and inevitable.

Beginning:

एषोऽसावत्रासावमुत्र त्रेतेति(?)। अथैष सर्वाणि कर्माणि अर्थान् यथाधीत्यैष तदर्थमुद्गृह्योद्गृह्य अथाध्यापयति यजते याज(य) ति च। अथानन्तरं ब्राह्मणैर्यज्ञो विधीयते। यज्ञेन वैहिकं फलमन्नाद्यादि आमुष्मिकं च फलं स्वर्गादि ब्राह्मणस्यान्नाद्यमेवेति संपादयन्ते। यस्य पाश्चयोक्त्रायामुष्मै चोभाभ्यामिति ब्राह्मणमेतदेव कर्म कृत्स्नं प्राप्य वेदान्ते उपनिषदि एष पन्था एतत् कर्मेति तस्मान्न प्रपद्येदिति (माद्येत्)च। तस्मात् श्रुतिस्मृतिवचनप्रामाण्येन मन्त्रब्राह्मणमधीत्य यज्ञकर्म वेदितव्यम्। तच्च मन्त्रब्राह्मणे ऋग्वेदेन होत्रीयं यजुर्वेदेनाध्वर्यवं सामवेदेनौद्गात्रं सर्वैर्ब्रह्मत्वमिति। तत्र पुरुषशक्तिपरिहा(र?)णमुपलक्ष्य शौनकादिभिराचार्यैः कल्पाः प्रणीताः। अर्थग्रहणायात्र शौनकेन भगवता होत्रकर्म द्वाद(शि?शभि)रध्यायैः परिकल्पितम्। तदधीत्याश्वलायनेनाचार्येण ब्राह्मणाः श्राविताः। तत् सर्वं बह्वृचैः परिगृहीतम् 'अल्पाक्षरमसन्दिग्धं'चेति। तस्य व्याख्या क्रियते यथोपदिष्टम्। युष्माकमाचार्यैरभिधानार्थं श्रुतिन्यायमन्त्रलिङ्गसहकारिभिर्युक्तमुपशोभितं भवति। सूत्रं पञ्चविधं भवति अधिकारसूत्रं परिभाषा उत्सर्गापवादौ उदाहरणमिति।

उपोद्घातः पदं चैव पदार्थः पदविग्रहः ।

आक्षेपः प्रत्यवस्था च व्याख्या सूत्रस्य षड्विधा ॥

"अथैतस्य समाम्नायस्य वितानं योगपत्तिं(?) वक्ष्यामः"

End :

एतत् सांवत्सरं व्रतम् ॥

एतद् युक्तं व्रतम् । एतत् सांवत्सरं भवति । संवत्सरे संवत्सरे तत् सांवत्सरं सांवत्सरमेव व्रतं भवति । व्रतकालस्यानियमे प्राप्ते कालनियमः क्रियते । संवत्सरान्तमेव यावज्जीवकं वा । यावज्जीवति तावत् काले भवति । यावज्जी(वि?व)कं च भवतीति विकल्पः । अग्ना (व) नुगते उपशान्ते अन्तरा जुहूयात् । हुतिश्चाहुतिश्चाहुती । अन्तरा मध्ये द्वयोराहुत्योर्मध्ये चेदग्निरनुगच्छेत् । उत्तरस्या आहुत्याः स्थाने हिरण्यं निधाय उत्तरामाहुतिं जुहुयात् । होमसमाप्तौ हिरण्यमेव भवति । न पुनः अग्निः "अग्नेः प्रयातं परियद्धिरण्यम्" इति द्वाभ्यां स यथा ब्राह्मणे परिसमाप्ते हविर्यज्ञाः प्रायश्चित्तिकाः ।

Colophon :

इत्याश्वलायनसूत्रव्याख्यायां वराहकाचार्यदेवत्रातस्य कृतौ प्रथमोऽध्यायः समाप्तः। इति वराहदेवत्रातस्य कृतौ सूत्रव्याख्यायां तृतीयोऽध्यायः समाप्तः ।

Author—Devatrāta.

Remarks—The following lines seen in the work :

शाके १६६० कालयुक्तिनामसंवत्सरे पौषमासे कृष्णपक्षे नवम्यामिन्दुवासरे कर्नाटकदेशे नर्गदग्रामे नामज्योतिरुपनामकगोविन्दभट्टात्मजरामेश्वरेणायं श्रौतसूत्रभाष्यग्रन्थो लिखितः ।

show probably the date of transcription, Śaka 1660 (1748 A. D.)

Though this transcript comprises only three Adhyāyas it is clear from Devasvāmibhāṣya that there are on the whole 12 Adhyāyas. The author Devatrāta is referred to in the Nirṇayasindhu of Kamalākara as well as in the Samskārakaustubha of Ānandadeva. His name suggests that he was a native of Malabar. He is referred to on the 6th page by the words, "पित्रा च भवत्रात ऋग्वेदस्येव". Bhavatrāta might have been Devatrāta's father and probably a commentator on the Ṛgveda.

The author of Nirṇayasindhu flourished during the middle part of the 17th century A. D.

॥ कात्यायनगृह्यवृत्तिः ॥

No. 61. KĀTYĀYANAGṚHYAVṚTTI.

C. O. L. No. 427.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{4}''$. Pages—136. About 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas —1350. Incomplete.

'षट्गुरुभाष्ये देवत्रातभाष्ये तन्त्ररत्ने च षट्स्वपि ऋतुषु भवतीत्युक्तमिति दिक् p. 39. निर्णयसिन्धुः ।

Owner—C. O.

Subject—A discussion on domestic rituals in accordance with Aṣṭakādiśrāddha.

Beginning:

याज्ञवल्क्याय नमः । परमयोगिने नमः । कात्यायनाय महर्षये नमः । श्रीसूर्यनारायणाय परमगुरवे नमः । अविघ्नमस्तु ।

श्रौतान्याधानादीन्युक्तानि कर्माणि । तदनन्तरं स्मार्तान्यनुविधीयन्ते । तत्रैतदादिसूत्रम् । अथातो गृह्यस्थालीपाकानां कर्म । व्याख्यायत इति सूत्रशेषः । तत्रायमथशब्द आनन्तर्ये । श्रौतानुविधानसमनन्तरं स्मार्तान्यनुविधीयन्त इति । आनन्तर्यप्राप्तिः प्रयोजनम् । श्रौतेष्वधिकाराद्युपस्पृशेद् इत्येवमन्तं सर्वकर्मसाधारणं यत्तस्यात्रापि प्रवृत्तिर्यथा स्यादिति । पूर्वप्रवृत्तित्वं च श्रौतानामुपनिबद्धमित्येतत् सूत्रकारप्रवृत्त्या ज्ञायेत । प्रोष्येत्य गृहानुपतिष्ठते पूर्ववदिति श्रौतेषु गृह्योपस्थानं विहितम् ।

End:

मृते भर्तरि जीवन्तीत्यन्वारूढा चितागतिः ।
नाग्निकार्यविशेषोऽस्ति पृथक् पिण्डोदकक्रिया ॥
सपिण्डीकरणे दाहे सति तद्ग्रामवासिभिः ।
श्वस्ततो नोपगन्तव्यं गन्ता चेन्मरणं ध्रुवम् ॥
प्रशुष्ककाष्ठज्वालाभिः केशाग्रे दहनं भवेत् ।
आज्यशेषोपलिप्ताभ्यां पाणिभ्यामथ दाहकः ॥
मृतपादौ समालिप्य प्रत्यक् दयात्यानपेक्षकः(?) ।
निपत्य भूमावुत्थाय बन्धुभिश्च समन्वितः ॥

जलाशयगतो दद्यात् प्रेतायाम्बु यथाविधि ॥

इति । प्रकृतमनुलिखामः । शुभमस्तु ।

Colophon—Nil.

Author: Text—Kātyāyana.

Remarks—The commentary begins from Sthālīpākaprakaraṇa and ends with Āśaucaprakaraṇa.

॥ खादिरगृह्यसूत्रवृत्तिः ॥

No. 62. KHĀDIRAGṚHYASŪTRAVṚTTI.

C. O. L. No. 42.

Substance—Paper. Size—14″ × 8½″. Pages—145. 18 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—1650. Complete.

Owner—C. O.

Subject—An exposition of aphorisms on domestic rituals by Khādira relating to Sāmaveda.

Beginning:

(मूलम्)—अथातो गृह्या(णि) कर्माणि ।

(व्याख्यानम्)—अथ अनन्तरम् । कस्मादनन्तरम् । "देवसवितः" इत्यादिमन्त्रवच्छाखाध्ययनानन्तरम् । यतोऽनधीतवेदस्य मन्त्रापरिज्ञानात् वक्ष्यमाणेषु वाक्येषु कर्मानुष्ठानयोग्यतया प्रतिपत्तुमशक्यम् । अतस्तदनन्तरमिति गृह्यते ।

(मूलम्)—अथ वस्त्रादीनां दानम्। यशोऽसीत्याचमनीयम्।

(व्याख्यानम्)—आचमनीयमित्युक्ते यशोऽसीति प्रतिगृह्य तूष्णीं पीत्वाचामेत्।

End:

(मूलम्)—पुनर्यज्ञविवाहयोश्च। पुनर्यज्ञविवाहयोश्च।

(व्याख्यानम्)—पुनर्यज्ञविवाहयोः प्रागपि संवत्सरादागतानर्हयेत्। मधुपर्केण पूजयेदित्यर्थः। द्विरुक्तिः शास्त्रपरिसमाप्तिद्योतिका॥

Colophon:

इति चतुर्थपटलस्य चतुर्थः खण्डः। खादिराचार्यमुनिकृतस्य गृह्यस्य रुद्रस्कन्दाचार्यकृतं व्याख्यानं समाप्तम्।

नारायणस्य पुत्रेण मखवाटनिवासिना।
रुद्रस्कन्देन संक्षेपात् गृह्यवृत्तिः कृता मया॥

Author: Text—Khādirācārya. Commentary—Rudraskandācārya, son of Nārāyaṇa of Makhavāṭa.

Remarks—This work contains four *paṭalas*. It is printed in M. O. L. S. as No. 41.

॥ गौतमापरसूत्रम् (भाष्यसहितम्) ॥

No. 63. GAUTAMĀPARASŪTRAM with Bhāṣya.

C. O. L. No. 250.

Substance—Paper. Size—13″ × 8¼″. Pages—101.

About 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—1100. Complete.

Owner—C. O.

Subject—Certain funeral rites observed by Sāmavedins.

Beginning:

(सू)— प्रयाणकाले प्राक् स्मृतिविप्रयोगात् पितरं मातरं गुरुमन्यं वा ब्राह्मणं सुहृदं तत्स्वर्गार्थनिमित्तेनेमानि छन्दांसि संस्कर्ता श्रावयेत् ।

(भा)— प्रयाणकाले प्रयाणं मरणं तस्मिन् काले प्राक् स्मृतिविप्रयोगात् स्मृतिः ज्ञानं विप्रयोगो नाशः एतदुक्तं भवति— मरणकाले स्मृतिः ... पात् प्रागेव वक्ष्यमाणानि सामानि श्रावयेत् । प्राक् स्मृतिविप्रयोगादिति वदता स्मृतिविप्रयोगात् परं न श्रावणं भवतीत्युक्तं भवति । स्मृतिविप्रयोगात् परं न भवतीत्युक्ते मरणोत्तरकालं न भवतीत्यर्थः । दण्डापूपन्यायेन सिद्धम् । कथमविशेषेण सर्वान् श्रावयेत् नेत्याह — पितरं मातरं गुरुमन्यं वा सुहृदं ब्राह्मणमिति । पित्रादिशब्दाः प्रसिद्धाः । गुरुशब्दोऽत्र पितृव्यादिवचनः न निषेकादिकर्ता । स तु पितृशब्देनैवोपात्त इति । अत्रापि तस्योपादाने पौनरुक्त्यं प्रसज्यते । अन्यं वा सुहृदं ब्राह्मणमिति । तस्य यः सखा तस्य श्रावणं विकल्प्यते । अन्यं वा इति वाशब्दाभिधानात् । ब्राह्मणग्रह(णं) सुहृद्भूतस्यापि क्षत्रियादेर्नास्तीति दर्शयितुम् । न चात्र ब्राह्मणशब्दः पित्रादिशब्दानां विशेषणमिति वाच्यम् । ब्राह्मणशब्देने(ति?ह) सन्निहितसुहृच्छब्द एव परामृश्यते नतु दूरस्थपित्रादिशब्दः ।

End:

(सू)—हुतशेषं पाणिषु दद्यात् । पाणिमुखाः पितर इति श्रुतेः । अनग्निश्चेदाज्यभागं गृहीत्वा भक्तस्वेवाग्नौ करणमिति पूर्ववत् । तथास्त्विति ।

(भा)—

वैश्वदेवे यदेकास्मिन् भवेयुः...द्विजाः ।
तदैकपाणौ होतव्यं स्याद्विधिर्विहितस्तथा ॥

इति । ततश्च वैश्वदेविकब्राह्मणपा... ... ...पित्र्यब्राह्मणपाणौ होमः कार्यः । ये गृह्याग्न्यभावे लौकिकाग्निमिच्छन्ति ते सूत्रविरुद्धत्वान्निरसनीयाः ।

पूर्वदेवान् प्रवर्तेत पश्चाद् दैवं विसर्जयेत् ।
पश्चाद् भावित्वं पितॄणां पूर्वभावित्वं सिद्धम् ॥

Colophon:

Author: Text—Gautama.

Remarks—This Bhāṣya is written in elegant style. It is a descriptive treatise on the religious observances followed by the relatives of the dead.

॥ छन्दोगसूत्रदीपः ॥

No. 64. CHANDOGASŪTRADĪPA.

C. O. L. No. 397.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—104. 10 lines per page and 68 letters per line.

Script—Grantha. No. of Granthas — 4400. Incomplete.

Owner—C. O.

Subject—An exposition of the Drāhyāyaṇasūtra pertaining to Sāma Veda.

Beginning:

षोडशीसाम्ना स्तोष्यमाणो यथासनमुपविश्य हविर्धानं गत्वा षोडशीग्रहमवष्टभ्य उद्गाता यस्मादन्य इति। ननु च अग्निष्टोमानन्तरं उक्थ्ये वक्तव्ये कथं षोडशिनः प्रस्तावः? उच्यते उक्थ्ये। विशेषतो वक्तव्यस्याभावात् षोडशिनि सद्भावाच्च प्रस्तावः।

End:

आतृतीयश्च प्रतिवाश्यमान आशापशूनाम्। इति। यदि त्रिष्वपि संवत्सरेषु न कश्चिदपि शब्दं कुर्यात् तत्रापि पशूनां सिद्धिरस्त्येवेति विद्यात्। देव(अन्य) तमप्रतिषेधाभावादिति। अथ श्वगर्दभशब्दे जाते शान्तिं विधत्ते, शान्तिर्वामदेव्यं शान्तिर्वामदेव्यम् इति। तदानीं वामदेव्यं गेयमित्यर्थः। इति।

Colophon:

कल्पोक्तं ब्राह्मणोक्तं च यथावदवधारयन्।
अष्टमं पटलं व्याख्यद् धन्वी मेधाविनां प्रियः॥
इति छन्दोगसूत्रस्य तृतीये दशके सुधीः।
प्रथमं पटलं व्याख्यद् धन्वी श्रुत्यनुसारतः।

इति छन्दोगसूत्रस्य दीपे धन्विविनिर्मिते ।
तृतीये दशके षष्ठः पटलो व्याकृतोऽधुना ॥

Author—Dhanvī, of Kāśyapa Gotra.

Remarks—The beginning and end of this work are missing. The leaves have become very much decayed. The work extends from the beginning of the 2nd *Paṭala* of the 2nd Daśaka to the end of the commentary on the Sūtra षष्ठेऽहनि शकरीणां in the 6th Paṭala, 3rd Daśaka. The whole work is divided into three Daśakas and each Daśaka in its turn is divided into ten Paṭalas. It comes under Drāhyāyaṇaśrautasūtrabhāṣya in D. C. S. M. Madras. (Vide No. 1038, Vol. II).

॥ जैमिनीयगृह्यमन्त्रवृत्तिः ॥

No. 65. JAIMINĪYAGṚHYAMANTRAVṚTTI.

C. O. L. No. 826.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—84. 7—10 lines per page and 26—36 letters per line. Script—Malayāḷam. No. of Granthas—1350.

Owner—Dāmodaran Nampūri, Valia Kallampalli, Kidaṅgūr.

Subject—An exposition of the *mantras* of Jaimini on domestic rituals.

Beginning:

सकलभुवनैकनाथं श्रीकृष्णं नौमि हरिमुमां च शिवम् ।
गुरुमपि सुब्रह्मण्यं गजाननं भारतीं भवत्रातम् ॥

प्रणिपत्य विष्णुमीड्यं विदुषोऽपि कृपाम्बुधीन् समस्तगुरून् ।
गृह्य(गात्र?गतमन्त्र)वृत्तिः करिष्यते जैमिनेस्तमपि न(मसि?)त्वा ॥
अत्युक्तानि दुरुक्तानि यान्यनुक्तानि च स्फुटम् ।
समादधतु विद्वांसस्तानि सर्वाणि बुद्धिभिः ॥

तत्र प्रथमं मन्त्रविनियोगो वक्तव्यः, तत आर्षकथनं, ततश्छन्दोनिर्देशः, ततो देवताभिधानम् । विनियोगादिचतुष्टयाज्ञाने दोषः स्मर्यते श्रूयते च। तत्र स्मृतिः—

मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविन्न यः ।
याजनाध्यापना .... पात्यते वा प्रमीयते ॥
पापीयान् भवतीत्यर्थः ।

एवं ब्राह्मणमाह तामिति । अथ श्रुतिरपि भगवता जैमिनिनास्मत्सूत्रारणार्षेयेऽवश्यकर्तव्यता प्रदर्शिता । यो हवा अविदितार्षेयच्छन्दोदैवतब्राह्मणोक्तेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं (व) र्च्छेति (क? ग)र्तं वापद्यते प्रवमीयते ।

End:

"वेदमेव जपेन्नित्यमुपधर्मोऽन्य उच्यते"
स्वाध्यायवन्तं मां मा प्रतिज्ञाप्सीः ।

तद्विरोधं मा कार्षीः । स्वरवर्णाद्यूनातिरिक्तो माभूत् । त्वत्प्रसादादित्यर्थः । जुह्वन्तं मां मा प्रतिहौर्षीः । तद्विनाशं मा कार्षीः । कुर्वन्तं मां मा प्रतिकार्षीः । किं बहुना यद्यत् कर्म करोमि, तत्तत् कर्म

कुर्वन्तं मां मा प्रतिकार्षीः। सकलच्छिद्राण्यापूरय च। त्वत्प्रसादादेव सकलकर्मसाफल्यं मे भूयादित्यर्थः। तस्मादेवंभूतं सर्वदानुग्रहपरं त्वां प्रपद्ये। त्वामेव शरणं सदाहं गच्छामीत्यर्थः। त्वया प्रसूत इदं कर्म करिष्यामि। त्वत्पदैकशरणोऽहं त्वयानुज्ञातः सन् इदमारब्धं कर्म दर्शपूर्णमासादिकम्। तत्तस्माद् हे विरूपाक्ष!

Colophon:

Author:

Remarks—From the expression "भवत्रातम्" occurring at the beginning it is possible to presume that he is no other than Bhavatrāta mentioned in Āśvalāyanagṛhyasūtrabhāṣya of Devatrāta. The method of elucidation is simple elegant and effective. 9 leaves at the end embody a different treatise—Pañcīkaraṇavārtika by Sureśvarācārya, mentioned on page 318 in C. C., Vol. I.

॥ द्वैधसूत्रम् ॥

No. 66. DVAIDHASŪTRAM.

C. O. L. No. 540.

Substance—Paper. Size—11″ × 8½″. Pages—138. 19 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1640 Complete.

Owner—C. O.

Subject—The views of different sages regarding the performance of domestic rituals, especially *Vājapeya*.

Beginning:

क(थमु?थं)खल्वुपवसथ इति विजानीयात् सन्धास्विदेवोपपाद्याथो ... ...लुसिद्धेरुपपादनम् । ननु खलु सन्ध्यास्वुपपादय इव सर्वेषां त्वेव सन्धासुह (?) स्माह बोधायनो यत्रैतदुपवसितोऽस्तमित आदित्ये पुरस्तात् चन्द्रमा लो(हीति?हिती) भवान्निवोदीयात्तमप्युपवसथं जानीयाद् । अत्रोह स्माह शालीकिरति(पादम?-दं)खल्वेष भवति ससन्ध्यं वै वोपपादयिष्येत । पूर्णो वोभियते तस्य चेद् उपवसतोऽस्तमित आदित्ये पुरस्तात् चन्द्रमा लो(ह?हि)तीभवन्निवोदयादारमताग्निहोत्रेणेत्युक्त्वा पार्वणेन प्रकामत् संस्थिते पार्वणेऽग्निहोत्रं जुहुयादिति ।

End:

"पात्रं सादयतीति सूत्रम्" । बोधायनस्य यं यं गृहं गृह्णीयात् तं तं मृज्य सादयेदिति शालीकिः । श्वेतमश्वं ददाति श्वेतां बन्धत्रान् ददाति । अश्वमसितज्ञं ददा गर्भिणी बद्धवां ललामं ददाति अनमनच्छत्रं ददाति त्रयस्त्रिंशतं निष्कं ददाति सोमचमसं ददाति हिरण्मयं चमसं ददाति राशीकृतं धान्यं ददाति । मरां च कृतं धान्यं ददात्येतानि च नित्यानि च दद्यादिति बोधायनः । एतान्येवेति शालीकिरे(त्य?ता)न्येवेति शालीकिः ॥

Colophon:

द्वैधे चतुर्थः प्रश्नः । समाप्तो द्वैधः । श्रीकाण्डाय बोधायनाचार्याय नमः । श्री शुभमस्तु ।

Author:

Remarks—This is a treatise on Kalpa based on the views laid down by Bodhāyana and Śālīki explaining the parts to be played by the householder and the officiating priest.

॥ प्रतिहारसूत्रभाष्यम् ॥

No. 67. PRATIHĀRASŪTRABHĀṢYAM.

C. O. L. No. 286.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—186. 15 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1767. Incomplete.

Owner—C. O.

Subject—An exposition of Daśatayī on the Pratihārasūtras of Kātyāyana.

Beginning:

नमोऽस्तु तस्मै देवाय यः प्रसूतेऽ(र)ब्ध्यजन्मनाम् ।
कात्स्न्र्ये च वेदे श्रृणुमो यं साक्षाद्देवकीसुतम् ॥
यो वामनार्यमिश्रादनन्तनारायणार्ययज्वसुतात् ।
अजनि कुशिकान्ववाये साङ्गेऽधीती च सामवेदे यः ॥
रचयति स वरदराजः प्रतिहारार्षेयकल्पयोर्वृत्तिम् ।
वक्ष्य ब्राह्मणसूत्रोपग्रन्थनिदानतद्व्याख्याम् ॥
इदन्ताप्रत्ययः साम्नामृषिच्छन्दोऽधिदैवतम् ।
भक्तयः पञ्चयज्ञेषु विनियोगश्च संक्रमः ॥

इतीमे दर्शयिष्यन्ते दशार्थास्त्विह यत्नतः ।
नाम्ना दशतयीत्येव वृत्तिष्वेषा प्रथिष्यते ॥

अथ भगवान् कात्यायनो वक्ष्यमाणं वस्तु निर्दिशति अथेति । इति खलु उपग्रन्थकल्पब्राह्मणोक्तानां ज्योतिष्टोमादिविश्वसृजामयनपर्यन्ताना (मेका) हाहनिसत्राणां क्षुद्रकल्पोक्तानां ज्योतिष्टोमषडहद्वादशाहविचाराणां यथायोगसम्पत्सिद्धयः प्रायश्चित्तानि विषयाश्च न्यायानुष्ठानकल्पादयश्च साम्नां प्रयोगप्रकार उक्तः ।

End:

इह तु त्र्यक्षर एव प्रतिहारः त्रिच्छन्दस(?)स्वक्षरवृद्धिर्लोपश्च तत्र गीतेन प्रतिहारं विद्यादित्युक्तत्वात् प्रातिहारिकमेव गीतं प्रतिहारो वै छन्दसेष्वव्यदादाविति सूत्र..........अत्र सूत्र-प्रकारेणोक्तः ।

Colophon:

Author—Varadarāja, son of Vāmana and grandson of Anantanārāyaṇayajvan.

Remarks—The leaves have become very much decayed and worn out. In several places the words and letters are not discernible. The whole work is divided into sections known as Khaṇḍa or Paṭala or Viccheda and they are twelve in number. Pañcavidhisūtras describe the changes suffered by the *Ṛks* into *sāmans*. The Pratihārasūtras are of the same kind.

Varadarāja has also written commentaries on the Ārṣeyakalpa *alias* Maṣaka. His other works are :—

ऋग्वेदभाष्यम् ।

तैत्तिरीयारण्यकभाष्यम् ।

निदानसूत्रवृत्तिः ।

वरदराजदीक्षितीयम् ।

॥ प्रदीपिका (छन्दोगप्रयोगवृत्तिः) ॥

No. 68. PRADĪPIKĀ CHANDOGAPRAYOGAVṚTTI.

C. O. L. No. 264.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8''$. Pages—102. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—1173.

Owner—C. O.

Subject—The Yāgaprayogas of the Sāmavedins.

Beginning:

.... मप्रवाकेनान्वक्तेऽपि पितृभूतमनुष्यभूतपक्षयोः महन्मेऽवोचमिति मन्त्रं न जह्यादुच्चारणमात्रं करोति करिष्यामीति विदि .... रारब्धलक्षणमन्नं दध्नाहारयेत् । लवणो न संस्कृतं कुल्माषादिशकुटादिव्यञ्जनयुक्तमन्नं दध्नाहारयेत् । अकरिष्यतः पुरुषस्य सोम .... न....योन्निवृत्तिः प्रहीण-

सुब्रह्मण्यौ पुरस्तात् कर्मभ्यः सोमक्रयकाले औपवस्ये वा उद्गातृ-
देवयजनं तस्मात् कर्मार्थं प्रोक्षति....

End :

तत्रैवं प्रयोगः सन्धिचमसं भक्षयित्वा निष्क्रम्य समस्तोपस्थानं
कृत्वा पर्यायेभ्यस्तु रायेरिति ऋतस्य द्वारौ स्थः इत्यादि यजमानो-
पवहान्तम् । अथ जराश्वोधीयस्तवनं भक्षणं पूर्ववन्निष्क्रमणाद्युपवहान्तं
मार्गीयवत् स्तवनं भक्षणं पूर्ववन्निष्क्रमणाद्युपवहान्तं पृथक् स्तोत्रेभ्यः
संस्तेनोपतिष्ठेरन् इति वचनात् । अथ स्तोमविमोचनादिहार्यो जने-
शस्तोकृथ्यस्यतिरोन्यस्येति विशेषः । शेषमतिरात्रवत् । उदवसनी-
यान्तं पूर्ववत् । सर्वपृष्ठसर्वस्तोमाप्तोर्यमम् ।——

Colophon:

छन्दोगस्य प्रयोगस्य वृत्तिरेषा प्रदीपिका ।
कृता त्रैविद्यवृद्धेन तालवृन्दनिवासिना ॥
इति छन्दोगस्य प्रयोगवृत्तौ तालवृन्दनिवासिना
कृतायां प्रदीपिकायां सप्तसंस्था समाप्ता ॥

Author—Traividyavṛddha belonging to the place known as Tālavṛnda.

Remarks—The work dwells at length on the various observances followed by the Sāmavedic school in Yāgas just as in the treatise कपर्दिकारिका. There is a similar work in Malayāḷam known as Cadaṅgubhāṣa which is eagerly studied by heart by Nampūtiri Brāhmins participating in the Yāgas. The treatise is complete.

॥ प्रयोगतराणिः (बोधायनसौमिकप्रयोगतराणिः) ॥

No. 69. PRAYOGATARAṆI.

(Bhodhāyana Saumikaprayogataraṇi).

C. O. L. No. 336.

Substance—Palm leaf. Size—14″ × 2″. Leaves—114. 9 lines per page and 45 letters per line. Script—Malayāḷam. No. of Granthas—5100. Complete.

Owner—Parameśvaran Nampūri, Edappallimanakkal.

Subject—An exposition of Sūtras of Bhodhāyana relating to Soma sacrifice.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमन्तं जगतां नाथं प्रणम्य मधुसूदनम् ।
प्रयोगं सौमिकं वक्ष्ये बोधायनमताश्रयात् ॥

इति इष्टदेवतां नमस्कृत्य वक्ष्यते । सश्रद्धको यजमानः । तत्साधनानि सम्पादयेत् । साङ्गं कृष्णायनमनुपयुक्तं गुरूपयुक्तं वा कृष्णाजिना त्रिवलिर्वा पञ्चवलिर्वा ।

End:

मनस्वतीहोमविधौ ....
तदुत्तरकर्मार्थं । तस्माद् भूयोऽपि निर्वपेत् । अतः परं सायं प्रातरग्निहोत्रे प्रतिजुहोति ।

Colophon:

अस्मिन् प्रयोगतरणौ बहुपक्षदोषा
.... दाहता गुरुतरस्वभयादमु.... ।

एकं मतं समवलम्ब्य च यात्रासिद्धे-

द्धैं.... दिभिः ..,. .... पक्षभेदात् ॥

नारायणेन .... त्रिखण्डकृताङ्कन....न

नारायणाङ्घ्रिसरसीरुह....त्परेण ।

....षा प्रयोगतरणी रचिता मया

... ...

इति प्रयोगतरणिर्नाम प्रयोगवृत्तिः समाप्ता ।

* * * * * * *

Author—Nārāyaṇa.

Remarks—Several leaves at the beginning, middle and end are missing. This author may be responsible for the production of the Vṛtti of Āśvalāyana.

॥ प्रयोगमाला ॥

No. 70. PRAYOGAMĀLĀ.

C. O. L. No. 896.

Substance—Paper. Size—$11\frac{1}{2}'' \times 9''$. Pages—137. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—2200. Complete.

Owner—C. O.

Subject—The ceremonials like Pitṛśrāddha, Garbhādhāna, Pumsavana etc.

Beginning:

गुं गुरुभ्यो नमः । सं सरस्वत्यै नमः ।...उपक्रम्य प्राणा-
नायम्य । अनया भाष्यय...कनया च वक्ष्ये । तदर्थं पुण्या-

हं वाचयिष्ये ।......क्रियतामिति पुण्याहं वाचयित्वाथ देवयजनो मुखात् कृत्वा पक्व–ज्जुहोति । स्रुवणे दर्भानुपस्तीर्य (मे)क्षणेन चरुमालोड्य पूर्वार्द्धादवदाय अपरार्धादवद्यत्यभिघारयति, प्रत्यनक्ति पुरस्तात् स्रुवाहुतिं हुत्वा । अग्निं मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वतो भुवो यज्ञस्य रजसश्च ते न तानि युग्भिः स च से शिखाभिः । दिवि......न दधुषे सुपर्णा जह्वामग्ने चक्षषे हव्यवाहं स्वाहा । अन्नश्च...पूर्ववदुपस्तीर्य स्विष्टकृतमुत्तरार्धपूर्वार्धे होमः सकृदवद्यति द्विरभिघारयति न प्रत्यनक्ति तमन्तःपरिधि सादयित्वा याज्याहुतीरुपजुहोति ।... ... ... प्रत्याब्दिकश्राद्धे अस्मत्पितृपितामहप्रपितामहार्थे भवता क्षणः कर्तव्यः ।.... ....गर्भाधानादिकर्म–अस्याः । गर्भाधानपुंसवनसीमन्तोन्नयनकर्माङ्गमुदकशान्तिप्रतिसरकर्म करिष्ये ।

End:

दर्भाग्रे द्वे पर्यग्निकरणे द्वे....ज्र्जनचतुर्भ्ये इति आरक्तिमां षड्विंशतिः शम्याः परिधीन् कृत्वा मध्यमाङ्गुलिरनामिकयाकनिष्ठिकेऽति.... ....मध्यमो द्राघीयान् दाक्षिणार्योऽणिष्ठो ह्रसिष्ठ उत्तराङ्गुष्ठमात्रमष्टादश याज्ञिकान् प्रादेशमात्रं दर्भतरुणकाभ्यामङ्गुष्ठमात्रे प्रोक्षणीमाज्यस्थालीप्रस्थचतुर्भागं......तस्य द्विरङ्गुलमुन्नतं पश्चाङ्गुष्ठबिलमेवं स्रुक्प्रदेशमात्रं चतुरङ्गुलं किञ्चिद्दक्षिणत उन्नतो भव तन्मे क्षणमिति होमदर्विप्रमाणमितिह स्माह बोधायनः ।

Colophon:

हरिः । ॐ । शुभमस्तु ॥

Author:

Remarks—The work consists of three main topics: 1. Śubhakarma. 2. Prāyaścittakarma. 3. Aparakarma.

The first praśna contains:—

1. Puṇyāha. 2. Sviṣṭakṛddhoma. 3. Devayajña. 4. Pitṛśrāddha according to Pārvaṇavidhāna. 5. Garbhādhāna. 6. Pumsavana. 7. Sīmanton nayana. 8. Udakaśānti and Pratisarakarma. 9. Abhyudayaśrāddha (Hiraṇyarūpa.)

The second contains: 1. Jāta Karma. 2. Nāmakarma and Annaprāśana.

The third praśna contains: 1. Upanayana. 2. Śukrīyavratopakrama. 3. Godānavratopakarma. 4. Vāstuśamana. The expiatory rites begin from Fol. 67 whose main portion deals with Brahmacaryāśramavratalopaprāyaścitta. These come to a close on Fol. 110 where-from Aparakriya begins.

॥ बोधायनदर्शपूर्णमासानुष्ठानम् ॥

No. 71. BODHĀYANADARŚAPŪRṆAMĀSĀNUṢṬĀNAM.

C. O. L. No. 335.

Substance—Palm leaf. Size—12″×2″. Leaves—96. 10 lines per page and 40 letters per line.

Script—Malayāḷam. No. of Granthas—2400.

Owner—Parameśvaran Nampūrippād, Edappallimana, Alwaye, Travancore.

Subject—The observances and rituals to be followed on Full Moon and New Moon days according to Bodhāyana's school.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु

अथ गुरून् प्रणम्य बोधायनमतेन दर्शपूर्णमासानुष्ठानं वक्ष्ये । हौत्रं तु आश्वलायनमतेन । तत्र तत्र तत्तन्मन्त्राश्च व्याख्यायन्ते । सर्वमन्त्राणामनुष्ठानस्मारकत्वात् । यथा कथञ्चित् अनुष्ठान(क?)स्मारकतया व्याख्याने रूपभङ्गादि न दोषाय । तत्र प्रथमं कर्माधिक्यात् दर्शकर्मोच्यते ।

अमावास्यायां प्रातर्हुतेऽग्निहोत्रे कृतसन्ध्यासमापनोऽध्वर्युः पादौ प्रक्षाल्य आचम्य आपोहिष्ठेति तिसृभिः प्रतिमन्त्रमाचामेत् । तत्राद्यमन्त्र(पां?)स्तु आपोहिष्ठामयो भुवः......महेरणाय चक्षसे इति । हीत्यस्मात् पूर्वत्वात् आप इत्यनामन्त्रितम् । न च निर्मयोभुवानुषञ्जनीयः, व्यवहितत्वात् ॥

End :

यदि पर्वणि चतुर्दशी, तर्हि पिण्डपितृयज्ञः प्रतिपदि । प्रतिपदि पर्वाण्वपि नास्ति चेत् पर्वण्येव । एवं केरलेष्वाचारः ।

Colophon :

इति दर्शपूर्णमासौ व्याख्यातौ ॥

Author :

Remarks—From the words एवं केरलेष्वाचारः occurring at

the close of the work it is possible to conclude that the author belonged to Keraḷa.

After the completion of the text two stanzas in Malayāḷam and one in Sanskrit are additionally appended, viz :

കപാലയുഗളം പാശമിടത്തണ്ടുളിയും മഴ
പറയും ചകരീത്യേവഅരണ്യൃങ്ങളെട്ടിവ. ൧
ഉളിയും മഴവും തണ്ടുമമൃങ്കം പാള പാശവും
കത്തുന്ന ചകരീംപൃതലരണ്യങ്ങളെട്ടിവ. ഇതിവാ:

आधाने वृतिसंभृतिक्षुरविनिध्यावाचनं मार्जनं
गव्यं कर्म च भोजनौषधिहुतब्रह्मौदनधारणी ।
आरोप्याग्निमपेतकर्म निर्वपेत् संभारमापद्यता-
मग्नीन् सर्वसमित्तनुद्वयविराट् पूर्णाग्निहोत्रेष्टयः ॥

The mode of producing fire in case Agnihotra fire is extinguished is described in detail in Malayāḷam on Fol. 98. On Fol. 99 it is stated that the soul attains physical form by dint of obsequial observances.

॥ बोधायनश्रौतम् ॥

No. 72 A. BODHĀYANAŚRAUTAM.

C. O. L. No. 928 A

Substance—Palm leaf. Size—13″ × 1¾″. Leaves—88. 14 lines per page and 45 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Owner—Śūran Kaṇḍan Nampūri Maṅgalaśśeri Illom, Vaikom.

Subject—Rituals enjoined by the Vedas, according to the School of Bodhāyana.

Beginning—End—Same as No. 66.

Colophon:

इति पञ्चमोऽध्यायः। पौरोडाशिकमिदमेकम्। अथातोऽग्न्याधेयं व्याख्यास्यामः।

अथातश्चातुर्मास्यानि व्याख्यामः। स ह स्माह बोधायनः। अथातोऽग्निकल्पं व्याख्यास्यामः। स्वरस्य करण इत्युत्तरे।

अथात इष्टिकल्पं व्याख्यास्यामः। सह। अथातो द्वादशाहं व्याख्यास्यामः। चिन्वीत द्वादशाहे।

Author:

Remarks—The contents of this work show that it is the same as No. 66.

॥ बोधायनकल्पसूत्रम् ॥

No. 72 B. BODHĀYANAKALPASŪTRAM.

C. O. L. No. 923 B.

Substance—Palm leaf. Size—13″ × 1¾″. Leaves—81: 14 lines per page and 45 letters per line. Script—Malayāḷam, No. of Granthas—1450,

Owner—Same as No. 72 A.

Subject—Prescription of materials such as Purodāśa used in connection with Yajña.

Beginning :

श्रीगणपतये नमः ।

पञ्चतयेन कल्पमपेक्षतः छन्दसा ब्राह्मणेन प्रत्ययेन न्यायेन संस्थावशेनेति । छन्दसेति यदवे.चाम यथा । यथ.न्नायप्रणिधिरिदं पूर्वमिदमुत्तरमिति । अथापि मन्त्र एव स्वयं कर्म प्रकृते । कर्मानुवादी भवति । यथैतत् भवति प्रेयमगाद्धिषणा बर्हिरच्छोर्वन्तरिक्षमन्विहि देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नये जुष्टं निर्वपामीति ।

End :

अथ दर्शपूर्णमासेषु सोमेषु विसृष्टायामवान्तरदीक्षायां पिण्डपितृयज्ञं दद्यात् । तदिदं प्रोक्तम् । यदक्लप्तं सूत्रतः सामैकं तव क्रतुयोगं यज्ञे यज्ञमुपलक्षयेते.ति बोधायनो यज्ञे यज्ञमुपलक्षयेते.ति बोधायनः ।

Colophon :

इति बोधायनीयं कल्पसूत्रं समाप्तम् ।

Author :

Remarks—This work serves as an explanation of the matter indirectly drawn from the Śrauta Sūtras of Bodhāyana.

॥ बोधायनापरप्रयोगादि ॥

No. 73. BODHĀYANĀPARAPRAYOGADI.

C. O. L. No. 207.

Substance—Paper. Size—13″ × 8″. Pages — 168. 20 lines per page and 18 letters per line. No. of Granthas—1850.

Owner—C. O.

Subject—Description of the rites of the householder such as Upākarma, Tarpaṇa etc.

Beginning:

श्रावण्यां पौर्णमास्यामाषाढ्या............सहाचार्यो नद्यां स्नात्वा माध्याह्निकं कृत्वा प्राणानायम्य अध्यायोपाकर्म करिष्य इति सङ्कल्प्य पुनः स्नात्वा यज्ञोपवीतं मौञ्जीं कृष्णाजिनं दण्डं च धारयित्वा च नित्यतर्पणानि कुर्यात् ।

अग्निः प्रजापतिः सोमो रुद्रो दितिर्बृहस्पतिः सर्वा इत्येतानि प्राग्द्वाराणि सनक्षत्राणि संग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि । वसूंस्तर्पयामि ।

End:

यदस्य कर्मण इत्यस्य स्विष्टकृद्देवता यदस्य कर्मणोऽत्यरी ... .चम् समिद्धस्वाहा । स्विष्टकृत इदम् । दर्शस्थालीपाकं धर्मपत्न्या सह दर्शस्थालीपाकेन यक्ष्ये । तदङ्गं पुण्याहम् । अग्निमिन्द्राग्नी च प्रीयेताम् । अग्निमिन्द्राग्नी च यक्ष्ये । आघारान्तं कृत्वा । आज्यभागान्ते अग्नये स्वाहा । इन्द्राग्निभ्यां स्वाहा । स्विष्टकृदादिहोमशेषं समापयेत् ।

Colophon :

आश्वलायनपुण्याहं समाप्तम् ।

Author :

Remarks—Though the title of the work is Bodhāyanāparaprayoga, the *prayogas* of Āśvalāyana alone are dwelt upon. It includes also Pūrvaprayogas. The list of subjects dealt with here is given below:

नित्यतर्पणम् ।
उपाकर्मतर्पणम् ।
खननसंस्करादि ।
दक्षिणायनादिमरणप्रायश्चित्तम् ।
होतृसंस्कारः ।
अपरं सूत्रम् ।
सामगानामग्निसन्धानम् ।
श्राद्धम् ।
आश्वलायनास्थिसञ्चयनादि ।
बोधायनौपासनादि
आश्वलायनाग्निसन्धानादि ।

॥ बोधायनीयश्रौतप्रयोगशिखामणिः ॥

No. 74. BŌDHĀYANĪYAŚRAUTAPRAYOGA-ŚIKHĀMAṆI.

C. O. L. No. 545.

Substance—Paper. Size—11″ × 8½″. Pages—98.

About 20 lines per page and 24 letters per line.
Script—Devanāgarī. No. of Granthas—1200.

Owner—C. O.

Subject—Śrāutaprayogas from Vivāha to Cauḷa according to Bodhāyana's school.

Beginning:

स्वस्ति गुरवे नमः। अथ नान्दीश्राद्धप्रयोगः।

कर्ता द्विराचम्य प्राणानायम्य सुमुखश्चेत्यादि गणपतिं प्रार्थ्य देशकालौ सङ्कीर्त्य एवंगुणविशेषणविशिष्टायां पुण्यतिथौ श्वः करिष्यमाणामुककर्माङ्गतया विहितं पुण्याहवाचनपूर्वकं नान्दीसमाराधनं करिष्ये। तदादौ निर्विघ्नपरिसमाप्त्यर्थं गणपतिपूजनं कुलदेवताप्रतिष्ठापनं च करिष्ये इति सङ्कल्प्य गणपतिपूजनं कुर्यात्। तद्यथा—'गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीदसा(ध? द)नम्'॥ गणपतये नमः आसनं समर्पयामि। हस्ते दूर्वाक्षतान् गृहीत्वा ॐ भूः गणपतिमावाहयामि। ॐ भुवः गणपतिमावाहयामि। ॐ सुवः गणपतिमावाहयामि। ॐ भूर्भुवस्स्वः गणपतिमावाहयामि। गणपतये नमः पाद्यं समर्पयामि। गणपतये नमः अर्घ्यं समर्पयामि। गणपतये नमः आचमनीयं समर्पयामि। गणपतये नमः आपोहिष्ठेति स्नानं समर्पयामि। गणपतये नमः स्नानानन्तरम् आचमनीयं समर्पयामि। गणपतये नमः वस्त्रयुग्मं समर्पयामि। गणपतये नमः उपवीतं समर्पयामि। गणपतये नमः आभरणं समर्पयामि।........

End:

एवं सर्वाण्युपरिष्टात्तन्त्राणि समाप्याजुषस्व न इत्याद्युत्तरपरिषेकं प्रणीताविमोचनं ब्रह्मोद्वासनं च कृत्वा कृतानां गर्भाधानचौलकर्मणां

श्रीपरमेश्वरः प्रीयताम्। कृतानां गर्भाधानचौलकर्मणां साङ्गतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान् भोजयिष्ये। तथैव यथाशक्ति भूयसीं दक्षिणां दातुमहमुत्सृजे। कृतैर्गर्भाधानपुंसवनसीमन्तोन्नयनविष्णुबलिजात-कर्मनामकरणोपनिष्क्रामणान्नप्राशनकर्णवेधनचौलकर्मभिः श्रीपरमे-श्वरः प्रीयताम्। "अयं ते योनि ऋत्विजो यतो जातो अरोचथ। तं जानन्नग्न आरोह आथातो वर्धयारयिम्" इति समारोपयेत्। ततो मङ्गलार्तिक्यं कुर्युः। ब्राह्मणा मन्त्राक्षतान् दद्युः॥

Colophon :

इति श्रीकाशिवासिकेशवभट्टसूनुना श्रीविश्वप-तिभट्टेन कृते बोधायनीये प्रयोगशिखामणौ गर्भाधानादि-तन्त्रः समाप्तः॥

Author—Viśvapatibhaṭṭa, son of Keśava Bhaṭṭa of Benares.

Remarks—This work deals with Nāndīśrādhaprayoga, Sarvakarmāṅgadhūtapuṅyahāvācanaprayoga, Vivāhahoma, Vāgdānaprayoga, Madhuparka, Kanyādānaprayoga, Sacīpūjanavidhi Gṛhapraveśa, Vivāhavṛatagrahaṇa, Oupāsanavidhi, Caturthīhoma, Vivāhavṛatavisarjana, Upasamveśanam, Oudumbarapūja, Sthālīpākahoma, Garbhādhāna, Pumsavana, Sīmantonnayana, Jātakarma, Nāmakaraṇa, Upaniṣkrāmaṇa, Annaprāśana, Karṇavedha and Coulatantra. Many citations have been given in it from works such as Smṛtisārasamuccaya, Prayogasāra, Nṛsimhakārikā, Viṣṇubhaṭṭaprayo-

gasāra, Āśvalāyanaprayogaratna, Āśvalāyanasūtra, Viśvaprakāśakārikā, Sūtrasārasya, Śinghabhaṭṭīyam, Caṇḍeśvarīyam, Kumārasvāmikārikā, Prayogapārijāta, Cintāmaṇi and Bārhaspatya.

॥ भारद्वाजगृह्यप्रयोगः ॥

No. 75. BHĀRADVĀJAGṚHYAPRAYOGA.

C. O. L. No. 149.

Substance—Paper. Size—14″ × 8″. Pages—142. About 19 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1278. Complete.

Owner—C. O.

Subject—Description and application of gṛhyasūtras of Bhāradvāja.

Beginning :

नमः सदसे । नमः सदसस्पतये । नमः सखीनां पुरोगाणां चक्षुषे । नमो दिवे । नमः पृथिव्यै । हरिः ॐ ।

श्रोत्रियान् ब्राह्मणान् नमस्कृत्य कर्मारम्भमुहूर्तः सुमुहूर्तोऽस्त्विति भवन्तोऽनुगृह्णन्तु इति प्रार्थितैरनुज्ञातः सर्वकर्माणि कुर्यात् ।

"सर्वकर्मणि चादौ तु सम्प्रार्थ्य च गणाधिपम् ।
गणनां त्वेति मन्त्रेण गणनाथं प्रपूजयेत्" ॥

करिष्यमाणस्य कर्मण अविघ्नेन परिसमाप्त्यर्थम् आदौ महागणपतिपूजां करिष्ये द्विः ।

गयानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनःशृण्वन्नूतिभिस्सीदसादनम् ॥

End:

दारुमयानि अग्नौ प्रक्षिपेत् । मृन्मयानि अप्सु विनिक्षिपेत् । पात्रादिदाहे निर्ऋत्यायै त्वा इति विदग्धं अभिमन्त्र्य त्वमपराची त्वमवाची त्वं रक्षांसि हन्ति गच्छ इति दक्षिणापरामुत्तरापरां वा दिशं तं प्रतिनिरस्य अप उपस्पृश्य अग्नी रक्षांसि गच्छतीति आज्याहुतीर्जुहुयात् ।

Colophon:

हरिः । ॐ । शुभमस्तु । गुरुभ्यो नमः ॥

Author—Bhāradvāja.

Remarks—The work lays special stress on one's daily duties with citations from Veda and on the penalty for shortcomings in their performance.

॥ भारद्वाजगृह्यप्रयोगः ॥

No. 76. BHĀRADVĀJAGṚHYAPRAYOGA.

C. O. L. Nos. 318, 343, 351.

Substance—Paper. Size—$11'' \times 8\frac{1}{2}''$. Pages—157. About 20 lines per page and 28 letters per line. Script—Devanāgarī. No. of Granthas—2748. Complete.

Owner—C. O.

Subject—Description of the rites of a Brāhmin householder beginning from marriage and extending upto the end of Brahmayajña.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।
वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

सुमुहूर्ते वरः कन्यागृहं गत्वा कृतपादशौचाचमन आचार्येण कृतरक्षाङ्कुरो विनायकं सम्पूज्य प्राणानायम्य पाणिग्रहणकर्मार्थं वरान् प्रेषयिष्ये । द्विः । वत्सगोत्राद् यूयं मदर्थं कन्यां वृणीध्वमिति ब्राह्मणान् ब्रूयात् । ते कन्यादातारं गत्वा ब्रूयुः ।

End:

गोभूतिलहिरण्याज्यवस्त्रधान्यगुडानि च ।

रूप्यं लवणमित्याहुः दशदा(नाः? प्रकीर्तिताः? नान्यनुक्रमात्) ब्रह्मयज्ञं करिष्ये । ब्रह्मयज्ञेन यक्ष्ये । विद्युदसि ... उपैमि, अप्सु श्रद्धा. गायत्रीं दशवारं जप्त्वा वेदादीन्—अग्निमीले ....धातमम् । इषे त्वोर्जे त्वा.....कर्मणे । अग्नआयाहि....बर्हिषि । शन्नो देवीः......अवन्तु नः । अग्निर्मूर्धेत्यनुवाकम् । एकाम् ऋचं वा । यथाशक्ति स्वाध्यायम् । ॐ नमो ब्रह्मणे......करोमि । वृष्टिरसि.... अपागाम् । ततस्तर्पणम् । ब्रह्मादिदेवान् तर्पयामि । सर्वान् देवान् तर्पयामि । देवगणान् तर्पयामि । सर्वदेवपत्नीस्तर्पयामि । निवीती । प्रजापतिं काण्डऋषिं तर्पयामि । सोमं काण्डऋषिं तर्पयामि । अग्निं कां......तर्पयामि । विश्वान्

देवान् ऋषीन् तर्पयामि । ब्रह्माणं स्वयम्भुवं तर्पयामि । सद-सस्पतिं.......मि । ऋग्वेदं.......मि । यजुर्वेदं.......मि । साम-वेदं.......मि । अथर्ववेदं.......मि । अथर्वाङ्गिरसं.........मि । इतिहासं.......मि । पुराणं तर्पयामि । सर्वदेवजनान् तर्पयामि । सर्वभूतानि तर्पयामि । प्राचीनावीति । वैशम्पायनादिपितॄन् तर्पयामि । सर्वान् पितॄन् तर्पयामि । सर्वपितृपत्नीस्तर्पयामि । सर्वपितृगणान् तर्पयामि । सर्वपितृगणांस्तर्पयामि । ऊर्जं वह-न्तीः .... पितॄन् तृप्यत ।

Colophon:

शुभमस्तु ।

Author—Bhāradvāja.

Remarks—In connection with the nuptial ceremony it is said, "चतुर्थ्यां स्नातां प्रयतवस्त्रां......" lending support to the view that nuptials can be celebrated on the fourth day. This custom is prevalent only among the Brāhmins and Kṣatriyas of Kerala. Most probably the author might have been a Nampūri Brāhmin.

॥ भारद्वाजगृह्यसूत्रम् ॥

No. 77. BHĀRADVĀJAGṚHYASŪTRAM.

C. O. L. No. 148.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—102. 16 lines per page and 20 letters per line.

Script—Devanāgarī. No. of Granthas—1000. Complete.

Owner—C. O.

Subject—Aphorisms on domestic rituals by Bhāradvāja.

Beginning:

पूर्वमुपनयनं व्याख्यास्यामः । ॥ १ ॥

पुरस्तादेव सम्भारानुकल्पयते । ॥ २ ॥

पालाशमिध्मं खादिरमौदुम्बरं वैकङ्कतं वैतद्वृक्षीयामेव दर्वीं करोति त्वग्बिलाममूलदण्डामरत्नीमात्रीम् । ॥ ३ ॥

चतुरङ्गुलं बिलं करोति । ॥ ४ ॥

सामयाचारिकं कर्मेति विज्ञायते ॥ ५ ॥

गर्भाष्टमेषु ब्राह्मणमुपनयीत गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यं गर्भनवमेषु ब्राह्मणमित्यपरम् ॥६ ॥

वासांसि समामनन्त्यैणेयं ब्राह्मणो वसीत रौरवं राजन्यो बस्ताजिनं वैश्यो यदाजिनं धारयेत् ब्रह्म वर्धयेद्यद्वासो धारयेत् क्षत्रं वर्धयेदुभयं धार्यमुभयोर्ऋद्ध्या इति विज्ञायते ॥ ७ ॥ वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे हेमन्ते वा राजन्यं शरदि वैश्यं वर्षासु रथकारं शिशिरे वा सर्वानापूर्यमाणपक्ष पुण्ये नक्षत्रे विशेषेण पुंनामधेये ॥ ८ ॥

End:

अथ पर्वण्यतीते मनो ज्योतिरयाश्चाग्नेऽसीति यदास्मिन् यज्ञे स्वस्ति न इन्द्र इति चतस्र आज्याहुतीर्हुत्वा स्थालीपाकं च कुर्यात् । प्रागष्टम्या अत ऊर्ध्वं सोपवासः कार्यो द्वयो-

द्वौ त्रिषु त्रय इत्येवं नैमित्तिकेष्वतीतेषु प्रायश्चित्तम्। पार्वणवद्धोमः पितृयज्ञेऽतीते वा पक्षातीते वा पक्षात्यये सोपवासः कार्य इति सिद्धम्। नित्येषु चैवमेवं स्यात्। अथ महायज्ञानामेकस्मिन्न मनो ज्योतिरिरिति द्वयोस्त्रयाणां चतुर्णां पञ्चानां वा षष्ठप्रभृति तिस्रस्तन्तुमतीर्हुत्वा चतस्रो वारुणीर्जपेदिमं वरुण तत्त्वायामि यच्चिद्धियश्चैत्या। नवरात्रादत ऊर्ध्वम् आ द्वादशरात्रात् चतस्रोऽभ्यावर्तनीर्हुत्वा कार्यः तन्तुमतीश्चरुः स्नातकस्यापि होमविच्छित्तावुक्तम्। प्राप्ते प्राजापत्ये तस्य विच्छित्तिः। तस्य तु पुनराधेयं मनो ज्योतिस्तन्तुमतिः पुनस्त्वादित्या रुद्रा इति च पूर्णाहुतिं प्रतीयात्। एतामग्न्युपघातेषु सर्वत्र। स्त्रियाश्चैवं होमाभिगमनं स्थालीपाकेषु सर्वेषामन्ततो व्याहृतिभिरिति सिद्धम्।

नम आचार्येभ्यो नम आचार्येभ्यः।

Colophon:

इति श्रीमदाचार्यविरचिते भारद्वाजसूत्रे गृह्ये तृतीयः प्रश्नः समाप्तः।

Author—Bhāradvājācārya.

Remarks—This work has been edited and published in Leyden by Henriethe J. W. Solomons D. Litt. But there is remarkable difference between the two, the former furnishing more detailed information and correct readings. Prof. Macdonnell observes as follows:— "About Baudhāyana's gṛhya not much is known, still less about that of

Bhāradvāja" Page 250, History of Sanskrit Literature (1913). There are three *praśnas* from Puṇyāha, Śrāvaṇa karma; Ekāgnihoma respectively. At the close of the Ms. a separate work on an allied subject is embodied, viz: "Gṛhyaprāyaścitta".

"अथ पर्वण्यतीते उत्तरस्मिन् काल आगते हविष्य आगमनन् । अथ गृह्यप्रायश्चित्तानि । संवत्सरे सपिण्डीकरणम् । नान्दीश्राद्धस्य पूर्वपक्षे अपरेण गार्हपत्यमुपविश्येन्द्राय स्वाहेन्द्रपुरुषेभ्यः स्वाहेति अपरेणाग्निं हस्तेन परिमृज्य सर्वेषु पाकयज्ञेषु दक्षिणतः प्राचीनावीती । विश्वामित्राय जमदग्नये अघमर्षणे त्रीन् प्राणायामान् धारयन्ति । अथातोऽवान्तरदीक्षां व्याख्यास्यामः । अथात उपाकरणोत्सर्जने चत्वारिंशतमष्टौ च । अथातो व्रतादेशविसर्जने एतस्मिन्नेवाग्नावोदनं श्रपयित्वाज्यमधिश्रित्योत्पूय एकाग्निर्द्वादशाहं विच्छिन्नः पुनराधेयः"।

॥ भारद्वाजश्रौतप्रयोगादि ॥

No. 78. BHĀRADVĀJAŚRAUTAPRAYOGĀDI.

C. O. L. No. 227.

Substance—Paper. Size—14" × 8½". Pages—320. 20 lines per page and 19 letters per line. Script—Devanāgarī. No. of Granthas—3440. Incomplete.

Owner—C. O.

Subject—Bhāradvājasūtras relating to the Kṛṣṇa Yajurveda describing the mode of observance of Śrouta rules.

Beginning:

दर्शेन यक्ष्ये पूर्णमासेन यक्ष्ये द्वितीय अप उपस्पृश्य। विद्युदसि विद्यमे पाप्मानमृतात् सत्यमुपैमि श्रद्धा मयि यक्ष्यमाणोऽप उपस्पृशति। तदिदं सर्वयज्ञेषूपस्पर्शनं भवति। अध्वर्युवरणं आहवनीयार्थं तूष्णीमुद्धृत्य अन्यस्मै प्रदाय गार्हपत्यं तूष्णीं दक्षिणाग्निं प्रणीय आहवनीयमादाय आहवनीयायतने तूष्णीमग्निं प्रणीय विहारस्योत्तरत उपविश्य।

देवा गातुविदो गातुं यज्ञाय विन्दत।
मन (स) स्पतिना देवेन वाताद्यज्ञः प्रयुज्यताम्।

इति जपित्वा त्रीणि काष्ठान्यादाय।

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तनुवं पुषेम।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना ..येम
आहवनीयमुपसमिन्धे।

End:

कोऽसि को नामेति प्रतिपद्य तस्य त इदमुन्मृजे इत्यन्तेन बभूषन्नवेक्षेत ब्रह्मवर्चसकामोऽवेक्षेत मया व्यवक्षेताभि......
...क्षेता इति विज्ञायते। तत इतराणि द्रव्याण्युपतिष्ठन्ते उत्करे वेदिकरणानि स्फ्यं स्वस्तिर्विघ्न स्वस्तिरित्येतैर्मन्त्रैः यथारूपं यज्ञिया यज्ञकृतस्थ? तेर्मास्मिन्यज्ञ......उप......न्युपमा द्यावापृथिवी ह्वयेतामिति द्यावापृथिवी उपास्ताव।

Colophon:

इति प्रवर्ग्यविवरणं समाप्तम्। भारद्वाजश्रौते एका ......ग्यविवरणं समाप्तम्।

Author—Bhāradvāja.

Remarks—Darśapūrṇamāsaprayoga is dealt with at the commencement. The Ms. ends abruptly in the 12th *praśna.*

॥ भार्गवकल्पसूत्रम् ॥

No. 79. BHĀRGAVAKALPASŪTRAM.

C. O. L. No. 538.

Substance—Paper. Size—13½″ x 8½″. Pages—47. 20 lines per page and 22 letters per line. Script—Davenāgarī. No. of Granthas—660. Complete.

Owner—C. O.

Subject—Observances to be followed in conformity with the Samayamata or Mahātraipura Siddhānta.

Beginning:

अथातो दीक्षां व्याख्यास्यामः । भगवान् परमशिवभट्टारकः श्रुत्याद्यष्टादशविद्याः सर्वाणि दर्शनानि लीलया तत्तदवस्थापन्नः प्रणीय स हिमवत्या भगवत्या भैरव्या स्वात्माभिन्नया पृष्टः पञ्चभिर्मुखैः पञ्चाम्नायान् परमार्थसाररूपान् प्रणिनाय । तत्रायं सिद्धान्तः षट्त्रिंशत् तत्त्वानि विश्वम् । शरीरकञ्चुकितः शिवो जीवो निष्कञ्चुकः परमशिवः । स्वविमर्शः पुरुषार्थः । वर्णात्मका नित्याः शब्दाः । मन्त्राणामपि चिन्ता शक्तिः । सम्प्रदायविश्वासाभ्यां सर्वसिद्धिः ।

End :

इत्थं विदित्वा विधिवदनुष्ठितव्रतः कुलनिष्ठस्य सर्वतः कृतकृत्यता शरीरत्यागे श्वपचगृहकाश्योर्नान्तरं स जीवन्मुक्तः । य इमां दशखण्डीं महोपनिषदम् अधीते महात्रैपुरसिद्धान्तसर्वस्वभूतां, स सर्वेषु यज्ञेषु यष्टा भवति । यं यं क्रतुमधीते तेन तेनास्येष्टं भवति इति हि श्रूयते इत्युपनिषद् इति शिवम् ।

Colophon :

इति भार्गवकल्पसूत्रे दशमः खण्डः ।

Author—Bhārgava.

Remarks—This has been published in the Baroda Series with commentary in which one additional Sūtra is embodied giving the number of Sūtras in each Khaṇḍa whereas the work under reference is simply divided into ten Khaṇḍas. That the author is Paraśurāma of Purâṇic reputation is evident from the following lines :

इति श्रीदुष्टक्षत्रियकुलकालान्तकरेणुकागर्भसंभूतमहादेवप्रधानशिष्यजामदग्न्यश्रीपरशुरामभार्गवमहोपाध्यायमहाकुलाचार्यनिर्मितं कल्पसूत्रं सम्पूर्णम् ॥

"Vide p. 366., Vol I, Paraśurāmakalpa Sūtra, Gaekwad's Oriental Series.

॥ यज्ञप्रायश्चित्तविवरणम् ॥

No. 80 A. YAJÑAPRĀYAŚCITTAVIVARAṆAM.

C. O. L. No. 1041 A.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—90. About 8 lines per page and 45 letters per line. Script—Malayāḷam and Grantha. No. of Granthas—2290. Complete.

Owner—Rāja of Cirakkal,

Subject—Description of penalties for *Mantralopa Kriyālopa* and *Samayalopa* likely to take place in Yāgas (Sacrifices).

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीसङ्गमेशोऽवतु । अथातो मन्त्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्यामः । अथशब्द आनन्तर्यार्थः । उक्तानि दर्शपूर्णमासादीनि श्रौतानि कर्माणि । अनन्तरं तेषामकरणेऽन्यथाकरणे वा प्रायाश्चित्तानि व्याख्यास्यामः । अतःशब्दो हेतौ । यस्माद् दर्शपूर्णमासादिकर्मणां सकलावगतिर्वैगुण्यावगतेर्हेतुः । तस्मादनन्तरं विहितानामकरणेऽन्यथाकरणे वा प्रायाश्चित्तानि व्याख्यास्यामः ।

End:

अरूपमस्य यजमानस्य आत्मनात्मनि शरीरे जायते । सकुष्ठं अर्शसो मूलरोगः तमावान्तरं यत् प्रत्येयात् । पुनरावृत्य शेषाद् गृह्णीयात् । यज्ञं विच्छिन्द्यात् । अतस्तदेवापलष्टमित्रो (?) मित्रो

जनानित्यादिना हुत्वान्यां दुग्ध्वा इत्यादि यदि पूर्वस्यामाहुत्यां उत्त-राहुतिः स्कन्देद् यदि वोत्तरायां पूर्वामाहुतिमभिजुहुयात्। यत्र वेत्थ वनस्पत इत्यादिना समिधमादध्यात्। स्कन्दे यदि स्रुचि शेषमस्ति तूष्णीमेव पुनर्जुहुयात्। अन्यान् दुग्ध्वा इत्यादि यत् पुरा प्रयाजेभ्य इत्यादि गतं गतं गर्भस्रवन्तवन्तामि-त्यादिना अग्निहोत्रस्थालीं(श्रुवन्त्री?श्रुवंत्रिरभि)मन्त्र्य विधुं दद्राण-मिति सन्दध्यादिति भगवानापस्तम्बः।

Colophon :

इत्थं याज्ञीषु चिन्तासु रममाणश्चकार ह।
इमां वैद्याश्रिकिन्नर्याख्यां गोपो यज्ञाङ्गलक्षणम्॥
इति गोपालकृतौ यज्ञप्रायश्चित्तविवरणं समाप्तम्। हरिः ॐ।
श्रीगुरुभ्यो नमः। श्रीगोपालकृष्णस्वामिने नमः। अविघ्नमस्तु।

Author—Gopāla.

Remarks—28 leaves are written in Malayāḷam and 62 in Grantha characters. Strict continuity is perceptible in the subject-matter. It may be presumed from the words "श्रीसङ्गमेशोऽवतु" occurring in the beginning that it was written at Iriññālakkuda in Cochin State.

॥ शिक्षा ॥

No. 80 B. ŚIKṢĀ.

C. O. L. No. 1041 B.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—38.

8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—731. Incomplete.

Owner—Same as No. 80 A.

Subject—Śikṣā relating to Varṇa and Svara in Veda.

Beginning:

गणेशं दक्षिणामूर्तिं वाणीं व्यासं गुरूनपि ।
नमामि यत्प्रसादेन कृतिनः सन्ति देहिनः ॥
वेदवाक्यगतान् वर्णानकारादीन् नमाम्यहम् ।
तच्छन्दोमुनिदेवानप्याचार्यान् शौनकादिकान् ॥

अथ वर्णविषयाणि यानि ज्ञेयानि तानि कानिचिल्लक्ष्यन्ते । तज्ज्ञानस्याभ्युदयनिःश्रेयससाधनत्वात् । तथाहि—

आकाशवायुप्रभवः शरीरात्
समुच्चरन् वक्त्रमुपैति नादः ।
स्थानान्तरेषु प्रविभज्यमानो
वर्णत्वमागच्छति यः स शब्दः ॥

तमक्षरं ब्रह्मपरं पवित्रं गुहाशयं सम्यगुशन्ति विप्राः ।
स श्रेयसा चाभ्युदयेन चैव सम्यक् प्रयुक्तः पुरुषं युनक्ति ॥इति॥

End:

पदमध्ये दृष्टानां मकारस्य स्थाने जा एव वा इति विचार्यम् । उभयथाप्युच्चारणविशेषाभावात् । नकारद्वयथकारसकारतकार इति संस्तूयसे, सवाङ्स्तौलाभि अमन्दांस्तौमानित्यादौ पञ्च । एवं प्रपञ्चागतमपि किञ्चिदुक्तम् । अथैकीयमतत्वेनोक्तस्य चकारा-

गमस्य ग्राह्यत्वं प्रति किञ्चिदुच्यते । अकारशकारपरे चकार-आगमो भवति केषाञ्चिदाचार्याणां मते । अत्रापि नकारान्तं पूर्वपदं पूर्वं शकाराद्युत्तरं यदि नकारो अकारः स्याच्च ।

Colophon :

Remarks—Neither the name of the author nor of the work is mentioned in the Ms. Such exhaustive and detailed criticism is unprecedented in Śikṣā treatises.

॥ गायत्रीविवरणम् ॥

No. 80 C. GĀYATRĪVIVARAṆAM.

C. O. L. No. 1041 C.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—2. 10 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—75.

Owner—Same as No. 80 A.

Subject—Offering of oblations on consecrated fire and sacred prayers connected with Gāyatri.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सावित्रीमथ वक्ष्यामि गायत्र्या शिरसा सह ।

भूरादिव्याहृतीनां तु स.........परिकीर्तिताः ॥

अत्रिर्भृगुश्च कुत्सश्च वसिष्ठो गौतमस्तथा ।
काश्यपश्चाङ्गिराश्चैव क्रमेण मुनिपुंगवाः ॥

End :

अर्कस्य समिधा हुत्वा तीक्ष्णतैलेन सादरम् ।
सप्ताहान्मारयेच्छत्रून्.........विप्रं न संशयः ॥
शत्रोः प्रतिकृतिं भूमावालिख्याख्यां च तद्गति ।
तामाक्रम्य तु पादेन जपेच्छत्रुर्विनश्यति ॥
......प्रतिलोमः स्यादाभिचारेषु कर्मसु ।
मारणं वर्णतः शत्रोर्ब्रह्मास्त्रं प्रतिलोमतः ॥
गुरुप्रसादतो ज्ञेयमनर्थकरमन्यथा ।
शान्तये जुहुयादग्नौ घृतेन पयसापि वा ॥
प.... .... ।
आम्रपर्णस्य होमेन सर्वज्वरविनाशनम् ॥
उदुंबर.... .... ।
पयसाज्येन वा हुत्वा शान्तिः सर्वचतुष्पदाम् ॥
शान्तये वत्स.... ....
अभिमन्त्र्य सितं भस्म न्यसेद् भूतादिशान्तये ॥
बहूक्तेन किमत्र स्यात्.... ....होमतः ।
अभीष्टं सर्वमाप्नोति नात्र सन्देहकारणम् ॥
....न लभते च द्विजोत्तमः ।
सावित्रीजपयज्ञेन ज्ञानयज्ञमवाप्नुयात् ॥

Colophon :

इति गायत्री समाप्ता । श्रीगुरुभ्यो नमः ।

Author:

Remarks—The work furnishes all details regarding Rṣis, Chandas, offering of oblations and the fruits thereof. The observance of these rituals leads to the annihilation of sins and accomplishment of all desires.

॥ वामनकारिका ॥

No. 81. VĀMANAKĀRIKĀ.

C. O. L. No. 140.

Substance—Paper. Size—13″ × 8½″. Pages—197. 15 lines per page and 16 letters per line. Script — Devanāgarī. No. of Granthas — 1350. Incomplete.

Owner—C. O.

Subject—An exposition of the various modes of practical application of Smārta observances such as Nāndīmukha, Kautukabandha and Puṇyāhavācana in strict conformity with Khādiragṛhyasūtra to be followed by Sāmavedins.

Beginning:

प्रणम्य खादिराचार्यं गृह्यमाश्रित्य तत्कृतम् ।
संक्षेपेण पदार्थानां स्मार्तानां वक्ष्यते क्रमः ॥
अन्येषु पादबन्धेषु तत्तद्ग्रन्थेषु सत्स्वपि ।

पाठधारणसौख्याय क्रियते पद्यतोगिरा ॥
यथा वो निर्मितस्तेषु पूर्वपूर्वेषु सत्स्वपि ।
परमश्च रसस्तद्वदयं ग्रन्थो भविष्यति ॥
अथ कर्मण्यनादेशे सर्वाण्यप्युत्तरायणे ।
पूर्वपक्षे शुभे चाह्नि तिथिवारगुणान्विते ॥
पूर्वाह्णे शुभलग्ने च स्नात्वाचम्योपवीतवान् ।
प्राणानायम्य सङ्कल्प्य गोत्रनामोक्तिपूर्वकम् ॥
प्राङ्मुखः सपवित्रेण कुर्याद् दक्षिणपाणिना ।
होमानात्मार्थपत्न्यर्थान् कृत्स्ने त्वौपासनेऽनले ॥

End:

मृतौ तु तस्य दहनं नैतेन प्रविधीयते ।
अपि तूत्तपनीयेन दहनं तस्य वै भवेत् ॥
तत्पित्रोर्मरणे प्राप्ते सह वै ज्येष्ठपुत्रकः ।
सपिण्डीकरणे होम...न्नग्नौ समाचरेत् ॥
अन्यथान्ये वदन्त्येव कनिष्ठस्त्वग्निमान् यदि ।
कनिष्ठ एव कुर्वीत सपिण्डीकरणं पितुः ॥

Colophon:

Author—Vāmana.

Remarks—The work comprises two parts, Pūrvavāmanakārikā and Uttaravāmanakārikā and extends upto Vidhurāgnisandāna.

॥ वैखानसगृह्यसूत्रभाष्यम् ॥

No. 82. VAIKHĀNASAGṚHYASŪTRABHĀṢYAM.

C. O. L. No. 195.

Substance—Paper. Size—14″ × 8″. Pages—447. 13 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—3600.

Owner—C. O.

Subject—The aphorisms with Bhāṣya on domestic rituals of Vaikānasa from the nuptial ceremony upto the cremation of dead bodies.

Beginning :

श्रीलक्ष्मीवल्लभारम्भां विखनोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

श्रीरामं विखनोमुनिं मम गुरून् श्रीमाधवाचार्यकान्
श्रौतस्मार्तविदः प्रणम्य तदनु श्रीनारसिंहोऽग्निचित् ।
सन्मान्यः कृतवाजपेयसवनः सोऽहं यथार्थक्रमं
वक्ष्ये भाष्यमृजु ...दं विखनसा प्रोक्तस्य सूत्रस्य नः ॥

(मूलम्)अथ निषेकादिसंस्कारान् व्याख्यास्याम इति ।

(भाष्यम्) अत्राथशब्दो मङ्गलार्थः । अत्र सूत्रस्यानुष्ठातारोऽध्येतारः श्रोतारश्चायुष्मन्तो भवेयुरिति ।

End :

(मूलम्) तिलैर्वैश्वदेवं याम्यं पैतृकं व्याहृतीश्च प्रायश्चित्तं तेनाग्निना पूर्ववद् दहनं कुर्यादिति विखनाः प्राह ।

(भाष्यम्) प्राहेति वीप्सा शारीरकर्मपरिसमाप्तौ भवेत् ।

Colophon :

इति वाजपेययाजीये वैखानससूत्रभाष्ये पञ्चमः पटलः।

Author : Text—Vikhanas. Commentary—Nārasimha, disciple of Mādhavācārya.

Remarks—The Ms. contains 7 *Praśnas*. Each *Praśna* embraces 6—10 *Paṭalas*.

॥ वैखानसगृह्यसूत्रम् ॥

No. 83. VAIKHĀNASAGṚHYASŪTRAM.

C. O. L. No. 255.

Substance—Paper. Size—13″ × 8½″. Pages—120. 20 lines per page and 20 letters per line. Script—Devanāgrī. No. of Granthas—1450.

Owner—C. O.

Subject—Religious rites such as nuptials etc. and the penalty for shortcomings in their performance.

Beginning:

अथ निषेकादिसंस्कारान् व्याख्यास्यामः। ऋतुसङ्गमनगर्भाधानपुंसवनसीमन्तविष्णुबलिजातकर्मोत्थाननामकरणान्नप्राशनप्रवासगमनपिण्डवर्द्धनचौलोपनयनपारायणव्रतबन्धविसर्गोपाकर्मसमावर्तनपाणिग्रहणानीत्यष्टादशसंस्काराः शारीराः। यज्ञाश्च द्वाविंशत्। ब्रह्मयज्ञदेवयज्ञपितृयज्ञभूतयज्ञमनुष्ययज्ञा इति।

End:

'एको देवो बहुधा निर्निविष्टः'
'यदा भरं तन्त्रयते स भर्तु-
निधाय भारं पुनरस्तमेति ।'
तदेव मृत्युममृतं तमाहु-
स्तं भर्तारं तमु गोप्तारमाहुः ॥

संभृतासंभृतासिमेननेनं वेदसत्येन भर्तुः सद्योजातमुत जहात्येषा उत जरन्तं न जहात्येत्येकामिषं नारी पतिलोकं वृणानि पद्यत उप त्वा मर्त्येप्रतं विश्वं पराणमनुपालयन्ती तस्यै प्रजां द्रविणं च धेहि ।

Colophon—Nil.

Author—Sage Vikhanas. Refer to the Vaikhānasāgama published in the T. S. S. as No. 121.

Remarks—The work contains 7 *Praśnas* each of which is again sub-divided. Vikhanas is also the author of Dharmasūtras and Pravarasūtras.

॥ वैखानसगृह्यसूत्रम् ॥

No. 84. VAIKHĀNASAGṚHYASŪTRAM.

C. O. L. No. 1016.

Substance—Paper. Size—8″ × 7″. Pages—60. 15 lines per page and 23 letters per line. Script—Devanagārī. No. of Granthas—660. Incomplete.

Owner—C. O.

Subject—Same as No. 83.

Beginning—Same as No. 83.

End:

काशिपुबर्हिणवासांस्यञ्जनं चार्पयेत् । पूर्ववदूर्जं वहन्तीरिति पिण्डं परिषिच्य त्रिरुदकाञ्जलिं दत्त्वा तथैव पितॄनाभिवन्द्य प्रवासयति प्रजापते न त्वदिति गार्हपत्यं हुत्वा यदन्तरिक्षं इत्युपतिष्ठेत । अनाहिताग्नेश्चैवमौपासनाग्नौ चरुं श्रपयित्वा जुहुयात् । औपासनस्य संस्काराभावाद् यदन्तरिक्षमिति मन्त्रेण गार्हपत्यशब्दं विनैवोपस्थानं कुर्यात् । अपां त्वौषधीनामिति मध्यमपिण्डं दत्त्वाधत्त पितर इति पत्नीं प्राशयेत्, एषा पुमांसं जनयति । द्विपिता चेद् यजमानः तथैव पिण्डं दत्त्वा यन्मे माते ।

Colophon :

Author—Vikhanas.

Remarks—This work formulates the method of performing the Saptapākayajñas such as Pitṛyajña etc. The first proposition is dealt with in full. About 100 Granthas are missing towards the end of the 2nd *praśna*. The work closes with a portion of the 3rd *praśna*.

॥ वैखानसश्रौतसूत्रम् ॥

No. 85. VAIKHĀNASAŚRAUTASŪTRAM.

C. O. L. No. 276.

Substance—Paper. Size—13½″ x 8½″. Pages—354. 20 lines per page and 20 letters per line.

Script—Devanāgarī. No. of Granthas—4425. Complete.

Owner—C. O.

Subject—Aphorisms, on Śrautakarmas, expounded by Vikhanas.

Beginning:

......अग्न्याधेयम् । अरण्याहरणम् ।

विनायकाय विघ्नानामन्तकाय नमाम्यहम् ।

(पारिसंस्तस्य?प्रारिप्सितस्य)शास्त्रस्य सुखेन परिपूर्तये ॥

नमस्त्रैलोक्यनाथाय नमः षाड्गुण्यकर्मणे ।

गुण्याय........त्रैगुण्याय तेजसे ॥

नमः श्रीरङ्गनाथाय नागपर्यङ्कशायिने ।

तथापि सर्वजगतां जागरूकाय रक्षणे ॥

अस्ति बुद्धिमदालम्बं हस्तिभूधरमस्तजम् (?) ।

स्वस्तिबीजं समस्तानामस्तु वस्तु हिताय नः ॥

अथाग्न्याधेयं व्याख्यास्यामः । ब्राह्मणो वसन्ते राजन्यो ग्रीष्मे वैश्यः शरदि रथकारो वर्षासु सर्वे शिशिरे इत्येके । रोहिणीकृत्तिकामृगशिरःपुनर्वस्वुत्तरानुराधाश्रवणहस्तावैशाखेष्वेकस्मिन् नक्षत्रेऽमावास्यायां वा पौर्णमास्यां वादधीत । आस्वग्निमादधीतेति ब्राह्मणोक्तानि काम्यानि नक्षत्राणि यथाकामं यत्रैतानि त्रीणि सम्भवन्ति ऋतुर्नक्षत्रं पर्व तद् भद्रं विप्रतिषेधे तन्नक्षत्रमृतुश्च व......यः सोमेन यद्वक्ष्यमाणोऽग्निमादधीत नर्तुर्न नक्षत्रम्......

End:

अग्ने वाजस्यवती इति तिसृभिरुष्णिग्भिरध्वर्युराग्नीध्रो

जुहोति । उत्तराभिस्तिसृभिः ककुजजित् प्रतिप्रस्थाता यदि पन्नेजनि कलशे वसति परिरेकयानाः कुम्भेष्टका......थनेष्टका कथनेष्टका वा परासिच्येरपग्रात्रोदुम्बरी द्रोणकलशा दीपे तु नृश ... म्रियेोतयदि भिद्येत वा चषालस्य वा पात्रावेस्थाने रवैनैव यजुषाभिमन्त्र्य भूरायुर्मे धारयति प्राणं मे धारयत प्रजां मयीति यजमानो जपति। अग्ने वाजस्य गौत इत्येके ॥

Colophon:

श्रीमद्वैखानसे सूत्रे श्रौते च विंशतिः ।
अग्न्याधेयादियज्ञानां प्रायश्चित्तसमाप्तिका ॥

Author—Vikhanas.

Remarks—The work contains 20 *Praśnas*, describing Agnyādhāna, Agnihotra, Ṛtvigvaraṇa Darśapūrṇamāsayāga, Cāturmāsya, Sautrāmaṇi Iṣṭi, Agniṣṭoma, Pravargya, Oupasatkalpa, Āgneyayāga, Jyotiṣṭomakratu, Ukthysamstha, Ādarśāhvaya and Yajñaprāyaścitta. The Ms. is mentioned as No. 1336 in the M. T. C. Vol. II, Part I B (1913—14 to 1915—16). But it omits the introductory verses and breaks off in the 20th *praśna*. For further information refer to the prefatorial note on No. 121, T. S. S

॥ वैखानससूत्रतात्पर्यचिन्तामणिः ॥

No. 86. VAIKHĀNASASŪTRATĀTPARYA-CINTĀMAṆI.

C. O. L. No. 202.

Substance—Paper. Size—13″ × 8″. Pages—177. 18 lines per page and 16 letters per line. Script —Devanāgarī. No. of Granthas—1600.

Owner—C. O.

Subject—Description of domestic rituals of Vaikhānasas.

Beginning:

श्रीवेङ्कटेशमखिलेशमनन्तमाद्यं
कारुण्यवारिधिमशेषसुरैः सुवन्द्यम् ।
वन्दे समस्तजगतामपि सृष्टिहेतु-
मत्रिं मरीचिमपि तान् भृगुकाश्यपादीन् ॥
वैखानसकुलोद्भूतं वेङ्कटेशार्चनापरम् ।
वेदान्तदेशिकं वन्दे श्रीनिवासार्यदीक्षितम् ॥
श्रुतिस्मृति... ... ... ।
... ... वम्
सूत्राणामन्यकल्पानां नेत्रं वितिमिरीकृतम् ॥
सूत्राणामुत्तमं सूत्रं चतुर्वर्गफलप्रदम् ।
श्रुतिस्मृतीतिहासाद्यैः प्रतिपादितवैभवाम् ॥
परमात्मपरां वन्दे सूत्रोपनिषदं महत् ।
श्रीमत्कौशिकगोत्रेण श्रीगोविन्दार्यसूनुना ॥

श्रीवेङ्कटेशपादाब्जसपर्यानुरतात्मना ।
वेदान्ताचार्यवर्येण श्रीनिवासाख्ययज्वना ॥
श्रुतिस्मृतिपुराणादिसूत्रमार्गानुसारिणा ।
वैखानसस्य सूत्रस्य व्याख्या सम्यक् प्रकाश्यते ॥

अथ वैखानससूत्रतात्पर्यचिन्तामणेरविघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धाभीष्टदेवताश्रीवेङ्कटेशनमस्काररूपमङ्गलाचरणानन्तरं सत्यत्वादिसमस्तकल्याणगुणाविशिष्टात् परब्रह्मणः श्रीमन्नारायणादुत्पन्नेन विखनसशब्दवाच्येन चतुर्मुखब्रह्मणा प्रणीतस्य वैखानससूत्रस्य सर्वसूत्रोत्तमत्वे तत्सूत्रोक्तधर्मानुष्ठातॄणामपि सर्वोत्कृष्टतमत्वे च दशविधहेतवो निरूप्यन्ते ।

End:

परत्वादिषु सौलभ्याभावात् । अखिललोकोज्जीवनार्थमर्चावतारः तत्रापि नारायणैकपरत्वाभावाद् बोधायनस्य ।

नारायणैक(निष्ठा ये) सात्त्विकास्तान् विबोधत ।
पुरुषा राजसाश्चैव नानादैवतयाजिनः ॥
ब्रह्मादिदेवताश्चैव तामसाः परिकीर्तिताः ।
रजस्तमोभिभूतानां न तु मोक्षः कथञ्चन ॥ इति ॥

आपस्तम्बा(दिना ? दीनां) कि(श्चा ? श्चिद)पि परमैकान्तिकत्वं भगवत्प्रियतमत्वं च नोपपद्यते । अत एव श्रीमद्वैखानसानां परमैकान्तिकत्वं चोपपद्यत इति सर्वं प्रतिपादितम् ।

Colophon:

शुभं भूयात् ।

Author—Vedāntācārya *alias* Śrīnivāsa.

Remarks—In the prescription of rules many authoritative citations *in extenso* have been given from other eminent works.

॥ शौनककारिका ॥

No. 87. ŚAUNAKAKĀRIKĀ.

C. O. L. No. 2482.

Substance—Paper. Size—$11\frac{1}{2}'' \times 4''$. Pages—150. 10 lines per page and 40 letters per line. Script—Devanāgarī. No. of Granthas—1875. Complete.

Owner—Ananta Yajñeśvara Śastri, Śrī Vidyāvihāramandira, Māśaila, Goa.

Subject—Purificatory rites.

Beginning:

श्रीगणेशाय नमः ।

जयन्ति जग (दा ? द)ज्ञानतमःसंक्षयभास्कराः ।

रामानुजपदावाप्तभूष... ... ...पुरुषोत्तमाः ॥

श्रुतिस्मृति ....पूर्णं शास्त्रकल्लोलसंकुलम् ।

विष्णुभक्तिमहापोतं वन्देऽहं शौनकार्णवम् ॥

तत्सूत्रं शौनको दृष्ट्वा स्वयं हर्षसमन्वितः ।

व्याख्यापयत् स्वकं शिष्यं तं नमाम्यश्वलायनम् ॥

शौनकोऽहं प्रवक्ष्यामि शौनकानां विधिं क्रमात् ।

स्नानं कौतुकबन्धं च पुण्याहाधानमेव च ॥

अपां ग्रामप्रतिष्ठां चाग्निपरिचरणं तथा ।
पुत्रपरिग्रहणं चाग्निसमारोपणमेव च ॥
.........संस्कारमपमृत्युजयं तथा ।
आयुष्यग्रहशान्ति च अद्भुतं दाहशान्तिकम् ॥
यक्ष्मशान्ति रोगशान्ति कृत्याशान्ति तथैव च ।
शत्रुशान्ति चाभिचारं जीवश्राद्धं तथैव च ॥

End:

ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ।
पूर्वोक्तमभिषेकं यत्तदत्रापि विधीयते ॥
गुरवे दक्षिणां दद्याद् वस्त्रहोमपशूनि च ।
यद्युक्तं दक्षिणाभावेऽप्यनुक्ते होमकर्मसु ॥
हिरण्यं दक्षिणां दद्यात्तदानीमल्पमेकोऽपि? ।
वस्त्रकुम्भादिकामर्चां तत्तद्धेनूश्च दापयेत् ॥
ब्राह्मणान् भोजयेत् पश्चात् सुशीलान् वेदपारगान् ।
भक्षैश्च पायसाज्याद्यैर्द्वादशान्यान् बहूनपि ॥
होमशेषं स्वयं प्राप्य ब्राह्मणेभ्यो नमेद्यथा ।
अनेन विधिना यस्तु शान्ति कुर्वीत शक्तितः ॥
तस्य वर्षशतायुष्यं भवत्येव न संशयः ।

Colophon:

इति शौनककारिकायामद्भुतशान्तिविधिः ।

Author—Śaunaka.

Remarks—Vedic and legal functions are described in the form of *Karikas*, including the details of the 16 purificatory rites.

॥ शौनकीयम् ॥

No. 88 A. ŚAUṆAKĪYAM.

C. O. L. No. 1544 A.

Substance—Palm leaf. Size—14″×2″. Leaves—80. 13 lines per page and 55 letters per line. Script—Grantha. No. of Granthas—3600. Incomplete.

Owner—Maṇalikkara Maṭham.

Subject—Explanation of *Vedic mantras*, religious rites and rules pertaining to the royal court.

Remarks—This work has been published in the T. S. S. as No. 120 with the first two Pādas. The Ms. begins from the 11th Khaṇḍa of the first pāda and ends with the 23rd Khaṇḍa of the third. The last six leaves are nine inches long and one inch broad. A commentary on the 11th skandha of the Bhāgavata also seen in this Ms. is catalogued as No. 88 B.

॥ भागवतव्याख्या ॥

No. 88 B. BHĀGAVATAVYĀKHYĀ.

C. O. L. No. 1544 B.

Substance—Palm leaf. Size—14″×2″. Leaves—66. 13 lines per page and 55 letters per line.

Script—Devanāgarī. No. of Granthas—2900. Incomplete.

Owner—Same as No. 88 A.

Subject—Explanation of the 11th Skandha of the Bhāgavata.

Author—Śrīdhara.

Remarks—The leaves have become decayed here and there.

॥ श्रौतप्रायश्चित्तविमर्शिनी ॥

No. 89. ŚRAUTAPRĀYAŚCITTA VIMARŚINĪ.

C. O. L. No. 961.

Substance—Paper. Size—$11\frac{3}{8}'' \times 9''$. Pages—224. About 22 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—2450. Complete.

Owner—C. O.

Subject—Description of the rites of penance due to the violation of the Śrautakarmas mentioned in the Veda of different schools of religion.

Beginning:

श्रीमन्तं दक्षिणामूर्तिं विघ्नेशं भारतीं गुरून् ।
नमामि पुरुषार्थाः स्युर्यत्प्रसादेन देहिनाम् ॥
बौधायनं जैमिनिं च कौषीतक्याश्वलायनौ ।
वाधूलकापस्तम्बादीन् नौमि शाखाप्रवर्तकान् ॥

तत्प्रोक्तकल्पसूत्रादिव्याख्यानकृतमानसान् ।
आचार्यानपि सिद्धान्तिभवस्वाभिमुखान् भजे ॥
श्रौतकर्मसु संक्षिप्य प्रायश्चित्तं विचिन्तितम् ।
यस्मात्तेष्वपि चित्तं तद्यथामति विचिन्त्यते ॥
उपनीतिर्विवाहश्च स्मार्तेषूत्पत्तिकर्मणी ।
तद्वैकल्ये तयोरेव नावृत्तिः केवलं भवेत् ॥
तदूर्ध्ववर्तिनां च स्यादावृत्तिः कृतकर्मणाम् ।
उत्पत्तिकर्म त्वाधारमाधेयान्नोतराण्यतः ॥
सर्वेषां कर्मणामादौ नान्दीमुखविधिर्यतः ।
तद्वैकल्योदितं चित्तं प्रथमं वर्ण्यते ततः ॥

End :

पत्न्यामपि विद्यमानायां मन्त्रवचनाशक्तौ पत्या तेषां वक्तव्या?
जैमिनीनां गृह्ये स्पष्टमुक्तम् । अजपन्त्यां स्वयं जपेदिति । तथा च
तस्यावृत्तिरपि । इयं सर्वथा परिभाषा । जायावाच्यं (तन्त्रान?मन्त्रम)
जपन्त्यामस्यां स्वयं पतिर्जपेदिति इत्यादिदर्शनादेवमुक्तम् ।

Colophon :

इति श्रौतप्रायश्चित्तविमर्शिन्यां नवमोऽध्यायः ।

Author :

Remarks—The work contains nine chapters and is written in the form of Kārikās.

॥ सोमपञ्चकम् ॥

No. 90. SOMAPAÑCAKAM.

C. O. L. No. 432.

Substance—Paper. Size—$13\frac{1}{2} \times 8\frac{1}{2}$. Pages—231.

20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—2887. Incomplete.

Owner—C. O.

Subject—Details of Somayāga.

Beginning:

वसन्ते अमावास्यायां पौर्णमास्यां वा सुत्या यथा स्यात् तथोपक्रमः कर्तव्यः । एकदीक्षापक्षे एकादश्यामुपक्रमः । तिस्रो(क्षे?-दीक्षा)पक्षे नवम्यामुपक्रमः । यस्य पित्रादयोऽनिष्टप्रथमा यज्ञाः स ऐन्द्राग्नेनेष्ट्वाथ सोमेन यजेत । अपिवाग्नीषोमीयस्योपालम्भं कुर्यात् । तत्रैव सङ्कल्पः । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनः दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति त्रिपुरुषसोमपीथविच्छेदप्रायश्चित्तार्थम् ऐन्द्राग्नं पशुं दौर्ब्राह्मण्यनिर्हरणार्थम् आश्विनं पशुं च अग्नीषोमीयेन पशुना सहोपालम्भं कुर्वन् सोमेन यक्ष्ये ॥

End:

सशिरस्का उपमक्षन्तौ स्नातः पत्नी यजमानश्च अन्योन्यपृष्ठे प्रधावतः । यद्दीदीक्षे मनसा यच्च वाचा यद्वा प्राणैश्च चक्षुषा यच्च श्रोत्रेण यद्रेतसा मिथुनेनाप्यात्मना अद्भ्यो लोका दधिरे ते इन्द्रियं शुक्रा दीक्षायै तपसो विमोचनीः आपो विमोक्त्रीं मयि तेज इन्द्रियं यद्दचा साम्ना यजुषा पशूनां चर्मन् हविषा दीदीक्षे यच्छन्दोभिरोषधीभिर्वनस्पतौ अद्भ्यः लोकादधिरे तेज इन्द्रियम् । येन ब्रह्मा येन क्षत्रम् । येनेन्द्राग्नी प्रजापतिः । सोमो वरुणो येन राजा । विश्वेदेवा ऋषयो येन प्राणा अद्भ्यो ... .

... ...

Colophon:

Author:

Remarks—The work extends only upto Nariṣṭa-homa.

॥ स्मार्तकर्मपदार्थानुक्रमणी ॥

No. 91. SMĀRTAKARMAPADĀRTHĀ-NUKRAMAṆĪ.

C. O. L. No. 328.

Substance—Paper. Size—13½″ × 8½″. Pages—176. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1760. Incomplete.

Owner—C. O.

Subject—Śrautagṛhyaprayoga beginning from the nuptials.

Beginning:

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥

अथातः स्मार्तान् पदार्थाननुक्रमिष्यामः । तत्र प्रथमं तन्त्रपाठक्रमानुसारेण विवाहकर्म ब्रूमहे । ब्रह्मचारी षडङ्गं वेदं व्रताद्यनुष्ठानसहितमधीत्य मीमांसाविचारं च कृत्वा त्वं विवाहं स्नानं च

कुर्विति गुरुणाभ्यनुज्ञातः सन् पुण्येऽहनि विवाहं कुर्यात् । तत्रैवं प्रयोगः । विवाहदिवसात् पूर्वेद्युः पूर्वाह्णे नान्दीमुखश्राद्धं कुर्यात् ।

End :

इति दशदानमन्त्रः ।

उच्चैःश्रवःकुले जातो राज्ञां विजयकारकः ।
सूर्यवाहसमः सत्त्वे मम शान्तिं प्रयच्छतु ॥
पितुः शतगुणं दानं सहस्रं मातुरुच्यते ।
भगिन्योः शतसाहस्रं सोदरे दत्तमक्षयम् ॥
.... दयस्तथा ।
युगादिर्भगिनी प्रोक्ता व्यतीपातस्तु सोदरः ॥

इति व्यतीपातान्नदानम् ।

.... पुत्रपौत्रप्रवर्द्धनम् ।
ब्रह्महत्यापनुत्यर्थमतः शान्तिं प्रयच्छ मे ॥
कूश्माण्डदानमन्त्रः—
फलं मनोरथफलं प्रददाति सदा नृणाम् ।
पुत्रपौत्राभिवृद्धिं च अतः शान्तिं प्रयच्छ मे ॥

इति फलदानमन्त्रः

....

Colophon—Nil.

Author :

Remarks—The last seven or eight pages appear to be incomplete. The work contains 16 purificatory rites, śānti etc.

॥ स्मार्तप्रयोगः (बौधायनः) ॥

No. 92. SMĀRTAPRAYOGA.

C. O. L. No. 239.

Substance—Paper. Size—13″ × 8¾″. Pages—196. About 20 lines per page and 17 letters per line. Script—Devanāgarī. No. of Granthas—2047. Complete.

Owner—C. O.

Subject—The observances to be followed from conception.

Beginning :

अथाङ्कुरार्पणं सर्वेषां शुभकार्याणां देवानां कर्मणः पूर्वं नवमसप्तमेऽह्नि मनुष्याणां पञ्चमे तृतीये वा दिनसंख्यतां पञ्च वा एका.........रकृतयो वा सौवर्णराजतास्ताम्रमृण्मया वा प्रक्षाल्य सादयेत् । निशामुख उपलिप्ते देशे दिवा चौलादिषु शुचिदेशादाहृतैः शकृन्मृत्सिकतैः (?) पूरयित्वा वस्त्रेण संवेष्ट्य ।

वल्मीकमृत्तिकामृच्च गोमयं च तथैव च ।
एतासु प्रक्षिपेत्तासु पालिकासु यथाक्रमम् ॥
दूर्वामश्वत्थपत्रं च शिरीषं बिल्वपत्रकम् ।
तासां मूले तु बध्नीयात् श्वेतसूत्रेण वेष्टयेत् ॥

मध्यमायां व्याहृतिभिर्दैवतमावाहयामि ॥ ॐ भूः ब्रह्माणमावाहयामि । ॐ भुवः प्रजापतिमावाहयामि । ओं सुवः चतुर्मुखमावाहयामि । ओं भूर्भुवस्सुवः हिरण्यगर्भमावाहयामि इति ...

End:

गवाश्वत्थकरञ्जकोविदारार्कपर्णेषु न भुञ्जीत । न कंसे भुञ्जीत । आचान्त उद्वयं तमस स्परीत्यादित्यमुपस्थाय वाङ्म आसन्निति जपेत् ।

अहिंसासत्यमस्तैन्यमेषणात्रयवर्जनम् ।

त्याग उपव्रत (उपांशु) न्यग्रोधो गुरुशुश्रूषा अप्रमादः शौचमाचारशुद्धिश्च पुत्रवित्तलोकैषणात्रय... ... .धारी च । स्नानाशक्तौ उष्णेन वारिणा स्नायात् । तत्राप्यशक्तः स्नानान्तराणि कुर्यात् । अशक्तौ गृहस्थः परिचरेत् । अशक्तावेकान्ते तैलाभ्यञ्जने (त?न) दोषः ।

Colophon:

इति संन्यासः ।

Author:

Remarks—This work deals with the rules and observances to be followed by Brāhmins belonging to the school of Āpastamba. In the details of "सन्यासविधि" this treatise holds comparison with Viśveśvarasmṛti. The work comprises only the "Pūrvabhāga".

॥ हिरण्यकेशीयसूत्रव्याख्यानम् ॥

No. 93. HIRAṆYAKEŚĪYASŪTRAVYĀKHYĀNAM.

C. O. L. No. 676.

Substance—Paper. Size—13½″ × 8″. Pages—108. 19 lines per page and 21 letters per line.

Script—Devanāgarī. No. of Granthas—1296.

Owner—C. O.

Subject—Gṛhya Sūtra with commentary relating to Hiraṇyakeśīyas.

Beginning:

वन्दे दुण्ढिं महालिङ्गं विश्वेशं मणिकर्णिकाम् ।
ईश्वरश्रीनिवासार्यादेवल्लभ्यगुरूत्तमान् ॥ १ ॥
श्रीमत्कवेरजातीरं विद्वद्वृन्दोपजीवितम् ।
अत्युत्तमशिवक्षेत्रविष्ण्वादिस्थानमत्र हि ॥ २ ॥
शहजीन्द्रपुरं नाम तत्रास्ते दिक्षु विश्रुतम् ।
तत्र वाञ्छेश्वरो नाम सर्वशास्त्रविशारदः ॥ ३ ॥
आसीत् तस्य सुतः श्रीमान्माधवः सर्वशास्त्रवित् ।
तत्पुत्रो नरसिंहाख्यो वेदवेदाङ्गपारगः ॥ ४ ॥
तत्पुत्रः श्रुतिशास्त्रार्थविचारणकुतूहली ।
श्रीवाञ्छेश्वरनामासौ शिष्टो होशनिवंशजः ॥ ५ ॥
माहिषं शतकं येन प्रपितामहनिर्मितम् ।
व्याख्यातं सम्प्रदायार्थप्रतिपादनपूर्वकम् ॥ ६ ॥
हिरण्यकेशिसूत्रं च व्याख्यातं कृत्स्नमेवहि ।
तदीयपरिभाषाया व्याख्यानं कुरुतेऽधुना ॥ ७ ॥

इह खलु धर्मार्थकाममोक्षेषु पुरुषार्थेषु धर्म एव मुख्यः पुरुषार्थः। इतरेषां तदधीनत्वादित्यग्रे वक्ष्यामः। स च धर्मानुष्ठानसाध्य इत्यविदुषाम् अनुष्ठातुमशक्ततया विद्यापेक्षायां "स्वाध्यायोऽध्येतव्य" इति स्वाध्यायविधिः.... .... ॥

End :

पूर्वाह्णे मध्यमे वापि यदि पर्व समाप्यते ।
तदोपवासः पूर्वेद्युस्तदहर्याग इष्यते ॥
आवर्तनात् परे सन्धिर्यदि तस्मिन्नुपक्रमः ।
परेद्युरिष्टिरित्येव पर्वद्वयविनिर्णयः ॥ इति ॥
सन्धिश्चेत् सङ्गवादूर्ध्वं प्राक् पर्यावर्तनाद्रवेः ।
सा पौर्णमासी विज्ञेया सद्यस्कालविधौ विधिः ॥

तथा—

आवर्तनात् प्राग् यदि पर्वसन्धिः
कृत्वा तु तस्मिन् प्रकृतिं विकृत्याः ।
तदैव यागः परतो यदि स्यात्
तस्मिन् विकृत्याः प्रकृतेः परेद्युः ॥ इति ॥

अन्यत्राधिकमनुसन्धेयम् इति संक्षेपः ।

Colophon :

इति चोलदेशाग्रपूज्यविद्वत्समाजविराजमानशहजीन्द्रपुरवास्तव्यस्य होशनिकनीटजातीयस्य विश्वामित्रगोत्रजलधिकौस्तुभस्य वाञ्छेश्वरयाजिनः कृतिषु हिरण्यकेशिसामान्यसूत्रव्याख्याने तृतीयपरिच्छेदः समाप्तिमगात् ।

शुभं भूयात् ॥

Author: Sūtras-Hiraṇyakeśi; Commentary—Vāñceśvara, a Canarese Brāhmin belonging to Tiruviśainellūr near Śrī Śahajīndrapuram.

Remarks—There is a certain class of Brāhmins who follow the rules laid down by the Sūtras

of Hiraṇyakeśin. They consist of a few families in the Tamil land and for reasons unknown, form a subordinate community. They are neither allowed to mingle, nor to enter into marital relationship with the other classes of Brāhmins. The author might possibly have been a member of that class. His great grandfather was a great scholar and poet famous by the title "Bālakavi". His heirs living at present also affirm that the author was also the recipient of that title. He was the court poet of the King of Tanjore and was removed from that place by the King owing to mischievous plots set on foot by the orthodox Vaiṣṇavites and Mādhvas. Being thus left adrift into the world again with no support at all to make both ends meet, he took to agriculture and purchased a buffalo. Owing to the systematic troubles given by the official world he stopped cultivation and composed a small kāvya "Mahīśa Śataka" in which all the officers were severely criticised under the guise of panegyrizing his buffalo. The Mahā Rāja learning all these facts, invited him to the Court and gave him many presents. All these incidents are described by Bālakavi himself in the introductory verses of his Mahiṣaśataka. The author himself states that Bālakavi was his great grand-father. Śaunaka and other Ācāryas are referred to in this work. The work is complete and consists of three *paricchedas.*

॥ स्मृतिः ॥

॥ अघदशकम् (सव्याख्यानम्) ॥

94. AGHADAŚAKAM
(with commentary).

C. O. L. No. 393.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{4}''$. Pages—9.

About 17—19 lines per page and 16—20 letters per line. Script—Devanāgarī. No. of Granthas—100.

Owner—C. O.

Subject—Description of the details of pollution arising from different circumstances.

Beginning :

मातुर्गर्भविपत्स्वघं त्रिदिवसं मासत्रयेऽतो(न्य?य)था-
मासा(नां?घं) त्रिषु सूतिकाविधिरतः स्नानं पितुः सर्वदा।
ज्ञातीनां(पत?वप)नादि जातमरणे पित्रोर्दशाहं सदा
नाम्नः प्राक् तदवैति सूतकवशाद् भ्रातुर्दशाहं परम् ॥

मातुरिति—मासत्रयपर्यन्तं गर्भविपदि मातुस्त्रिरात्रम्। चतुर्थे चतुर्दिनम्। पञ्चमे पञ्चदिनम्। षष्ठे (षष्ठ?षड्)दिनम्। अत ऊर्ध्वं दशाहं मातुरेव। चतुर्षु मासेषु पितुः स्नानमेव। पञ्चममासप्रभृति ज्ञातीनां स्नानम्। जातमरणे मातापित्रोः दशाहमघम्। स्नानदिवसात् जातमरणजननसम्भूतकवशात् स्नानदिवसपर्यन्तमेवाघम्। रात्रिशेषे द्व्यहात्। प्रभाते त्र्यहात्। दशाहात् परं मृते सोदराणां दशाहमघम्।

End:

क्षत्रे षोडश विंशतिर्विशि निशात्रिंशच्च शू(द्र?द्रे)क्रमाद्
विप्रा(द्) द्वित्रिचतुर्गुणा वयसि चेच्छूद्रे तु पञ्चाक्षरे।
युक्ता स्त्रीसुतशिष्यदासभृतकस्वाम्यादियद्बान्धवै-
र्हीनेऽल्पं लघु वा तदीयमधिके शूद्रैः समासङ्कराः॥

व्या– क्षत्र इति। गृहीतधनुषि क्षत्रिये मृते तज्जन्मनि च तत्सपिण्डानां षोडश दिनम्। गृहीतप्रतोदे वैश्ये विंशतिः। गृहीत वस्त्रद्वये शूद्रे त्रिंशत्। दन्तादूर्ध्वं धय इत्युच्यते। दन्तात्पूर्वं आप्लवः। अनन्तरमृतविप्रौ(?)विप्रोक्तेभ्यः द्विगुणं त्रिगुणं चतुर्गुणं च। चौलादूर्ध्वमपि तथैव। अकृतक्षुरकर्माणि शूद्रे पञ्चदिनम्। चौलादूर्ध्वं शूद्रस्य द्वादशाहः। अथ द्विजातीनां पन्त्यादिविषयहीनवर्णानां स्वजात्युक्तमाशौचम्। तच्च लघु भवति। हीनानामधिके सपिण्डे जाते मृते वाधिकवर्णाशौचमेव भवति। सूतमागधवैदेहीनां सङ्कराणां सपिण्डमरणे शूद्रैः समाशौचम्। चण्डालादीनां नित्याशौचित्वान्न कश्चिद्विशेषः॥ १.

Colophon:

अघदशकं सम्पूर्णम्॥

Author:

Remarks—This is a work on pollution arising out of abortion, delivery, death of Sapiṇḍas etc. It comprises ten verses on the whole.

॥ अघनिर्णयः (सव्याख्यः) ॥

95. AGHANIRṆAYA

(with commentary).

C. O. L. No. 271.

Substance—Paper. Size—$12\frac{5}{8}'' \times 8\frac{1}{4}''$. Pages—253. About 21—23 lines per page and 16—28 letters per line. Script—Devanāgarī. No. of Granthas—2500.

Owner—C. O.

Subject—Same as No. 94.

Beginning :

मुकुन्दमरविन्दाक्षमिन्दिरेशमनिन्दितम् ।
वन्द्यं वन्देय वन्दारुबृन्दारकमहीरुहम् ॥
असक्तोऽपि सदाचारश्रद्धयोत्थाप्य चोदितम् ।
विष्णुना विप्ररूपेण पुनरप्यनुशासितः ॥
उदैरयमहं विष्णोः प्रसादादघनिर्णयम् ।
तस्येदानीं यथाप्रज्ञं व्याख्यामाख्यातुमुत्सहे ॥
अत्रानुक्तदुरुक्तादि क्षन्तुमर्हन्ति साधवः ।

मात्सर्येण नहि प्रयोजनमतो निर्मत्सरा मत्कृतं
गृह्णीध्वं सुधियोऽघनिर्णयमिमं शङ्कातमोभास्करम् ।
योऽनेकस्मृतिदर्शितार्थलहरीमेको व्यनक्त्यञ्जसा
यस्मिन् सङ्ग्रहतोऽपि सन्त्यतिशया यद्धारकः पूज्यते ॥

ननु प्राचीनाशौचसङ्ग्रहस्य विद्यमानत्वात् किमर्थमयमिति चेत्—मैवम्। अतिशयस्यात्र विद्यमानत्वात्। नहि वित्तमस्तीति निधेस्त्यागः। कथं संग्रहतोऽप्यतिशयाः सन्ति। अनेकस्मृतिसारसंग्रहादिति ब्रूमः। अपि च बहुधा विशोधितोऽनुक्तिदुरुक्तिपुनरुक्तिनिरर्थकोक्तिवियुक्तो विषयव्यवस्थायुक्तोऽसङ्कीर्णः पूर्णोपदेशोऽयमघनिर्णयः। स चाशौचदशकं नाम सङ्ग्रहोऽनुक्तादिदोषविविक्तनिवासः।

End:

संग्रहरूपाश्च स्मृतीः सुतरां सम्यग् दृष्ट्वा निरूप्य ताभ्यः सारसर्वस्वमुद्धृत्य स्पष्टं प्रकरणशुद्धियुक्तं यथा भवति तथा अघनिर्णयः कृतः। तस्माच्छावसूतकाशौचतत्त्वजिज्ञासुभिरयमघनिर्णयोऽङ्गीक्रियतां स्मृतिनिबन्धनत्वादयं निर्विशङ्कैरङ्गीकार्य इत्यर्थः।

नन्वयं कियद्भिः श्लोकैः कृतः, को वाऽघनिर्णयस्य कर्तेत्यत आह—

हारीतो वेङ्कटेशाख्यः श्रुतिस्मृतिविचक्षणः।
व्यक्तं श्लोकशतेनेत्थमकरोदघनिर्णयम्॥ इति॥ स्पष्टोऽर्थः॥

Colophon:

समाप्तश्चायमघनिर्णयः।

मिथो विभिन्नस्मृतिवाक्यभङ्गै-
भयानकः किञ्चिदुदञ्चितार्थः।
ग्रन्थार्थभावो गहनो मयायं
तीर्णोऽतिकृच्छ्रादघनिर्णयाब्धिः॥

सरस्वतीवल्लभसूरिपौत्र-
श्रीरङ्गनाथार्यसुतः सुशीलः ।
यजुर्निधिर्व्याकृत वेङ्कटेशो
विष्णोः प्रसादादघनिर्णयं सः ॥

इति श्रीहारीतवंशश्रीरङ्गनाथार्यपुत्रसरस्वतीवल्लभापरनामधेयश्रीवेङ्कटेशविरचितस्मृतिसारसर्वस्वसमाख्या व्याख्या समाप्ता ।

Author—Śrī Veṅkaṭeśa *alias* Sarasvati Vallabha, son of Śrīraṅganātha.

Remarks—This work contains 100 verses and their commentary and both owe their origin to Veṅkaṭeśa.

॥ अघविवेचनम् ॥

96. AGHAVIVECANAM.

C. O. L. No. 392.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{4}''$. Pages—12. About 17—19 lines per page and 16—20 letters per line. Script—Devanāgarī. No. of Granthas—150. Incomplete.

Owner—C. O.

Subject—Same as No. 94.

Beginning:

बहुस्मृतीः समालोच्य सकलानपि संग्रहान् ।
क्रियते बालबोधार्थं वाक्यैरघविवेचनम् ॥

चतुर्षु मासेषु गर्भस्रावे पितुः स्नानमात्रम् । सहजातानां तदपि न । पञ्चमषष्ठयोस्तत्पाते पितुर्ज्ञातीनां च स्नानतः शुद्धिः । अत्रैव कठिनस्य पाते द्वयोरपि त्र्यहमाशौचम् ।

End:

तथा नैव क्रियाद्रव्येष्वतीते त्रिदिनाद्यघम् ।
त्रिरात्रं त्रिषु मासेषु पक्षिण्येव ततस्त्रिषु ॥
इत्यादिनोक्तम्
मातामहस्य श्वश्र्वादेर्मातुलस्य पितृष्वसुः ।
मातृष्वसुर्भगिन्याश्च दुहितुश्च त्रिरात्रकम् ॥
आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं तु नारीणामवप्रसव उच्यते ॥

Colophon:

Author:

Remarks—This work also deals with pollution consequent on abortion etc.

॥ अघसंग्रहः (सव्याख्यः) ॥

97. AGHASAṄGRAHA
(with commentary).

C. O. L. No. 394.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{4}''$. Pages—23. About 17—19 lines per page and 16—20 letters per line. Script—Devanāgarī. No. of Granthas—250.

Owner—C. O.

Subject—Same as No. 94.

Beginning:

प्रणमामि शिवं साम्बं महागणपतिं गुहम् ।
श्रीमज्ज्ञानेन्द्रयोगीन्द्रगुरून् स्वाभीष्टसिद्धये ॥
व्याख्यानसहिताशौचशतकं वीक्ष्य तत्क्रमम् ।
संगृह्यते तत्प्रमेयं स्पष्टः श्लोकश्च कुत्रचित् ॥

व्या—अघं नाम पिण्डदानादिनिमित्तं पुरुषस्थं कर्मानर्हत्वं कालस्नानापनोद्यम् । तद्द्विधं शावं सूतकं च । तत्र कर्माणि त्याज्यानि । कतिचिद्द्रव्याणि स्वामिद्वारा दूष्यन्ते । स्वाध्यायमन्त्रजपाश्च निषिध्यन्ते । साध्यं कर्म स्वयमग्निहोत्रं चान्याभावे कार्यम् । प्रेतकर्मणि च इदं सर्वमाप्लुतः कुर्यात् । औपासनं त्यजेत् । अन्येन कारयेत् । अघात्प्रागुद्धृतद्रव्येण । श्रोत्रियगृहादि तद्द्रव्येण वा । वैश्वदेवहोमादि न कुर्यात् । न कारयेच्च ।

End:

पञ्चाब्दिकं तु शूद्राणां स्वजात्युक्तमतः परम् ।
आमौञ्जीबन्धनाद्विप्रं क्षत्रियश्च धनुर्ग्रहात् ॥
अप्रेतादग्रहाद्वैश्यः शूद्रो वस्त्रद्वयं ग्रहात् ।
स्मृतिद्वैधे परोक्षेऽल्पं प्रत्यक्षे गुर्विति स्थितिः ॥

व्या—तथाहि योनिसम्बन्धेष्वहर्विधिरसन्निधौ ।
याज्यादौ श्वशुरादौ च शिष्यादौ पक्षिणी विधिः ॥ इति ॥
आचार्यपत्नीपुत्रयोर्मृतौ दिनमघमुक्तं मन्दप्रतिपत्तिविषयम् । कालान्तरविदेशस्थविषयं वा ।

"अघान्ते सङ्गत्रे स्नात्वा विप्रः स्पृष्ट्वाम्बु शुध्यति ।
नृपादिर्वाहनादीनि नान्यथेत्यब्रवीन्मनुः" ॥
नृपो वाहनं वैश्यः प्रेतोदं शूद्रो यष्टिं स्पृष्ट्वा शुध्यति ।
"एकत्र सुखबोधार्थं सुसमीक्ष्य बहुस्मृतीः ।
कृतोऽघनिर्णयः स्पष्टं गृह्यतां तद्बुभुत्सुभिः ॥"

Colophon :

व्यक्तं श्लोकशतेनेत्थमकरोदघनिर्णयम् ।
श्रीचोलदेशपूर्वेश्याः कुम्भकोणाच्च दक्षिणे ॥
योजनान्तस्ततो ग्रामः पट्टमित्यस्ति तद्गतः ॥
काश्यपान्वयवाधीन्दुः श्रीमत्कृष्णार्यसम्भवः ।
महागणपतिर्धीमानकार्षीदघसंग्रहम् ॥
अघसङ्ग्रहं समाप्तम्? ।

Author—Mahāgaṇapati, son of Kṛṣṇārya belonging to the village of Paṭṭam, south of Kumbhakoṇam.

Remarks—This work is an abridgment of Āśaucaśataka.

॥ अघसंग्रहविवरणम् ॥

No. 98. AGHASAṄGRAHAVIVARAṆAM.

C. O. L. No. 2029.

Substance—Palm leaf. Size—15″ × 1¼″. Leaves—21. About 6 lines per page and 44 letters per line. Script—Grantha. No. of Granthas—350. Complete.

Owner—Śakti Śastrial, Āyikkudi.

Subject—Same as No. 94.

Beginning:

.... रनाथमभयाम्बिकया समेत-

मागस्त्यसैकतगणेश्वरषण्मुखाभ्याम् ।

अन्तर्विभाव्य(च) गुरून् ... . णोम्यघानां

श्रीवैद्यनाथकृतसंग्रहणं मृदूक्त्या ॥

ज्येष्ठैः पितृव्यतनयैर्विवृतोऽप्यसौ ....

रामचन्द्रविबुधैरवधानिसाग्नेः ।

मूलप्रतीकविवृतिस्थपदाविवेक—

बालप्रबोधकत .... फलः प्रयासः ॥

इह वैदिकहिताय चिकीर्षि(त)ग्रन्थनिर्वर्तकं चन्द्रकलावतंस-स्फुरणमाचर...ग्रन्थे प्रेक्षावत्प्रवृत्तिसिद्ध्यर्थं विषयप्रयोजनाधिकारिसम्बन्धान् दर्शयिष्यन् .... गन्तसुधाख्यं चिकीर्षन् ग्रन्थं शिष्यावधानाय प्रतिजानीते कलानिधिरिति ।

... ... कौशिकवंशवार्धेः

श्रीविश्वनाथो विबुधो मथित्वा ।

धीमन्थरेण स्मृतिदुग्धसिन्धुं

ददाति सि .... धां बुधेभ्यः ॥

कला चन्द्रकला निधीयतेऽस्मिन्नवतंसरूपेणेति व्युत्पत्त्या चन्द्र-कलावतंसस्मरण........ मङ्गलमप्यादावनुष्ठितमिति सूचयितुमादौ कलानिधिपदप्रयोगः ।

End:

क्रियादूषितविषयेऽपि सद्यः शुद्धिमाह—पाषण्डेति

"पाषण्डषण्डौ पतिताभिशस्तौ
स्वैरिण्य इत्यादिजनान् धरायाम् ।
उद्बन्धनाम्बुज्वलनप्रवेश-
विषादनाद्यैर्मरणेऽपि बद्धः ॥"

अस्यार्थः— वेदविद्वेषी षण्डः पतितः अभिशस्तः व्यभिचारिणी इज्यादिकर्मत्यागी निन्दिताचारनिरतः उद्बन्धनकृतः अम्बुकृतः वह्निकृतः विषप्रयोगकृतः शस्त्रकृत इत्यादिजनविषये सत्संबन्धिजनानां स्नानतः शुद्धिरिति ।

Colophon :

श्लोकैः षट्षष्टिसंख्यैर्मधुमधुरपदै
र्वैद्यनाथः सभेदं
व्याचख्यौ साधुतुष्ट्यै विवरणमफलं
यद्यपि स्यात्तथापि
प्रत्यक्षस्यापि भानोः प्रतिकृतिविधिवत्
प्रस्तराद्यैर्जनानाम्
युक्तं व्याख्यानमस्याप्यसदृशमवदद्
दाह ... म्य ज्ञनो(?) मे ॥

Author—Rāmacandra Dīkṣitar.

Remarks—One Vaidyanātha of Kauśikagotra is referred to in the colophon, probably the author of Aghasaṅgraha. It is seen from the introductory verses that Rāmachandra Dīkṣitar's paternal cousin has also written a commentary on Aghasaṅgraha.

The opening verse in the text mentions one Viśvanātha.

॥ आचारनवनीतम् ॥

No. 99. ĀCĀRANAVANĪTAM.

C. O. L. No. 775.

Substance—Paper. Size—11″ × 8½″. Pages—212. About 20 lines per page and 25 letters per line. Script—Devanāgarī. No. of Granthas—3312. Complete.

Owner—C. O.

Subject—The customs in connection with the bridal ceremony etc.

Beginning :

एवं तावत् (तद्?) ब्राह्मणानामाह्निकं कर्मजातं संक्षिप्याभिहितम् । तच्च गृहस्थानामेव । ब्रह्मचारिणां प्रकारप्राप्तं शौचाचाराचमनसन्ध्योपासनगायत्रीजपब्रह्मयज्ञादिकं सर्वसाधारणत्वेनाभिहितम् । वानप्रस्थाश्रमस्य कलौ निषेधात् तन्न परामृश्यते । क्षत्रियवैश्ययोर्जातिमात्रव्यवहारेण वर्णधर्मनिषेधाद् ब्राह्मणाः शूद्राश्चेति कलौ वर्णद्वयस्योपदेशात् क्षत्रियवैश्यधर्मा अपि न सम्यक् परामृश्यन्ते । शूद्राणां तु सच्छूद्रलक्षणलक्षितानामभावा "न शूद्राय मतिं दद्यात्" "न चास्योपदिशेद्धर्ममि"ति मनुना ज्ञानदानधर्मोपदेशानां निषेधात् ।

कुर्वन्नगम्यागमनं.... .... ।
... ... दूरतः परिवर्जयेत् ॥

इत्यादिभिर्वचनैः मन्त्राधिकाराभावात् ।

End:

इदमेव फलं गर्भाधानादिचत्वारिंशत्संस्कारसंस्कृतस्यात्मगुणा-ष्टकवतो नित्यानि नैमित्तिकानि च विहितानि फलाभिसन्धिरा-हित्येन यथासंभवं कुर्वतः प्रमादात् कृतानां पापानामपि यथा-शास्त्रं रहस्ये रहस्यानि प्रकाशे प्रकाशानि विहितानि प्रायश्चित्तानि कुर्वतः ऋणत्रयापकरणानन्तरं संन्यासाश्रमे वा जीवन्मुक्ततया वा यावद्विदेहमुक्तिकालमुक्तरीत्या वसतः पुरुषधौरेयस्येत्यलं विस्तरेण ।

Colophon:

धर्मशास्त्रसुधासिन्धोरप्पाध्वरिसमुद्धृते ।
आचारनवनीतेऽस्मिन् संन्यासविधिरुत्तमः ॥

Author—Appādvari (Appayya Dīkṣita).

Remarks—The opening lines of the Ms. and those at the conclusion indicate the loss of a few lines. The 24 purificatory rites commencing from conception are elaborately discussed with confirmatory citations.

॥ आशौचचिन्तामणिः ॥

No. 100. ĀŚAUCACINTĀMAṆI.

C. O. L. No. 74.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—44. About 8 lines per page and 33 letters per line.

Script—Malayāḷam. No. of Granthas—750.

Owner—Tekkedattu Bhaṭṭatiri, Udayamperūr,

Subject—Same as No. 94.

Beginning:

श्री हरिः ।

नमामि निलयक्रोडनिलयं नीललोहितम् ।
अम्बां गिरीन्द्रानिलयामम्बिकामपि सादरम् ॥

ആശൗചചിന്താമണിസംജ്ഞകമായിരിപ്പോരു പ്രബന്ധത്തെ ചമപ്പാൻ തുടങ്ങുന്നേടത്തു് ഗ്രന്ഥകാരകൻ അതിൻെറ അവിഘ്നപരിസമാപ്ത്യാദിസിദ്ധിക്കായിക്കൊണ്ടു സ്വാഭീഷ്ടദേവതാനമസ്കാരപൂർവ്വകമാകുംവണ്ണം അഭിമതത്തെ പ്രാർത്ഥിക്കുന്നു ആദിശ്ലോകംകൊണ്ടു്—

गणेशवाणीगुरुदक्षिणेशान्
वन्दे दयाऽब्धीन् वरदानशीलान् ।
जन्मादिमूलानि निरस्य चाघा-
न्यमी दिशन्त्वाशु ममात्मशुद्धिम् ॥

अहं दयाऽब्धीन् वरदानशीलान् गणेशवाणीगुरुदक्षिणेशान् वन्दे എന്നു മുമ്പിലത്തെ അന്വയം. ദയാസമുദ്രങ്ങളായി വരദാനം തന്നെ ശീലമായുള്ള ഗണേശവാണീഗുരുദക്ഷിണേശന്മാരെ വന്ദിക്കുന്നേൻ. ദക്ഷിണേശൻ=ദക്ഷിണാമൂർത്തി. अमी मम जन्मादिमूलानि अघानि निरस्य आशु आत्मशुद्धिं दिशन्तु च

ഇവർ എൻെറ ജന്മാദിമൂലങ്ങളും ജനനമരണഹേതുക്കളായിരിക്കുന്ന പാപങ്ങളെ സംഹരിച്ചു് പൊട്ടുന്നനവെ അന്തഃകരണശ്ശുദ്ധിയെ വരുത്തി പരമാർത്ഥത്തെ തോന്നിച്ചരുളേണമേ, എന്നേ സാമാന്യതഃ ഉള്ള അർത്ഥം.

आशौचमघशब्देन प्रोक्तमत्र विशारदैः എന്നു വചനമുണ്ടാകയാൽ അഘശബ്ദം കൊണ്ടു് അശൗചത്തെ കൂടെ ഗ്രഹിക്കുന്നു. എന്നാൽ ഇവിടെ ജനനമരണാദിനിമിത്തങ്ങളായിരിക്കുന്ന അശൗചങ്ങളുടെ കാലവ്യവസ്ഥയും അശുദ്ധിവിശേഷങ്ങളെയും അതതിനെ പോക്കി ആത്മശുദ്ധിവരുത്തേണ്ടും പ്രകാരത്തെയും മററുള്ളവക്കു യഥാവലെ അറിവാൻതക്കവണ്ണമുള്ള പദപദാൎത്ഥരചനാകൌശലങ്ങളെ നമുക്കു് അനുഗ്രഹിച്ചു് അവിഘ്നപരിസമാപ്ത്യാദിപ്രയോജനങ്ങളേയും അനുഗ്രഹിച്ചരുളേണമേ എന്നിവിടേയ്ക്കു വിശേഷിച്ചുള്ള അഭിപ്രായം. ഇവിടെ നടേ ചാതുർവർണ്ണ്യന്മാരുടെ അശൌചകാലവ്യവസ്ഥ ചൊല്ലുന്നു.

End:

അഗ്നിഹോത്രിക്കു് മാതാപിതാക്കന്മാരെ ഒഴിച്ചു മററാരുത്തരേയും സംസ്കരിക്കരുതു്. അവക്കു് ഉദകക്രിയാദിചെയ്യാം. ഒരു പുലയിലും ആഹിതാഗ്നിക്കു രണ്ടു സന്ധ്യകളിലും അശുദ്ധിയില്ലാ. പുലയിലെ പോലെ കുളിച്ചുൎത്ത പിന്നെ മന്ത്രസ്നാനം ചെയ്താൽ അഗ്നിഹോത്രം വേൾപ്പാൻ മററാരു് ആളുമില്ലെങ്കിൽ അഗ്നിഹോത്രം വേൾക്കാം. അവിടെ അഗ്നിഹോത്രോപസ്ഥാനവും അഗ്നിഹോത്രം വേളിയും കഴിഞ്ഞുകൂട്ടുമ്പോൾ തന്നെ പുലയുണ്ടാകയും ചെയ്യും. പിന്നെ തൊട്ടുപോകിൽ പുനരാധാനം ചെയ്യേണ്ടിവരും എന്നല്ലോ ചൊല്ലുന്നു. **इह सर्वाघेऽपि अग्निहोत्री सन्ध्ययोः स्नात्वा आपदाविक्षिप्य पुनः मनुना आप्लुत्य च अग्निहोत्रादितहवनविधौ (सन्ध्ययोःशुद्धः)स्यात् इति शेषः। अथ स अघी अघी स्यात्।** ഇവിടെയെല്ലാ പുലയിലും സന്ധ്യകളിൽ അഗ്നിഹോത്രി കുളിച്ചുൎത്ത പത്തന്തിതൊഴുതു മന്ത്രസ്നാനം ചെയ്താൽ അഗ്നിഹോത്രാദിതഹവനവിഷയം ശുദ്ധനായി

ചമയും. പിന്നെ തദവസാനാനന്തരം തന്നെ അശുദ്ധനായിട്ടും ഭവിക്കും. മുമ്പിലത്തെക്കുളിയും ഊക്കയും പത്തന്തിതൊഴുകയും പിലയിലെപോലെതന്നെ. പിന്നെ മന്ത്രസ്നാനാനന്തരം അഗ്നിഹോത്രം വേളികഴിവോളവും പിലയില്ലാ. അതു കഴിയുമ്പോൾ തന്നെ പിലയുണ്ടാകയും ചെയ്യും. പിന്നെ അന്തിമൂടിക്ക പിലയിലെപോലെതന്നെ എന്നു താല്പര്യം.

Colophon:

गोविन्देन लिखितमिदं पुस्तकम् ।

കൊല്ലം ൧൦൭൭-ാമതു കന്നിമാസം ൧൭-ാംനു സോമവാരം അന്നു എഴുതിതീൎന്നു. ശുഭമസ്തു.

Author:

Remarks—This Ms. stipulates the period of pollution and purification resulting from birth, death etc. relating Brāhmins, and Kṣatriyas as well as that pertaining to the performance of Agnihotras. The textual portion alone has been re-written in the wake of the colophon and this comes to a close with:

'शुभमस्तु श्रीगुरुभ्यो नमः'

॥ आशौचदीपकम् (चन्द्रिकोपेतम्)

No. 101. ĀŚAUCADĪPAKAM

(with the commentary Candrikā.)

C. O. L. No. 1932.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—122. 16 lines per page and 48 letters per line.

Script—Malayāḷam. No. of Granthas—2928. Complete.

Owner—N. Govindan Potti, Putumana Maṭham, Haripād.

Subject—Same as No. 94.

Beginning:

योगीश्वरं च मन्वादीन् प्रणिपत्य सुरेश्वरम् ।
अशौचदीपकव्याख्यां करोम्याशौचचन्द्रिकाम् ॥

(व्याख्या) तत्र तावदयमाचार्यः प्रारिप्सितस्य प्रबन्धस्याविघ्नपरिसमाप्त्यादिप्रयोजनसिद्धये अनुबन्धचतुष्टयगर्भं मङ्गलाचरणं करोति ।

मू—यतो वा जन्मास्य स्फुरति च यतो वा तदितरद्
द्वयेनाप्येतेन प्रकटितनिदानाघमखिलम् ।
व्यतीयास्ते शुद्धो निरघ इव तस्यावगमना-
दुपासे तत्त्वं प्रशमितविकल्पं विदमिदम् ॥

व्या— यतो वेति । तदिदं तत्त्वमुपासे इति सम्बन्धः । यस्मादस्य जगतो जन्म भवति , यत्र च लयो भवति , यत्परिज्ञानात् संसारानुमितं पापं निस्तीर्य मुक्तो भवति । तद् ब्रह्म ध्येयमिति वाक्यार्थः । अत्र अघशब्देन आशौचमपि गृह्यते । "आशौचमघशब्देन प्रोक्तमत्र विशारदैः" इति वचनात् .....

End:

वर्णसङ्करे विशेषः स्मृत्यन्तरे प्रोक्तः । क्षत्रियविट्शूद्रादयः ....स्य विप्रस्य बान्धवाः तेषामाशौचे विप्रस्य

दशाहं सूतकं भवेत् इति । अत्र मस्करीयम्—विप्रस्याशौचे प्राप्ते तेषां दशाहमेवेति तत्रार्थः । तथा च मनुरपि—

सर्वे तूत्तमवर्णानामाशौचं कुर्युरादृताः ।
तद्वर्णविधिदृष्टेन स्वस्याशौचं स्वयोनिषु ॥

इति । इदानीं क्षत्रियायामुत्पन्नाः क्षत्रिया न सन्ति । तथा वैश्याः शूद्राश्च । अतो वर्णसङ्करे सर्वत्र स्वकुलाचारत आशौचविधिः । न च ब्राह्मणाः सङ्करजाताः । अतो ब्राह्मणविषयस्याशौचस्यैव व्यवस्था । अत एव तदेवात्र प्राधान्येनोक्तः । तथा च सहस्रस्वामी—

" इदानीमन्यवर्णानां स्वरूपापरिनिश्चयात् ।
अस्माकं ब्राह्मणाशौचव्यवस्थाविषयश्रमः ॥ "

Colophon :

पुरुवनसंज्ञे ग्रामे जातेनाशौचदीपिका रचिता ।
तद्वृत्तिस्तत्रत्यैनैवैषाशौचचन्द्रिका प्रोक्ता ।
इत्याशौचदीपकमाशौचचन्द्रिका समाप्ता ।

Author—A native of Puruvanagrāma.

Remarks—This is an authoritative treatise on *āsauca* observed in Keraḷa. The *ācāras* to be observed in regard to यमलजननम् and those to be given up in Kali age are enumerated in elegant style. The native place of the author Puruvana may be identical with Perumanam near Trichur in Cochin State. It is probable that Mazhamaṅgalam might have been one of

the ancient *Illams* in that village as is corroborated by the old men of the place even at present. If this surmise is correct the author was a literary connoisseur as proved by the famous work "Mazhamangala Bhāṇa".

॥ आशौचदीपकव्याख्या ॥

No. 102. AŚAUCADĪPAKAVYĀKHYĀ.

C. O. L. No. 1729.

Substance—Palm leaf. Size—11″ × 2″. Leaves—89. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—160. Complete.

Owner—Śaṅkaran Nārāyaṇan Eḷayatu, Naduvile-Pakuti, Vaikam.

Subject—Same as No. 94.

Beginning:

वन्दे गुरूणां चरणारविन्दं
वन्दारुलोकाभिमतार्थकन्दम् ।
येषां कृपालेशसुधाभिषेका-
देषा ममोदञ्चति सूक्तिवल्ली ॥

प्रीत्यै सतां मद्दिषमङ्गलनाम्नि गेहे
जातेन भूसुरवरेण पुरा कृतं यत् ।
आशौचदीपकमिदं विवरीतुमद्य
श्रीकोटिलिङ्गनिलयो नृपतिः समीहे ॥

नाहं पाण्डित्यगर्वेण व्याख्यां कर्तुं समुद्यतः ।
किन्तु द्विजानां केषाञ्चित् साफल्यं कर्तुमर्थनाम् ॥
प्रसीदन्तु ततः सर्वे भूसुराश्च सुराश्च मे ।
देवद्विजार्चिता देवी शर्वजा च प्रसीदतु ॥

तत्र तावदयमाचार्यः प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिसिद्ध्यर्थमनुबन्धचतुष्टयगर्भं मङ्गलमाचरति ।

यतो वा जन्मास्य स्फुरति च यतो वा तदितरद्
द्वयेनाप्येतेन प्रकटितनिदानाद्यमखिलम् ।
व्यतीयास्ते शुद्धे निरघ इव यस्यावगमना-
दुपासे तत्तत्त्वं प्रशमितविकल्पं विदमिदम् ॥

अत्र श्लोके यच्छब्दघटितानि त्रीणि वाक्यानि । तेषां त्रयाणामपि प्रतिद्वन्द्वीभूतं तच्छब्दघटितमेकमेव वाक्यम् । तत्र प्रथमं यच्छब्दघटितानि वाक्यानि व्याख्यायान्ते (ततः?) प्रधानभूतं तच्छब्दघटितं वाक्यं व्याख्यायते । यतः अस्य जन्म स्फुरतीत्यन्वयः । यतः यस्माद् ब्रह्मणः । अव्ययानामनेकार्थत्वाद् वाशब्द एवकारार्थे । यस्मादेवेत्यर्थः । अस्य प्रपञ्चस्य जन्म जननं स्फुरति प्रकाशते । अन्वयव्यतिरेकाभ्यां ब्रह्मण एव जगत्कर्तृत्वं निश्चितमिति भावः ।

End :

अन्तःपात्याशौचविचारे च बहवः सन्देहाः सम्भवन्ति । ते सर्वेऽपि समाहितया बुद्ध्या युक्तियुक्तं विचार्य निवर्तनीयाः । आशौचत्रयसम्पातेऽपि आशौचद्वयसम्पातवदेव न्यायो द्रष्टव्यः । तत्र प्रथमतृतीययोर्गुरुलघुता विचार्या । ब्रह्मचारिणः पित्रोर्मरणे तस्योदकदानादिकाले आशौचवत्त्वादुक्तवदेव त्रिरात्रादि-

परिपूर्तिर्बोध्या । ब्रह्मचारिण आशौचाभावेऽपि उदकदानादि-
काले आशौचमस्त्येव । तथा चोक्तम्—

"ब्रह्मचारी यदा कुर्यात् पिण्डनिर्वपणं पितुः ।"

तावत्कालमाशौचं स्यात् । ततः स्नात्वा विशुध्यतीति ।
अत्र पितृशब्देन मातापि गृह्यते । इति सर्वं समञ्जसम् ।

Colophon :

एवं मया विरचितं भूसुराणामपेक्षया ।
आशौचदीपकग्रन्थस्यैकदेशविवेचनम् ॥

अनुक्तं च दुरुक्तं च यदि स्यादत्र किञ्चन ।
विमृश्य सर्वं विद्वद्भिः ... वर्य्य विशोध्यताम् ॥

आशौचविधिपर्यन्तमेव कार्यं विवेचनम् ।
इत्येव भूसुरापेक्षा तदेतावद्विवेचितम् ॥

यस्याः प्रसादलेशेन मयैतावद्विवेचितम् ।
अपि मन्दधिया देवी सा भूयोऽपि प्रसीदतु ॥

गुरुनिकरकटाक्षापेक्षया स्वेच्छया वा
करणकलितकामाद्याधिना व्याधिना वा ।
कमलनयनकान्ताचिन्तयानन्तया वा
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

इति कोटिलिङ्गाधिपकृता आशौचव्याख्या समाप्ता ।

Author—Rāja of Koḍuṅgallūr (Koṭiliṅgapura).

Remarks—The introductory verses of this work establish the presumption made in the remarks column on the *Candrikā* commentary

that Malamaṅgalam Nampūri was the author of the original treatise.

॥ आशौचदीपकव्याख्या ॥

No. 103. ĀŚAUCADĪPAKAVYĀKHYĀ.

C. O. L. No. 259.

Substance—Paper. Size—$11\frac{1}{8}'' \times 8\frac{7}{8}''$. Pages—116. About 20 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—1450.

Owner—C. O.

Subject—Same as No. 94.

Beginning—End—Colophon—Author—Remarks: Same as No. 102.

॥ आशौचदीपिका ॥

No. 104. ĀŚAUCADĪPIKĀ.

C. O. L. No. 68.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—263. About 19 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—3450.

Owner—C. O.

Subject—Same as No. 94.

Beginning—Same as No. 101.

End:

आशौचदीपकमिदं रचितं विमन्त्र्य
तत्तत्स्मृतीरपि तथापि च देशकालौ ।
आलोच्य तत्सभयपण्डितवैदिकाना-
मत्रानुसृत्य च मतं विदधातु सर्वम् ॥ इति ॥
स्पष्टोऽर्थः । अथैतत्प्रयोजननिर्देशपूर्वकमुपसंहरति—
......स्मृता मुनिवरैर्विमलार्थदुग्धं
दुग्ध्वा विमथ्य हृदये च समुद्धृतं यत् ।
आशौचदीपकमिदं नवनीतकल्पं
प्रीत्यै भवेत् सुमनसामनुरक्तये च ॥ इति ॥
स्पष्टोऽर्थः

Colophon:

* * * *

बुद्ध्यालये सुजातेन हरिगीते सुसम्मिते ।
दामोदरेण रक्षार्थं लिखितं पुस्तकं वरम् ॥
॥ श्रीः ॥

Author—Same as No. 101.

Remarks—The work is known as Āśaucadīpakam and Āśaucadīpikā.

॥ आशौचदीपिका ॥

No. 105 A. ĀŚAUCADĪPIKĀ.

C. O. L. No. 198 A.

Substance—Paper. Size—$11\frac{1}{2}'' \times 8\frac{7}{8}''$. Pages—213. About 20 lines per page and 22 letters per

line. Script—Malayāḷam. No. of Granthas —2800.

Owner—C. O.

Subject—Same as No. 94.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

ആശൗചദീപികയെ ചമപ്പാൻതുടങ്ങുന്ന ആചാൎയ്യൻ അതിന്റെ അവിഘ്നപരിസമാപ്തിക്കും പ്രയോജനസിദ്ധിക്കും ആയിട്ടു ശിഷ്ടാചാരത്തെ അനുസരിച്ചുനിന്നു വസ്തുനിർദ്ദേശ ഗർഭമാംവണ്ണം മംഗലാചരണത്തെ ചെയ്യുന്നു.

यतो वा जन्मास्य स्फुरति च यतो वा तदितरद्
द्वयेनाप्येतेन प्रकटितनिदानाघमखिलम् ।
व्यतीयास्ते शुद्धो निरघ इह यस्यावगमना-
दुपासे तत्त्वं प्रशमितविकल्पं विदामिदम् ॥

ഇതി.തദിദം തത്വമുപാസേ. ആ ഈ തത്വത്തെ ഉപാസിക്കിന്നേൻ. യതഃ അസ്യ ജന്മ സ്ഫുരതി വാ. യതഃ തദിതരത് സ്ഫുരതിവാ- യാതൊരു തത്വത്തിങ്കൽ നിന്നു ഈ പ്രപഞ്ചത്തിന്റെ ജന്മം ഭവിക്കുന്നു. യാതൊന്നിങ്കൽ പിന്നെ ഇതിന്റെ നാശവും സംഭവിക്കുന്നു. ഇഹ യസ്യ അവഗമനാത് ദ്വയേനാപി ഏതേന പ്രകടിതനിദാ(നാ)ഘം അഖിലം വ്യതീയ ശുദ്ധഃ നിരഘഃ ആസ്തേ. ഇവിടെ യാതൊന്നിന്റെ അവഗമനം ഹേതുവായിട്ടു് ഈ ജനനമരണങ്ങൾ രണ്ടിനെ കൊണ്ടും അനുഭവിക്കപ്പെട്ടു് ഒട്ടൊഴിയാതെയുള്ള അഘത്തെ

കടന്നു് ശുദ്ധനായി വരുന്നു. ആ ഈ തത്വത്തെ ഉപാസിക്കു ന്നേൻ എന്നും മുമ്പിലത്തേതിനോട്ടു് സംബന്ധം. പ്രശമിതവി കല്പം അങ്ങിനെ ഇരുന്നു. തത്വം പ്രശമിതമാകുന്ന വികല്പ ത്തോടുകൂടിയിരുന്നു. സംശയരഹിതമായിരുന്നു എന്നു പൊ രുൾ. വിദം=അങ്ങിനെയുമിരുന്നു. വിത്സ്വരൂപമായിരിക്കുന്നു. ആശൗചമംഘശബ്ദേന പ്രോക്തമത്രവിശാരദൈഃ എന്നുണ്ടാ കയാൽ അംഘം അശൗചം അവ്വണ്ണം ശബ്ദയോജന ചെയ്യു മ്പോൾ അശൗചരൂപം വിഷയമായിട്ടു് ഒരു പ്രബന്ധത്തെ ചമയ്ക്കുന്നുമുണ്ടു് എന്നു പൊരുൾകൊള്ളാം.

End:

आशौचदीपकमिदं रचितं विमृश्य
तत्तत्स्मृतीरपि तथापिच देशकालौ ।
आलोच्य तत्समयपण्डितवैदिकाना-
मत्रानुसृत्य च मतं विदधातु सर्वम् ॥

तत्तत्स्मृतीरपि विमृश्य आशौचदीपकं रचितम् । तथापि देशकालौ आलोच्य तत्समयपण्डितानां मतं च अनुसृत्य अत्र सर्वं विदधातु ।

പല സ്മൃതികളേയും ശ്രുതികളേയും നിരൂപിച്ചു കണ്ടി ട്ടത്രേ ഈ അശൗചദീപകം ചമയ്ക്കപ്പെട്ടു എന്നിരിക്കുന്നതാ കിലും ദേശകാലങ്ങളേയുമോൎത്തു് അക്കാലത്തു് പണ്ഡിതന്മാ രായിരിക്കുന്ന വൈദികന്മാരുടെ മതത്തേയും അനുസരിച്ചേ ഇതിൽ ചൊല്ലിയവണ്ണം അനുഷ്ഠിക്കാവൂ. അനന്തരം ഈ ഗ്രന്ഥത്തെ ചമച്ചുടത്തെ പ്രയോജനത്തെ ചൊല്ലുന്നൊരുത്ത നായിട്ടു് ഉപസംഹരിക്കുന്നു.

गास्ताः स्मृता मुनिवरैर्विमलार्थदुग्धं
दुग्ध्वा विमथ्य हृदयेन समुद्धृतं यत् ।

अशौचदीपकमिदं नवनीतकल्पं
प्रीत्यै भवेत् सुमनसामघनुत्तये च ॥

विमलार्थदुग्धं दुग्ध्वा ताः मुनिवरैः स्मृता गा हृदयेन विमथ्य समुद्धृतं यदिदं आशौचदी(पं? पकं) नवनीतकल्पं तदिदं सुमनसां प्रीत्यै अघनुत्तये च भवेत् ।

നല്ലാ ചില അൎത്ഥമാകുന്ന ക്ഷീരത്തെ കറന്നു മുനിശ്രേഷ്ഠന്മാരാൽ സ്മൃതകളായിരിക്കുന്ന വാക്കുകളെ ഹൃദയംകൊണ്ടു് മഥനം ചെയ്തു് എടുത്തിരിക്കയാൽ വെണ്ണപോലെ പൂത്തനായിരിക്കുന്ന ഈ അശൗചദീപകം സജ്ജനത്തിനു സന്തോഷത്തിനായ്ക്കൊണ്ടും പുല അറിഞ്ഞു പോക്കുവാനായ്ക്കൊണ്ടും പാപക്ഷയത്തിനായ്ക്കൊണ്ടും ഭവിപ്പൂതാക.

Colophon :

स्मृते यत्र जगन्नाथे सर्वानिष्टविचिन्तनम् ।
मङ्गलाय भवेन्नित्यं तस्मै श्रीपतये नमः ॥ १५६ ॥
इत्थं स्यात् परमेश्वरेण निखिलं त्वाशौचदीपात्मकं
श्रीमच्छ्रीगुरुमाधवादिमगुरून्नत्वा विलिख्याधुना ।
लाजाङ्गे धनसेव्यनुत्कलिदिनेऽथाभूत् समाप्तं क्रमा-
न्नन्दीतीरसमीपगेन पुरुदावग्रामजेनाञ्जसा ॥

... ...

... ...

नारायणलिखितमिदं पुस्तकम् ।

Author—A native of Perumanam, Cochin State.

Remarks—Just after the colophon Nārāyaṇabalikrama is described in two different ways. Its beginning and close are appended.

Beginning:

नारायणं नमस्कृत्य नारायणबलिक्रमः ।
लिख्यते तत्र देवो मे मङ्गलं प्रदिशत्वसौ ।
सञ्जयो वपनं स्नानं वस्त्रशुद्धिर्जलाप्लवः ।
पुण्याहकृत्यगव्याशनोपवासा इति क्रमात् ॥

End:

इमं मे वरुण तत्त्वायामि त्वन्नो अग्ने स त्वन्नो अग्ने त्वमग्ने अयासि प्राजापत इत इमं जीवेम इष्टेभ्योष्टौ यतसपंस्त्विदा (?) आभि-र्गीभिः अनाज्ञातं पुरुषसम्मितः यत्पाक- ... ...

... ...

सर्वेषामघनुत्तयेऽत्र पुरुदावग्रामजेनादरा-
शौचाभिधदीपकं रचितवान् (?)ध्वान्ते प्रदीपं यथा ॥—

Several mistakes are found in these *Mantras*. The chronogram "लाजांगेधनसेव्यनुत्" discloses the date of composition, (4680 Kali era) 754 M. E. The Āśaucadīpikā commented upon by Koṭiliṅga Bhūpa and the one under reference are identical. But different readings are met with. The reading "प्रीत्यै भवेत् सुमनसामनुरक्तये च" in the 164th verse has been accepted by Āśaucacandrikākāra but here it is otherwise. The commentary on Āśaucadīpikā is also included in this Ms. and is catalogued as No. 105 B.

॥ आशौचदीपिकाव्याख्यानम् ॥

No. 105 B. ĀŚAUCADĪPIKĀVYĀKHYĀNAM.

C. O. L. No. 198 B.

Substance—Paper. Size—11″ × 8⅞″. Pages—80. About 22 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—1300. Incomplete.

Owner—C. O.
Subject—Same as No. 94.
Beginning—Same as 105 A.

End:

वर्णी पिण्डस्य कर्ता यदि निजपितरौ वर्जयित्वा परेषां
नो दद्यादम्बुपिण्डे दशदिनविहिते दापयेत्तं परेण ।
पित्रोः कुर्याच्च तत्कर्मणि परमघमन्यालये भुक्तिमम्बु-
क्षेपं स्नात्वैव कुर्यात् सहमनु निखिलं कर्म नित्यं विदध्यात् ॥इति॥

വൎണ്ണീ പിണ്ഡസ്യ കൎത്താ യദി നിജപിതരൗ വൎജ്ജയിത്വാ പരേഷാം ദശദിനവിഹിതേ അംബുപിണ്ഡേ നോ ദദ്യാൽ ബ്രഹ്മചാരിപിണ്ഡകൎത്താവാകുമ്പോൾ തന്റെ നേരേ അച്ഛനേയും പെററമ്മയേയും ഒഴിച്ചു് മറെറാരുത്തൻ മരിച്ചാൽ അവൎക്കു പുലയിൽ വിധിച്ചിരിക്കുന്ന ഉദകക്രിയയും കൊട്ടുബലിയും ചെയ്യരുതു്. തേ പരേണ ദാപയേതു്. പിണ്ഡകൎത്താവായി മററാരുമില്ലെങ്കിൽ വാസിച്ചവരെക്കൊണ്ടു് ഉദകക്രിയയും കൊട്ടുബലിയും ചെയ്യിപ്പിപ്പൂ. പ്രേതത്തിന്റെ സപിണ്ഡരുണ്ടെങ്കിലവരെക്കൊണ്ടു ചെയ്യിപ്പിക്കേണ്ടു. അവരില്ലെങ്കിൽ സംസ്കാരാനന്തരം മന്ത്രസംസ്കാരം ചെയ്തവനെക്കൊണ്ടു മേലിലുള്ള

ഉദകക്രിയകളേയും കൊട്ടുബലികളേയും ചെയ്യിപ്പിപ്പൂ. അവന്നു കുറഞ്ഞൊരുനേരം പുലയുണ്ടല്ലോ. എന്നിട്ടുമില്ലെങ്കിൽ പത്താം ദിവസം വാസിച്ചൊരു ബ്രാഹ്മണനെക്കൊണ്ടു് ഉദകക്രിയയും കൊട്ടുബലിയും ചെയ്യിപ്പിപ്പൂ. അവൻ മാററുമുട്ടത്തു പുണ്യാഹം ചെയ്യിപ്പിച്ചാൽ ശുദ്ധനാം. വർണ്ണീ പിത്രോഃ അംബുപിണ്ഡം കുര്യാച്ച. ബ്രഹ്മചാരീ നേരേ അമ്മതാനച്ഛൻതാൻ മരിക്കിൽ ഉദകക്രിയയും കൊട്ടുബലിയും ചെയ്യുമ്പോൾ ജ്യേഷ്ഠാദി പുലയുള്ളവരോടുകൂടി ചെയ്യാം. അന്ന്യാലയേ ഭുക്തിമംബുക്ഷേപഞ്ച സ്നാത്വൈവ കുര്യാൽ. ബ്രഹ്മചാരി അച്ഛൻതാനമ്മതാൻ മരിച്ചു കൊട്ടുബലി ഇട്ടിരിക്കുമ്പോൾ പുലയുള്ള സ്ഥലത്തിങ്കലുണ്ണരുതു്. പുലയില്ലാത്തോരില്ലത്തുന്നേ ഉണ്ണാവൂ. കൊട്ടുബലിയിട്ടാൽ കുളിച്ചേ ഉണ്ണാവൂ. അന്തിക്കമെതിരേയും കുളിച്ചേ നീരുക്കാവൂ. നിഖിലം നിത്യകർമ്മ സഹമന്ത്ര വിദധ്യാൽ. ഒട്ടൊഴിയാതെയുള്ള നിത്യകർമ്മങ്ങളെ മന്ത്രത്തോടുകൂടും വണ്ണം ചെയ്യണം.

Colophon :

Author—Same as No. 105 A.

Remarks—Only the portion upto p. 99 of No. 105 A is found in this work.

॥ आशौचशतकम् ॥

No. 106. ĀŚAUCAŚATAKAM.

C. O. L. No. 184.

Substance—Paper. Size—13″ × 8″. Pages—7. About

20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—65.

Owner—C. O.

Subject—Same as No. 94.

Beginning:

.... हाद्यघेमेक:ग्रेर्दहनादि तत् ।
यज्वायज्वपुनर्दाहे शिष्टाहं यद्यघाद्बहिः ॥
दशाहं त्र्यहमाशौच .... प्राक् चेदघाग्रहः ।
अस्थिदाहे प्रतिकृतेर्दाहे तु त्र्यहमित्यपि ॥
सपिण्डानां सोदकानां .... दशरात्रमिष्यते ।
दशरात्रं सदा पित्रोः परोक्षमरणश्रुतौ ॥
त्र्यहं मातृसपत्न्यास्तु दशाहं वत्सरादधः ।
कृतौर्ध्वदेहिकेऽत्यब्दे दिनं तस्यास्त्र्यहं तयोः ॥
शिष्टाहमेव सर्वेषामविज्ञातेऽन्तरा त्वघे ।
प्राङ् सञ्चयात् सुतस्येत्थं तदूर्ध्वं दशरात्रतः ॥

End:

स्पृष्टे मर्त्यास्थि च स्निग्धे त्रिरात्रं नीरसैर्दिनम् ।
अमर्त्ये त्वाप्लवाचामौ स्नानं स्निग्धेऽन्यभक्षणे ॥
गुर्वादौ सोदरे ग्रावे मातृबन्धौ वयस्यघम् ।
सवर्णस्य समं भीतिर्विज्ञानेश्वरघोषितम् ॥
स्मृतिद्वये परोक्षेऽल्पं प्रत्यक्षे स्मृतिसंस्थितिः ॥
यथा हि योनिसम्बन्धेष्वह।वेधिरसन्निधौ ॥
याज्यादौ श्वशुरादौ च शिष्यादौ पक्षिणीविधिः ।
अवान्ते सङ्गवे स्नात्वा विप्रः स्पृष्ट्वा (म्बु) शुध्यति ॥

नृपादिवाहनादीनि नान्यथेत्यब्रवीन्मनुः ॥

Colophon :

इत्याशौचशतकं समाप्तम् । शिवशिवगुरुभ्यो नमः ।

श्रीसरस्वत्यै नमः ।

Author :

Remarks—45 verses are missing in the beginning.

॥ आह्निकप्रकरणम् ॥

No. 107. ĀHNIKAPRAKARAṆAM.

C. O. L. No. 280.

Substance—Paper. Size—$11\frac{1}{8}'' \times 8\frac{7}{8}''$. Pages—135. About 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—1340. Complete.

Owner—C. O.

Subject—Prescription of ways of performing the usual religious functions.

Beginning:

... ...

.... श्रीवैद्यनाथाध्वरिणोऽनुजेन

श्रीरामचन्द्राध्वरिणा स्मृतीनां

सारं सुसंगृह्य विलिख्यतेऽद्य ॥

सततं धर्मशास्त्रस्य श्रवणात् पाठनात्तथा

विधूत .... शान्तिमाप्नुयात् ॥

इति स्मृत्यन्तरवचनम् । तत्र मनुः—

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयन् ।

कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥

वेदतत्त्वार्थः परमात्मा । तथा च व्यासः—

End:

त्वामशोकं नमाम्येनं मधुमासेन शोभितम् ।

शोकार्तः कलिकां प्राश्ये मामशोकं सदा कुरु ॥

चैत्रशुक्लचतुर्दश्यां मदनं चन्दनात्मकम् ।

कृत्वा संपूज्य यत्नेन वीजयेद्व्यजनेन च ।

ततः सन्धुक्षितः कामः पुत्रपौत्रसमृद्धिमान् ॥

वृषमुत्सृज्य विधिवद् वृषलोमसमाः समाः ।

शिवरूपसमो मर्त्यः शिवलोके महीयते ॥

Colophon:

आह्निकप्रकरणम् समाप्तम् ॥

Author—Śrī Rāmacandrādhvarin (younger brother of Śrī Vaidyanāthādhvarin).

Remarks—This is an epitome of all the principles contained in the Smṛti Granthas such as Manusmṛti etc.

॥ कर्मविपाकप्रायश्चित्तसुधानिधिः ॥

No. 108. KARMAVIPĀKAPRĀYAŚCITTA-SUDHĀNIDHI.

C. O. L. No. 462.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—98. About 19 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—941.

Owner—C. O.

Subject etc. Same as No. 52, D. C. S. M., M. P. L., Vol. I.

Colophon:

इति कर्मविपाकप्रायश्चित्तसुधानिधौ सायणकृतौ सकलग्रन्थार्थसारभूते दारिद्र्यरोगप्रतिक्रिया नाम त्रिंशं प्रकरणम् ।

Author—Sāyaṇamādhava.

Remarks—30 Prakaraṇas are embodied in this work while the same work in the Palace Catalogue consists of 43 prakaraṇas. About one and a half pages after the colophon are detailed for the table of contents.

॥ कर्मविपाकमहार्णवः ॥

No. 109. KARMAVIPĀKAMAHĀRṆAVA.

C. O. L. No. 2175.

Substance—Palm leaf. Size—$13'' \times 1''$. Leaves—231.

About 7 lines per page and 56 letters per line. Script—Grantha. No. of Granthas—5500. Complete.

Owner—Rāma Vādhyār Kāsi Vādhyār, Mahādānapuram.

Subject—Same as No. 52. D. C. S. M., M. P. L., Vol. I.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरे नमः ॥

अथ रोगनिबर्हणानि तत्र क्षयरोगहराणि । क्षयरोगनिदानमाह याज्ञवल्क्यः । सर्वरोगनिवृत्यर्थं षडब्दप्रायश्चित्तं कुर्यात् । प्रायश्चित्तार्थमभिमर्शन्ति स्त्रियो रोगिण एवेति रोगिणोऽध्यः (?) प्रायश्चित्तम् । एतेनैवाभिधानादिति । क्षयरोगहरप्रायश्चित्तम् ।

End:

इति बोधायनीये शान्तिः । मधुहोमम् ।
यत्किञ्चिन्मातरं मोहात् स्वसारं वाभिगच्छति ।
तस्य स्यान्मधुमेहेन पीडा शङ्खवर्चोबलात् ॥
तत्र मातृगतौ कार्यं तप्तकृच्छ्रचतुष्टयम् ।
प्रक्रम्य विघ्नताच्छिष्टं दिवसैकैककारणात् ॥
चत्वारिंशद् द्विजा भोज्या हत्वाहाधे? तदीरितम् ।

स्वसृगन्तुः स एवाह परा(ग ? क) द्वयतो गातिः ॥
होमस्तु रौद्रसूक्तेन जप्यं पुरुषसूक्तकम् ।
तथैव भगवन्नामसहस्रं भारतोदितम् ॥
जलतस्त्वान्नयोर्दानं पूर्ववद् ब्रह्मचोदितम् ।
भयं विनश्यति क्षिप्रमन्यत् तोयनिमित्तकम् ॥

Colophon:

इति श्रीमदनपालपुत्रस्य मान्धातुर्निबन्धे महार्णवाभिधाने कर्मविपाके पञ्चमस्तरङ्गः ।

(Taraṅga 5)

கொடுமி-ஞ புரட்டாசி மீ (ய)சல வியாழக்கிழமையும் ரோஹிணிநக்ஷத்திரமும் (நா) சம்ஹநாமயோஹ ஜீதிசம்ஹ கரணமும்அன்று கமடுவிபாகமும் பரிபாஷையும் எழுதி முகிஞ்சது.

Author—Māndhātā.

Remarks—Several leaves are decayed. No colophon is seen at the end. Fol. 121 furnishes the following information about the author:

आसीदसीमगुणलाटकुलाम्बुराशा-
वुद्यत्प्रभूतशुभ्रकीर्तिनयप्रकाशः ।
लोकैः सदा हृदि धृतो गुणसन्निविष्टः
श्रीरत्नपालनृपतिर्भुवनैकरत्नम् ॥
तस्यात्मजो हरहपाल इति प्रसिद्धः
सिद्धाङ्गनाजनसमाजसमिद्धकीर्तिः ।
दानेन यः सुकृतिनां क्षिपति स्म दैन्यं
सैन्यं च वैन्यसदृशः प्रतिभूपतीनाम् ॥
सुतोऽस्य जातः सुकृतोन्नतस्य
न तस्य कश्चित् सदृशो बभूव ।

यम(च्छल)स्तुत्यमवेक्ष्य तातो
नाम्ना हरिश्चन्द्र इति व्यधत्त ॥
तस्यात्मजोऽभूदतुलप्रतापः
साधारणो भूमिपतिर्वदान्यः ।
अभूतपूर्वामवनीश्वराणा-
मजीग(प)द्यो जगति स्वकीर्तिम् ॥
(बन्धच्छिदाबिरुदकीर्ति)मिहान्वितार्थां
कृत्वा परत्र च तथैव विधातुमिच्छुः ।
कीनाशपाशचयबन्धविमोचनार्थं
तीर्थत्रयीकरविमुक्तिमचीकरद्यः ॥
अस्यात्मजः श्रीमदनेति राजा
नाम्ना च रूपेण च संगतार्थः ।
रोषारुणे चक्षुषि यद्विपक्षः
(व्यती?स्मर्तव्य)रूपत्वमवाप्तुकामः ॥
कूपानारामान् धर्मायतनानि सेतुबन्धांश्च (स?) ।
कृत्वा स्वकीर्तिमात्रं राजति दिक्पालमूर्तिभेदेन ॥
परिशीलयता कलाकलापं विदधानेन च भूरिशः प्रदानम् ।
मदनेन महीभृता(र्थे?थ)तेन प्राथिता नूतनभोजराजकीर्तिः ॥
पुत्रेषु सत्स्वपि कळत्रयुगेऽथ तस्य
पुत्रौ जगत्त्रयविसृत्वरकीर्तिपूरौ ।
(ताक्षौ ? जातौ) प्रियावतितरां प्रथमप्रसूतौ
मानोन्नतौ भृशमनल्पगु(णाविहीनौ?णौ विनीतौ) ॥
उदारशीलौ सुमनोविलास-
मनोज्ञवृन्दावनकेलिलोलौ ।

यशोदया वर्धितमङ्गलाङ्गौ
यौ रामकृष्णाविव संप्रतीतौ ॥
यच्छैशवानुकरणं न युवा न वृद्धः
शक्नोति कर्तुमितरः कृतसद्गुणोऽपि ।
दानाना(?)दानमखिलार्थिजनार्थसिद्धेः
कीर्तिर्दिगन्तवितता च यतस्तदीया ॥

अप्रतिमल्लः पृथ्व्यां पृथिवीमल्लस्तयोरभूज्ज्येष्ठः ।
अपरो मान्धातृ(समो)मान्धाता गीयते जगति ॥
सोऽयं सुकृतविधाता रिपुकुलजेता तनोति मान्धाता ।
विद्वन्मुखेन मतिमान् सत्कृतिरत्नं महार्णवं नाम ॥

माता पुण्यचरित्रकीर्तिविभवा यस्याम्बिका नामतः
शाकल्यापरमूर्तिरार्यचरितः श्रीपेद्दिभट्टः पिता ।
सोऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरो
वेदे स्मार्तमते नये च सपदे वाक्ये कृती वर्धते ॥

मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परं शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमिया-
दियं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः ॥

श्रुतिस्मृतिपुराणानि समालोक्य यथामति ।
निबध्यते समासेन निबन्धोऽयं महार्णवः ॥

For further information refer to No. 53. p. 115, D. C. S. M., M. P. L., Vol. I.

॥ गौतमधर्मसूत्रभाष्यम् ॥

No. 110. GAUTAMADHARMASŪTRABHĀṢYAM.

C. O. L. No. 83.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—591. 17 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—5610. Complete.

Owner—C. O.

Subject—Aphorisms of Gautama on Dharma with Bhāṣya.

Beginning:

धर्माधर्मस्वरूपाय सर्वकार्यालयाय च ।
प्रणिपत्यादिदेवाय वासुदेवाय भक्तितः ॥
गौतमीयच्छलेनेदं सर्वस्मृतिनिबन्धनम् ।
क्रियतेऽथाधुना भाष्यं सूनुना बाहदस्य तु ॥

कोऽस्याभिसंबन्धः । अयमुच्यते । सन्ति चतुर्दशविद्यास्थानानि । तद्यथा—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्यास्त्वेताश्चतुर्दश ॥ इति ॥

तेषां मध्ये परिगणितमिदं धर्मशास्त्रमारभ्यत इत्यभिसम्बन्धः । अथवा पुरुषस्य सुखदुःखोपभोगार्थैः शरीरेन्द्रियविषयैः संयोगवियोगरूपो जन्ममरणप्रबन्धः संसारः । स च धर्माधर्मनिमित्तः नान्यनिमित्तः । तयोश्च धर्माधर्मयोरिष्टानिष्टोपभोगहेतुत्वादुपादानपरिवर्जनार्हावुभौ भवतः । तदुभयं परिज्ञानेन संभवतीति धर्माधर्मबो-

धनार्थं गौतमेन शास्त्रं प्रणीतमिति प्रयोजनम् । अपि चास्यैतदेव धर्माधर्मोपादानपरिवर्जनयोः पुरुषार्थत्वादित्यभिधेयम् । यथा श्रौतान्यग्निष्टोमादीनि अवश्यकर्तव्यानि तथा अष्टकादिकर्माण्यपीति तत्र सर्वकार्याणां कारणतः प्रवृत्तिदर्शनात् पूर्वं कारणविशेषप्रतिपादनार्थमाह—

वेदो धर्ममूलम् ।

ननु च विधिप्रतिषेधरूपत्वाच्छास्त्रस्य उपनयनं ब्राह्मणस्य अष्टम इत्याद्येव वक्तव्यम् । नत्वनुवादरूपत्वाद् वेदो धर्ममूलमित्यादि । निष्प्रयोजनत्वादनुवादस्येति । न च अनेन वेदस्य प्रामाण्यं प्रतिपाद्यते । तस्य स्वत एव सिद्धेः । अन्यथा येन प्रामाण्यं प्रतिपाद्यते तस्याप्यन्येनेति अनवस्था स्यादिति । उच्यते । वेदस्य धर्ममूलत्वानुवादः तद्वारेण स्मृतिशीलयोर्धर्ममूलत्वप्रतिपादनार्थः ।

End :

साम्प्रतं ज्ञानिनः फलमाह—धर्मिणां विशेषेण स्वर्गं लोकं वेद । धर्मविदाप्नोति ज्ञानाभिनिवेशाभ्याम् ।

धर्मी तु केवलकर्मविशेषत्वमा प्रलयादित्यभिप्रायः । धर्मं ज्ञात्वानु(ष्टीक्र ? ष्ठि)तः ज्ञानग्रहणादभिनिवेशः । तदनुष्ठानम् ।

तथा च वसिष्ठः--यो यागमनुतिष्ठति स धार्मिक इत्यादि ।

इति धर्मो धर्मः ।

वेदो धर्ममूलमित्यारभ्यैतत्पर्यन्तं धर्मसंज्ञः गौतमस्येति वाक्यशेषः ।

Colophon :

इति मस्करीये गौतमभाष्ये अष्टाविंशोऽध्यायः ।

Author: Text—Gautama. Commentary—Maskari, son of Vāhaṭa.

Remarks—This work contains 28 chapters and has been published with commentary *Mitākṣara* in the Ānandāśrama Series, Poona. No. 50 in M. O. L. series ascribes its authorship to Vāmanasūnu. If maskari is the son of Vāhaṭa he must have flourished before Haradattācārya, the author of Mitākṣara.

॥ नित्याह्निकादि ॥

No. 111 A. NITYĀHNIKĀDI.

C. O. L. No. 2297 A.

Substance—Palm leaf. Size—$9\frac{7}{8}'' \times 1\frac{1}{2}''$. Leaves—22. 6 lines per page and about 28—38 letters per line. Script—Malayāḷam. No. of Granthas —500.

Owner—Bhāskaran Mūttatu, Veccūr.

Subject—Description of daily duties.

Beginning:

हरिः। श्रीगणपतये नमः । अविघ्नमस्तु । श्रीगुरुभ्यो नमः । यः श्रीग्त्रेयहा जदास्वासं यहथणदा स्वां उहा पुणेन अये मः ग्रनवावे:स्ति हुदास्वाय ष्पेयहामदा स्व अर्घवे यहा तिसराभ्यो मः ग्रन अयेमः य नमः य नस्र-

यमः न्द्रानदी नदिन इयमः ष्गनविवेमः थनप्रव्यैमः त्वंन अदं नेमः पापेमः क्ष्मा न च यमः त्योमः ग्योमः न्द्रान-विवेमः थनप्रव्यै मः थिन आनेमः आत्मनः परत्मन अंरी-सीद्वि आगात्री ज्ञवियें आहि अजय च इम णप्रेंस्तस्येन्वा-स्याणमानेमः बषन्धुपवो यमानेनिगरि पेंष्ठापो नथानः तिन्त्रे-क्ष्य य्यत्यकनाय ऋषिः कृवृपन्दः यंज्ञपन्देता सूश्रमश्रान्त्रि-ते पाप्यो क्षयन्नं पकंषं नवाप्रतिरुच्छ सूमतिप ओं यंमहा-न्युपम मकृम्यो वेरन्तां दवामरिमसं चाकर्ण य्यापत् श्नरिम्म इममामृचो सूज्येंषिहोस्त्रा रासजोम्महभ्यां भ्यादणश्वाहदलं तु त्रित्रिदलं तु किदुतयि दहम तनौर्येतिं जमिहा त्रौत्येति अहिय च इप्रोब्रप्रप ऋषदेहात्री न्दः घ्र्यादावियोगं त्रिपि अयाद्यात् माज्योरमृ... ... .नः तिक्ष्य ह्नजाति विः वियच्छ अप्रनोनि हयेजच्च ।

... ...

... ...

प्रोद्यदादित्यवर्णश्च सूर्यमण्डलमध्यगः ।
शङ्खचक्रगदापद्मधरो कस्यदोर्धयोः(?) ॥

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

End:

सर्वकार्ये हनूमांश्च दीर्घमायुश्च जाम्बवान् ।
नारदः कलहश्चैव कैकेय्या दुष्टभावना ॥
भरतं पट्टाभिषेकं च गुहेन प्रियदर्शनम् । (?)

हेमाभामतिवागतीतगुणशीलानल्पशिल्पाकृतिं
प्रेमारोहमनोहरां करलसत्कल्याणदामाश्रिताम् ।
श्यामामीश्वरमुद्यतां वरयितुं त्रैलोक्यसंमोहिनीं
कामापादनकल्पवाह्लिमानिशं वन्दे परां देवताम् ॥

രാവിലത്തെ ധ്യാനം (സായംവരത്തിൻെറ)

Colophon:

Author:

Remarks—Some leaves are worn out. The Ms. contains many *stotras* such as Lakṣmīnārāyaṇa stotra, Pañcākṣarī, Tāratamya stotra, Aṇuvedānta, Śrīharistuti etc., and concludes with a eulogistic verse composed in adoration of the God to be recited every morning with deep devotion. Three more works are found in this Ms. and they are catalogued as 111 B, C & D.

വൈദ്യഗ്രന്ഥം (ഭാഷ)

No. 111 B. VAIDYAGRANTHAM.

C. O. L. No. 2297 B.

Substance—Palm leaf. Size—$9\frac{7}{8}'' \times 1\frac{1}{2}''$. Leaves—57. 7—9 lines per page and about 32—38 letters per line. Script—Malayāḷam. No. of Granthas —1000. Incomplete.

Owner—Same as No. 111 A.

Subject—Medical treatment.

Beginning:

ഹരിഃ ശ്രീ ഗണപതയേ നമഃ അവിഘ്നമസ്തു. ഇരുവേലി രാമച്ചം ചന്ദനം കൊട്ടം കൊഴുന്ന മാഞ്ചി മഞ്ചെട്ടിപ്പൊടി തേവതാരം കച്ചോലക്കിഴങ്ങു് ജാതിക്കാ കരയാമ്പൂ നാഗപ്പൂ പശുപാശി കടുകുരോഹിണി അഛാളി കിരിയാത്തു് മാം... കി കണ്ടിവെണ്ണ ചെന്നിനായകം പൂതിയുണക്കി വയമ്പു് ജീരകം പെരുംജീരകം കരിംജീരകം സമുദ്രപ്പച്ച സഹസ്രവേധി കല്ലു് ചെറൂവ്വള്ളിക്കൊടി അമുക്കിരം അതിമധുരം പഞ്ചമെൻ പഴുക്ക ഇവ ഈരണ്ടുകഴഞ്ചു പൊടിച്ചു് വെച്ചുരനീരിൽ അരച്ചുണക്കി പിന്നെ നാടെൻപുഴ ഗോരോചന കാവിമണ്ണ നറുനണ്ടിക്കിഴങ്ങു പാടക്കിഴങ്ങു് കഴഞ്ചിക്കുരു ഇവ ഈരണ്ടുപണത്തൂക്കം ചേത്തു് കോലുഴിഞ്ഞനീരിൽ അരച്ചുണങ്ങുക. പിന്നെ ഉഴിഞ്ഞനീരിൽ പിന്നെ ചീരകവെള്ളത്തിൽ അരയ്ക്കൂ. നിഴലുണങ്ങി വച്ചുകൊൾക. വാതത്തിനു് അഢിക്കാടിയിൽ സേവിക്ക.

End:

നെയ്യു് കഷായമിടുവാൻ. ദശപുഷ്പം മുറിക്കൂടി മാവിൻതൊലി മുരിങ്ങത്തൊലി ചെറുചുണ്ടവേർ കുറുന്തോട്ടിവേർ നാല്പാമരത്തൊലി കരിങ്കുറിഞ്ഞിവേർ ആടലോടകത്തിൻവേർ പനങ്കുരുന്നു് കരിമ്പു് ചോരത്തണ്ടു് നറുനണ്ടിക്കിഴങ്ങു് തഴുതാമ പാലുവള്ളിക്കിഴങ്ങു് ഇവ ഓരോപലം രുരു ഇടങ്ങഴി വെള്ളത്തിൽ ചതച്ചിട്ടു് വെന്തു് മൂന്നിടങ്ങഴിയാക്കി പിഴിഞ്ഞരിച്ചു് മൂന്നുനാഴി നൈചേത്തു് വച്ചു് മേവാൻജീരകം ഉരിഉലുവാ ഉരി ഈരണ്ടിടങ്ങഴി വെള്ളത്തിൽ വേറെ വേറെ കിഴികെട്ടി ഇട്ടു് ഇരുനാഴിയാക്കി ചേത്തുകൊൾക. കല്ക്കത്തിനു് അശാളം കിരിയാത്തു് പാദങ്കി ചെന്നിനായകം പൂതിഉണത്തി ഇരുവേലി രാമച്ചം ചന്ദനം അകിൽ കാനകപ്പൂവു് കരയാമ്പൂ പശപാശി ജാതിക്ക കണ്ടിവെണ്ണ പഞ്ചമമ്പഴുക്കാ ത്രികട്ടുകു്

അയമോതകം കൃമിശത്രു വെങ്കായം വയമ്പ് അരിയാറ് സഹസ്രവേധി മുത്തങ്ങ അതിമധുരം കടുകരോഹിണി തേവതാരം കൊട്ടം ഇലവർങ്ഗം ഇവ അരയരക്കഴഞ്ചു ചതച്ചിട്ടുകൊൾക. അരിക്കുന്ന പാത്രത്തിൽ അരപ്പണത്തൂക്കം പുഴുവ് കൂടെ ഇട്ടുകൊൾക. ചെറുതേൻമെഴുകു പതം പാകം.

Colophon :

Author :

Remarks—The closing leaves of the work are missing.

ജ്യോതിഷഗ്രന്ഥം (ഭാഷാ)

No. 111 C. JYOTIṢAGRANTHA.

C. O. L. No. 2297 C.

Substance—Palm leaf. Size—$9\frac{7}{8}'' \times 1\frac{1}{2}''$. Leaves—19. 6—9 lines per page and 26—32 letters per line. Script—Malayāḷam. No. of Granthas—200. Incomplete.

Owner—Same as No. 111 A.

Subject—Astrology.

Beginning :

ഹരിഃ ശ്രീഗണപതയേ നമഃ അവിഘ്നമസ്തു.

തുമ്പതിങ്കളൊട്ടു ഗംഗതന്നെയും

ചൂടുമപ്പനുടെയോമലുണ്ണികൾ

ബാലകായ ഗണിതങ്ങൾ ഭാഷയായ്

ചൊല്ലുവാനിഹ തുണപ്പതാക മേ.

चन्द्रो रुद्रो जयो विद्या नयस्तेन खनी रवेः ।
त्रिंशन्नाड्या ह्रि गुलिको दिनपञ्चमवन्निशि ॥

ശ്രീവല്ലഭയ്ക്കുമേഷാദിരാശിമാനങ്ങൾ ചൊല്ലിനേൻ
രാഗൗഘമുനിമൌനം ഹരിണഖരിണഗാനിമാൻ
തൃണവാൻ ജനിമസരാമവരേശശമ്ഭശക്രഭമയാഭാന
അയനാച്ചലനത്തോട്ട കൂടാതോരുഭാസ്ക്കരം
വച്ചതിന്റെ തീയതിയെ കള നപ്പതുവച്ചതിൽ
ശേഷത്തേയങ്ങിരട്ടിച്ചിട്ടക്കൻ നിന്നോരുരാശിയിൽ
പെരുക്കി നൂതനൈഃ പിന്നെ ഏററിയാലുദയാൽപരം

End :—

ഇനി വിലിയാദിവാക്യം.

शीलं राज्ञः श्रिये श्रिपिदं नश्वरम् । लोलः पुरुषो नार्याम् । तपस्वी वैदिकः स्यात् । सेव्यालका किन्नरैः । दीप्रो दिने भास्करः । धर्मरम्यं सुराष्ट्रम् । स्क......लीलान्दुकूलौ । पुत्रादौ न विरागः । शौरिः समर्थ एव । दुष्टैर्देशोपद्रवः । व्यग्रो जनः.....न्नाशे । योगीश्वरो निराशः । शिखण्डी भवनेषु । नागो यानाधिपतिः । परिणये गानेच्छा । कविकण्ठस्था कथा । शीलसंपद्यानन्दः । श्रीर्विना न मुकुन्दात् । निराधारोऽहिराजः । कुबेरो विकटधीः । स्तेनानां श्वा विरोद्धा । दीर्घं रिरंसुर्ना नाके वानरो मधुपानाढ्यः । घननिकरो निर्ययौ । रागो धैर्यविपर्ययः । स्थूलो गिरिश्चित्रकूटः । स्तंभमात्रेऽहि । धीरधीस्त्रिनेत्रः । प्रवदो गुरुर्नस्यः छन्नो..... ।

Colophon :

Author :

Remarks—The work extends upto Viliyādivākya.

ജ്യോതിഷം (ഫലഭാഗം)

No. 111 D. JYOTIṢA.

C. O. L. No. 2297 D.

Substance—Palm leaf. Size—$9\frac{7}{8}'' \times 1\frac{1}{2}''$. Leaves—10. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—160. Incomplete.

Owner—Same as No. 111 A.

Subject—Astrology (Phalabhāga).

Beginning:

ഹരിഃ ശ്രീഗണപതയേ നമഃ. അവിഘ്നമസ്തു.

അദിത്യോദയപുറന്നാ............നൃനായും ക്രോധിയായും പ്രധാനിയായും കീത്തിയും അഭിമാനിയും കണ്ണുചുവന്നും... ....ദരനായും ക്ഷമ ഇല്ലായ്കയും ദയ ഇല്ലായ്കയും ഫലം.... ... ...

... ...

End:

എന്നാൽ... ... ...

... ...ശിവെയ്യുമുപ്പതിപ്പെരുക്കി ഹരി... ... ...

ച്ച് ഇലിവെക്ക. അങ്ങനെ ഉണ്ടാക്കിയ മദ്ധ്യ... ...

... ... ഹസ്തുടം വരും.

Colophon:

Author:

Remarks—The Ms. is very much decayed.

॥ पराशरस्मृतिव्याख्या(सङ्ग्रहः) ॥

No. 112. PARĀŚARASMṚTIVYĀKHYĀ.
(Saṅgraha)

C. O. L. No. 2248.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 2''$. Leaves—41. 12 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—1400.

Owner—Maṇiyar Kṛṣṇan Bhaṭṭatiri, Ceṅṅannūr, Travancore.

Subject—Details regarding different professions and the origin of caste.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नेन परिसमाप्तिरस्तु ।
श्रुतिं पश्यन्ति मुनयः स्मरन्ति च तथा स्मृतिम् ।
तस्मात् प्रमाणमुभयं प्रमाणैः प्रथितं भुवि ॥
पराशरस्मृतावस्यां ग्रन्थक्लृप्तिर्विविच्यते ।
द्वे काण्डे द्वादशाध्यायाः श्लोका अष्टोनषट्शतम् ॥
इहाचारे त्रयोऽध्यायाः प्रायश्चित्ते नवेरिताः ।
अवतारश्चतुर्वर्णधर्मोऽसाधारणेतरौ ॥
शिष्टाचाराह्निके तत्र धर्मौ साधारणौ मतौ ।
षट्कर्मक्षितिरक्षाद्या वर्णसाधारणाः स्मृताः ॥
आचारे प्रथमाध्याये त एतेऽर्थाः प्रकीर्तिताः
कृष्यादिजीवनोपायो द्वितीयेऽध्याय ईरितः ॥

End:

देशान्तरमृतः कश्चित् सगोत्रः श्रूयते यदि ।

न त्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेत् ॥ इति ॥

सगोत्रः सपिण्डः तस्य देशान्तरगतस्य संवत्सरादूर्ध्वं मरणश्रवणे तत्सपिण्डानां न त्रिरात्रमहोरात्रमाशौचम् । किन्तु सद्यः—शौचम् । दशाहादूर्ध्वमर्वाक् त्रिपक्षात् त्रैरात्रम् । षण्मासादर्वाक् पक्षिणी । संवत्सरादर्वागेकाहामित्यर्थः । सद्यःशौचविधानं ज्ञातिमात्रविषयम् । पित्रादिमृतिश्रवणे तु दशरात्रश्रवणो द्विविधो देशान्तरमृतिः .... ।

Colophon :

इति पराशरस्मृतौ माधवीयव्याख्यायां संग्रहे प्रथमाध्यायः ।

इति माधवीयसंग्रहे द्वितीयोऽध्यायः ।

Author—Mādhavācārya.

Remarks—The work extends only upto the 12th stanza in the 3rd Adhyāya.

॥ पुष्करम् ॥

No. 113. PUṢKARAM.

C. O. L. No. 150.

Substance—Paper. Size—13½″ × 8½″. Pages—94. About 21 lines per page and 30 letters per line. Script—Devanāgarī. No. of Granthas—2300.

Owner—C. O.

Subject—A descriptive account of *Sanyāsadharma.*

Beginning :

श्रीकृष्णाख्यं परानन्दसन्दोहामृतविग्रहम् ।
महोऽस्तु मे महामोहध्वान्तसन्तानशान्तये ॥
प्रणम्य विष्णुमद्वय... ... ...
... ...मनोर्मतं महात्मनः ॥

ब्रह्मचारिगृहस्थवानप्रस्थाख्यानामाश्रमाणां गायत्रब्राह्मप्राजापत्यनैष्ठिकवार्ताकशालीनयायावरसिक्तोञ्छनवैखानसोदुम्बरवालखिल्यफेनवाख्याः वृत्तिभेदाः धर्मभे(दा)श्चोक्ताः । अथेदानीं परिव्राजकाख्यस्य आश्रमस्य कुटीचकबहूदकहंसपरमहंसाख्या वृत्तिभेदा धर्मभे(दा)श्चोच्यन्ते । एतत्सर्वमुदर्के दर्शयिष्यामः । ननु यावज्जीवमग्निहोत्रं जुहोतीति श्रुत्या संन्यासो नोपपद्यते ।

नैष दोषः—

कुटुम्बं पुत्रदारांश्च वेदाङ्गानि च सर्वशः ।
यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः ॥ इति ॥

End :

एवम्—

संन्यस्य सर्वकर्माणि स्वकार्यपरमोऽस्पृहः ।
संन्यासेनोपहत्यैनः प्राप्नोति परमां गतिम् ॥

अस्पृहः अपत्यादिषु स्नेहरहित इत्येतत् समस्तं प्रकरणार्थमुपसंहरति—

"एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः ।
पुण्योऽक्षयफलः प्रेत्य राज्ञो धर्मं निबोधत ॥

चतुरस्त्वाश्रमानाश्रित्य धर्मस्य चातुर्विध्यमुक्तम् । ननु स्वत एव । तेषामवान्तरभेदेऽपि साधारणरूपमाश्रित्य चातुर्विध्यमस्तीत्य-

विरोधः । धर्मस्याक्षयमुक्तिफलत्वं सत्त्वशुद्धिज्ञानोत्पत्तिद्वारेणैव, नतु स्वत एव । तदपि सप्रमाणमसकृदवादि मया । ब्राह्मणग्रहणं तत्र त्रैवर्णिकप्राप्त्यर्थमित्यन्य आहुः । चतुर्ष्वाश्रमेषु क्षत्रियवैश्ययोः अरण्याधिकारस्य तुल्यत्वादिति । अत्र यद्वक्तव्यं तत्प्रागेवोक्तम् । ऋज्वन्यत्व...... ....

Colophon:

इति परमहंसपरिव्राजकाचार्यश्रीमत्प्रकाशात्मभगवच्छिष्यत्रिलोकात्मभगवतः कृतिः मानवस्य यतिधर्मभागस्य विवरणं पुष्कराख्यं समाप्तम् ॥

पुष्करस्यावभासिन्यो रेखाः सुरचिता मया ।
मण्डनं त्वसदीडयानां श्रीमच्चरणपुष्करे ॥

मन्दस्मितानन्दितभक्तजालं
सौन्दर्यसन्दर्पितवामभागम् ।
स्वानन्दसन्दर्पितवामभागं
साम्बं भजे चन्द्रकलावतंसम् ॥

सर्वज्ञचूडामणिमीश्वराणा-
मीशानमिन्दीवरकोमलाङ्गम् ।
कारुण्यलावण्यसुधासमुद्रं
श्रीजानकीजानिमहं भजामि ॥

वैकुण्ठं गरुडध्वजं मुररिपुं श्रीशार्ङ्गिणं चक्रिणं
लक्ष्मीवक्षसमिन्द्रनीलवपुषं पीताम्बरं स्रग्विणम् ।
गोपस्त्रीपरिवेष्टितं कलरणद्वेणुं जगन्मोहनं
गोवृन्दं परिचारयन्तमनिशं गोपालकृष्णं भजे ॥

समाप्तश्चायं ग्रन्थः ॥

Author—Trilokātman, disciple of Prakāśātman.

Remarks—Unlike any of the commentators on *Smṛti* such as Kullūka etc., the author has discussed upon *Sanyāsidharma* in a unique way. The work is based on Vidyāraṇya's Jīvanmuktiviveka.

॥ प्रायश्चित्तम् (बाह्वृचम्) ॥

No. 114. PRĀYAŚCITTAM.

C. O. L. No. 16.

Substance—Paper. Size—11″ x 9″. Pages—39. About 20 lines per page and 11 letters per line. Script—Malayāḷam. No. of Granthas —540. Complete.

Owner—C. O.

Subject—Expiatory rites to be observed for shortcomings in the performance of domestic rituals.

Beginning:

मदीयहृदयाकाशे चिदानन्दमयो गुरुः ।
उदेतु सततं सम्यगज्ञानतिमिरारुणः ॥
समस्तदेवतामयं तमोविनाशनं परम् ।
द्विजेन्द्रभूषणं महः समाश्रये सदाशिवम् ॥
यत्प्रसादादाविघ्नेन समाप्तिः सर्वकर्मणाम् ।

सततं विबुधैर्वन्द्यमेकदन्तं नतोऽस्म्यहम् ॥
अथाश्वलायनं नत्वा मुनिं कौषीतकं तथा ।
यत्किञ्चित् बह्वृचस्मार्तप्रायश्चित्तं विलिख्यते ॥
आलेपाद्यनलाहुतिश्च हविषो निर्वाप आज्यस्य चा-
थान्वाधेरपि देवतोक्तिरिति तान्युत्पत्तिकर्माण्यपि ।
कार्यं स्विष्टकृतः पुराग्निमुखतश्चोर्ध्वं प्रधानं मुहू-
र्तोक्तं चाविधिना कृतानि सकलान्येतानि चावर्तयेत् ॥

End:

उपात्तः कर्मणे यस्मै योऽग्निस्तस्मिन् स कर्मणि ।
कृते लौकिक एवाग्निरिति बोधायनोदितम् ॥

Colophon:

പുതുമനച്ചോമാതിരിയുടെ പ്രായശ്ചിത്തം സമാപ്തം.

Author—Somayājin, Putumana Illam (Putumanaccomātiri).

Remarks—This work is composed in conformity with the views of Āśvalāyana and Kauṣītaka.

॥ प्रायश्चित्तशतद्वयी (सव्याख्या)

No. 115. PRĀYAŚCITTAŚATADVAYĪ
with commentary.

C. O. L. No. 670.

Substance—Paper. Size—$10\frac{3}{4}'' \times 8\frac{1}{2}''$. Pages—106. About 20 lines per page and 30 letters per line. Script—Devanāgarī. No. of Granthas—1700. Complete.

Owner—C. O.

Subject—Same as No. 114.

Beginning:

आपस्तम्बं मुनिं नत्वा प्रायश्चित्तशतद्वयीम् ।
मन्दानां सुखबोधार्थं व्याकरिष्ये यथामति ॥

तत्र तावच्चिकीर्षितस्य ग्रन्थस्य विषयप्रयोजनादिकं दर्शयति—

नैमित्तिकेषु श्रुतिलक्षणेषु
सूत्रे यदस्पष्टमिवाल्पबुद्धेः ।
तद्भाष्यवृत्त्याद्यनुसृत्य सम्यक्
सुखावबोधाय विविच्यते तत् ॥

हविर्यज्ञप्रायश्चित्तेषु सोमप्रायश्चित्तेषु च मन्दबुद्धीनां सूत्रे यदस्पष्टमिव प्रतीयते तदेव प्रायश्चित्तं तेषां स्पष्टावबोधार्थं स्वरूपतो विषयतश्च विविच्य प्रदर्श्यते । सूत्रे अस्पष्टं व्याख्याने स्पष्टं भवति । भाष्ये वृत्तौ प्रयोगवृत्तौ च व्याकीर्णतया स्थितस्य प्रायश्चित्तस्य भाष्याद्यनुसृत्य क्रमेणैकत्र संग्र(ह?हे)प्रायश्चित्तार्थः सुखावबोधो भवति । तदर्थोऽयमारम्भ इत्यर्थः ।

End:

अनुक्तमत्राप्यपरिस्फुटं यत्
तद् भाष्यवृत्त्यादिषु बोधनीयम् ।
तत्राप्यनुक्तं तु तदुक्तरीत्या
यथानिमित्तं स्वयमूहनीयम् ॥

न तावदस्मिन् संग्रहे सर्वाणि प्रायश्चित्तानि साकल्येन प्रतिपादयितुं शक्यन्ते विस्तरप्रसङ्गात् । अतः, अनुक्तमस्पष्टं वा भाष्ये वृत्तौ

प्रयोगवृत्तौ सम्यक् बोद्धव्यम् । न च भाष्यादावपि सर्वं नैमित्तिकं वक्तुं (शक्यं,)पुरुषाणां प्रमादादिदोषावश्यंभावेन गहने कर्ममार्गे नानाविध(न्मू?स्ख)लनसंभवात् । अतस्तत्राप्यनुक्तं सूत्रभाष्याद्युक्त-न्यायानुसारेण तत्तन्निमित्तानुगुणं स्वयमेवोहनीयमिति सिद्धम् ।

Colophon :

इति श्रीवत्सकुलभूषणस्य श्रीवेङ्कटेशवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने चतुर्थप्रकरणम् ।

समाप्ता शतद्वयी ।

Author—Veṅkaṭeśavājapeyayājin.

Remarks—This work is divided into 4 sections. Both the original and the commentary are the productions of the same person.

॥ मनुस्मृतिः (सव्याख्या) ॥

No. 116. MANUSMṚTI

with commentary.

C. O. L. No. 2135.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—224. 10 lines per page and 36—40 letters per line. Script—Malayāḷam. No. of Granthas—4900.

Owner—Puruṣottaman Saṅkaran Nampūrippād, Kunnattunād.

Subject—Civil and religious laws relating to temporal concerns in general and to *Varṇāśrama-dharma* in particular.

Beginning:

ऐश्वर्यमद्भुतं यस्य धर्मस्थित्यर्थमेधते ।
अजन्मने नमस्तस्मै वसुदेवात्मजन्मने ॥
जातो जनपदे स्फीते केरलेषु महायशाः ।
राघवार्य इति श्रीमाञ्छ्रूयते शास्तुरात्मजः ॥
श्रीरङ्गाधिपतिर्यस्मै द्विषतां वधतोषितः ।
वीरमल्ल इति ख्यातं नाम वीराय दत्तवान् ॥
महता मतिमन्थेन महाभारतसागरम् ।
मथित्वा मधुरं येन भारतामृतमुद्धृतम् ॥
पुत्रत्वं राजराजस्य येन प्राप्तेन दस्यवः ।
जीवितादुद्धृताः सर्वे सन्तश्च महतो भयात् ॥
अनन्यसुलभं सख्यं तेन प्राप्य यशस्करम् ।
लेभे लक्ष्मीमपर्यन्तां नाम्ना श्रीनन्दनो द्विजः ॥
स मानवस्य शास्त्रस्य व्याख्यां सम्पन्नसौष्ठवाम् ।
लघ्वीं श्रीनन्दनश्चक्रे लक्ष्मणार्यात्मसंभवः ॥
सदस्यैर्वीरमल्लाख्यव्याख्यानं तत्परीक्षितम् ।
पूर्वव्याख्यानुरोधेन संक्षिप्तं सद्भिरीक्ष्यताम् ॥
मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥

... ...

न केवलं त्रैवर्णिकानामेव किन्तु शूद्रादीनामपीत्युक्तम् ।

End:

एवं प्रपञ्चितस्य परमात्मज्ञानस्य फलमाह एवमिति । आत्मना मनसा ब्रह्म परं पुरुषम् । शास्त्राध्ययनस्य फलमाह इत्येतादिति । यथेष्टां गतिमाप्नुयात् यथेष्टं फलं प्राप्नोति ।

Colophon :

इति श्रीभारद्वाजगोत्रेण श्रीलक्ष्मणात्मजेन श्रीवीरमल्ल-प्रियसखेन श्रीनन्दनेन विरचिते मानवव्याख्याने द्वादशोऽध्यायः ।

Author—Śrī Nandana, son of Lakṣmaṇa.

Remarks—The Ms. is decayed, the latter half being mostly worn-out. The commentary is styled Vīramalla after the commentator's comrade and patron Rāghavārya who was given the title of Vīramalla by the king of Śrī Raṅga. To the same author are ascribed the Mokṣadharmadīpikā and the Mahābhārata Tīka. This commentary is known by the name of Nandini as well. It is noteworthy that Rāghavārya was the son of Rājarāja.

॥ मनुस्मृतिः (सव्याख्या) ॥

No. 117. MANUSMṚTI

with commentary.

C. O. L. No. 104.

Substance—Paper. Size—11″ × 8¾″. Pages—516. About 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas —6450. Complete.

Owner—C. O.

Subject—Beginning—End—Colophon — Author— Same as No. 116.

॥ याज्ञवल्क्यस्मृतिः (सव्याख्या) ॥

No. 118. YĀJÑAVALKYASMṚTI
with commentary.

C. O. L. No. 43.

Substance—Paper. Size—11″ × 8½″. Pages—150. About 20 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—1800. Incomplete.

Owner—C. O.

Subject—Civil laws.

Beginning:

अभिषेकादिगुणयुक्तस्य क्षत्रियस्य प्रजापालनं परमो धर्मः । तच्च दुष्टनिग्रहमन्तरेण न सम्भवति । दुष्टपरिज्ञानं च व्यवहारदर्शनेनेति व्यवहारदर्शनमहरहः कर्तव्यमित्युक्तम्—

व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहम् । इति ।

End:

सर्वेषामेव वर्णानां कोशशुद्धिर्विधीयते ।
सर्वाण्येतानि सर्वेषां ब्राह्मणस्य विषं विना ॥

इति पितामहस्मरणात् । तस्मात् साधारणकाले बहुदिव्यसमवधाने तुलादिनियमार्थमेवेदं वचनम् । कालान्तरे तु तत्तत्कालविहितं सर्वेषाम् । तथाहि वर्षास्वग्निरेव हि सर्वेषां, हेमन्तशिशिरयोस्तु क्षत्रियादित्रयाणामग्निविषयोर्विकल्पः । ब्राह्मणस्य त्वग्निरेव, न कदाचिद् विषम् । 'ब्राह्मणस्य विषं विने'ति प्रतिषेधात् । ग्रीष्मशरदोस्तु सलिलमेव येषां (तव्यासिविभूषणाग्न्य तु व्यधिविशेषणान्यादि?)

Colophon :

Author—Vijñaneśvara.

Remarks—This work throws light on ancient legal procedure. It opens with the Vyavahārādhyāya and ends with the commentary on the 98th verse in Divyaprakaraṇa.

॥ याज्ञवल्क्यस्मृतिः (बालक्रीडोपेता) ॥

No. 119. YĀJÑAVALKYASMṚTIVYĀKHYĀ
with Bālakrīdā.

C. O. L. No. 515.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—137. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1712. Complete.

Owner—C. O.

Remarks—This has been published as No. 74 in T S S.

॥ याज्ञवल्क्यस्मृतिः (सव्याख्या) ॥

No. 120 A. YĀJÑAVALKYASMṚTI
with Mitākṣarā.

C. O. L. No. 421 A.

Substance—Palm leaf. Size—8″ × 1″. Leaves—93. About 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1800. Incomplete.

Owner—E. V. Rāman Nampūri, Āyānkudi, Kaduthurtti.

Subject—Beginning—End—Same as No. 118.

....

Colophon—Nil.

Author—Vijñāneśvara.

Remarks—The pages of this Ms. are marked with letter-numerals.

॥ प्रायश्चित्तम् ॥

No. 120 B. PRĀYAŚCITTAM.

C. O. L. No. 421 B.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1''$. Leaves—38. About 5 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—300.

Owner—Same as No. 120 A.

Subject—Beginning—End—Same as No. 114.

Colophon:

കൊല്ലം ൧൦൨൩-ാമത് എടവമാസം ൧൨-ാംനു ശുക്രവാരവും ചിത്രയും ഏകാദശിയും കൂടിയ ദിവസം എഴുതിത്തീൎത്ത പുതുമനച്ചോമാതിരിയുടെ പ്രായശ്ചിത്തം. ശുഭം. അളകാലോകദീപാ.

समस्तसम्पद्विजयाप्तिहेतवः
समुत्थितापत्कुलधूमकेतवः ।

अपारसंसारसमुद्रसेतव:

पुनन्तु मां ब्राह्मणपादपांसव: ॥

श्रीदुर्गायै नमः । श्रीभूतनाथाय नमः । श्रीभद्रकाल्यै नमः । श्रीदक्षिणामूर्तये नमः । श्रीनृसिंहाय नमः । श्रीकृष्णाय नमः । परब्रह्मणे नमः । शिवम् ।

Remarks—Leaves are in good condition and the script is legible.

॥ याज्ञवल्क्यस्मृतिः (सव्याख्यबालक्रीडोपेता) ॥

No. 121. YAJÑAVALKYASMṚTI with Bālakrīḍā and its commentary.

C. O. L. No. 855.

Substance—Paper. Size—$12\frac{1}{2}'' \times 8''$. Pages—289. 19 lines per page and 25 letters per line. Script—Devanāgarī. No. of Granthas—4100. Incomplete.

Owner—C. O.

Subject—Same as No. 118.

Beginning:

(मू)—योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।

वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः ॥

(बालक्रीडा)—

यो बिभर्ति नमस्तस्मै चन्द्रस्य कलयः कलाम् ।

गौरीगण्डस्थलज्योत्स्नानिष्यन्दगलितामिव ॥

(व्या)—यस्माज्जातं जगद्यस्मिन् लीयते यत्र तिष्ठति।
सच्चिदानन्दवपुषे नमस्तस्मै परात्मने॥
वासुदेवं जगद्योनिं सर्वधीवृत्तसाक्षिणम्।
ब्रह्मविष्णुशिवाह्वानैर्गतं सृष्ट्यादिकर्तृताम्॥
वेदानां मातरं व्यासं विघ्नेशस्कन्दभास्करान्।
नमस्कुर्मो गुरूनाद्यं मनुं योगीश्वरं तथा॥
धर्मवक्तॄन् नमस्यामस्तद्व्याख्यातॄंश्च सत्तमान्।
जैमिनिप्रमुखांश्चान्यान् वेदशास्त्रार्थपारगान्॥
यत्प्रसादादयं लोको धर्ममार्गस्थितः सुखी।
भवभूतिसुरेशाख्यं विश्वरूपं प्रणम्य तम्॥

....
....

प्रारिप्सितधर्मव्याख्यानस्य श्रेयोनिमित्तत्वाद् "बहुर्वै भवती भ्रातृव्य" इति श्रुतेः "श्रेयांसि बहुविघ्नानी" ति च स्मृतेः विघ्नबाहुल्यात् तन्निवृत्त्यर्थं।

"मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम्।
जपतां जुह्वतां चैव विनिपातो न विद्यते॥

इति स्मृतेर्मङ्गलाचारयुक्तानामेवानेकजन्मकृताशुभनिवहनिवृत्तेः स्वधर्मवैगुण्येन सर्वकार्यसिद्धेः शिष्टसमाचाराच्चादौ मङ्गलाचरणं कार्यं मन्वानः "ईशानः सर्वविद्यानाम्" इति श्रुतेः "ज्ञानं महेश्वरादिच्छेद्" इति च स्मृतेः महेश्वरस्वरूपानुसरणनमस्काररूपमङ्गलाचरणं करोति—यो बिभर्तीति।

End :

(बालक्रीडा)—

तथा चाहुः—

अहिंसा सत्यमक्रोधः शौचमिन्द्रियनिग्रहः ।
एष साधारणो धर्मश्चातुर्वर्ण्ये प्रकीर्तितः ॥ इति ॥

सत्यमिति चात्र व्याहृत्युपलक्षितो ब्रह्मयज्ञः परिगृह्यते। सत्यवचनस्येन्द्रियनिग्रहादेव लब्धत्वात् वक्ष्यत्येतत् 'पञ्चयज्ञान् न हापयेदिति। अथवा इज्येति संस्कारोपलक्षणम्। आचार इत्यात्मगुणानाम्। दमादयस्तूदाहरणार्थाः। समानमन्यत्। अपवर्गनिरूपणार्थश्चायं श्लोकः। तदेतदृचाप्युक्तम्--'तमेवं विदित्वातिमृत्युमेती'ति। स्मृतिश्चात्मज्ञानं प्रकृत्याह'तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः' इति। सर्वं चैतत् 'श्रुतिस्मृत्यवसेयमिति तयोः सूक्तं धर्ममूलत्वम्। ननु च श्रुतिस्मृत्योरवबोधकत्वेऽपि पुरुषसामर्थ्यापेक्षया प्रतिभानतोऽर्थनियमः। तथा खल्वेकस्मादेव वाक्यादन्यथा चान्यथा च प्रतिपन्ना दृश्यन्ते। कथं चैवं सति धर्मनिर्णयः। तदुक्तं धर्मस्य 'मूलं निहितं गुहाया'मिति।

(व्याख्या) किञ्च श्रौतकर्मानतिकृतानां शूद्रादीनां तत्राधिकारकल्पनेऽध्ययनादिप्रसङ्गेन कृत्स्नश्रौतकर्माधिकारोऽपि प्रसज्येत । श्रूयते च'तस्माद्यो यज्ञनाग्रवक्लृप्त'इति। अतः स्वमतिपरिकल्पितमेवेदं प्रयोजनमित्याशङ्क्य ब्रह्मयज्ञादिषु शूद्रस्याधिकारे प्रमाणमाह तथा चेति। कथमेषां श्रौतकर्माधिकारोपपत्तिः। उच्यते। चोदनानुसाराद्धि सर्वत्राधिकारः कल्प्यते। दमादयश्चाविशेषतः श्रुतत्वात् सर्वाधिकारा एव। नच श्रुतिविहितत्वमात्रादेव तेषामधिकारः निषाद......रप्यध्ययनानधिकृतस्य श्रौतकर्मानधिकारप्रसङ्गात्। स्मृतेर्वेदमूलत्वात् स्मार्ताधिकारश्च न सर्वसाधारणः स्यात्। तस्माद् वचनानुसारेण सर्वेषां सर्वत्राधिकारिकल्पनमनवद्यमेवेदम्।

Colophon :

Author :

Remarks—This is an explanation of Upotghāta-prakaraṇa in Bālakrīḍā.

॥ वचनमाला ॥

No. 122. VACANAMĀLĀ.

C. O. L. No. 984.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Pages—176. 9 lines per page and 48 letters per line. Script —Malayāḷam. No. of Granthas—4752.

Owner—Tuppan Tuppan Nampūri, Punnorkoṭṭu Manakkal, Kunnattunāḍ Taluk.

Subject—Elucidation of Bālakrīḍā with authoritative citations from Gautama Smṛti etc.

Beginning :

यन्मायाविवशा विदुर्भुवनमात्माभिन्नमप्यन्यथा
यद्विद्याकुशला विदन्ति तदिदं चाभिन्नमेवात्मना ।
कर्तुं यत्किमपीश्वरोऽपि परमः शक्नोति नो यामृते
तां संविन्मयविग्रहामविरतं वन्दे मुकुन्दानुजाम् ॥

अवनम्य मनुसुरेश्वर-
योगीश्वरतीव्रकिरणगुरुचरणान् ।
शास्त्राणां व्याकर्तॄन्
कर्तॄनपि देवता निखिलाः ॥
परमेश्वरस्य परमां
परहितनिरतस्य विश्वरूपस्य ।

रचयामि वचनमालां
विदधतु मदनुग्रहं सन्तः ॥

गौरीकेशादिपादस्तवमपि शतकश्लोकपूर्वार्धपादान्
वृत्तं श्रीरामशौर्योरपि च रचितवान् पूरयन् यः समस्याः ।
सेतुं चैवातिमात्रं रुचिरमभिनवं मेघपद्यान्त्यपादान्
व्याख्यालङ्कारहेतोः सुवचनकुसुमैः साधु बध्नामि मालाम् ॥

अस्यायमर्थः । यः स्वतन्त्रमेव गौरीपादादिकेशस्तवम् अभिनवं सेतुनामधेयं च प्रबन्धं रचितवान् । यश्च सूर्यशतकश्लोकपूर्वार्धपादान् मेघपद्यान्त्यपादांश्च समस्याः पूरयन् श्रीरामशौर्योर्वृत्तं रचितवान् । स विश्वरूपशास्त्रव्याख्यालङ्कारार्थं वचनकुसुमैः मालां साधु बध्नामीति योजना । तत्र च मेघश्लोकान्त्यपादैर्बालकाण्डविषयं शतकश्लोकपूर्वार्धपूर्वपादैरयोध्याकाण्डमारभ्य युद्धकाण्डपर्यन्तविषयं च समस्यारामवृत्तान्तनामधेयं तदुत्तरपादैः समस्याकृष्णलीलानामधेयं च प्रबन्धं रचितवानिति भेदः । अतिमात्रं रुचिरमित्येतत् सर्वविशेषणमिति ।

विभावनेति व्याख्यास्य कृता पूर्वं यतीश्वरैः ।
वेदात्मनामभिः सेयमामूलाग्रविभावना ॥
इत्याशङ्क्य इति व्याख्या टीकेत्यपि च दृश्यते ।
ते साकल्येन नैवास्तामुभे च क्वचिदेव तु ॥
अधुना कृष्णकारुण्याद् रचिता सोमयाजिना ॥
अमृतस्यन्दिनी स्वार्थमरन्दाह्लादिनी सताम् ।
आनैष्ठिकविचारान्तादादौ सा विद्यते ततः ।
कालोऽग्निरित्युपक्रम्य शौरीरान्तरगामिनी ॥

तन्त्रं त्वत्र हि मानवार्थकथनं प्राधान्यतः स्थापितं
तत्प्राधान्यवशेन चायमपरस्मृत्यन्तरार्थान्वयः ।
तत्पद्यैर्मनुनिर्मितैः कृतमतिर्योगीन्द्रपद्यान्वयं
पद्यं पद्यमहं विधातुमपि तु प्रासङ्गिकोऽन्यान्वयः ॥

श्रीमद्देशिकपादपङ्कजरजःपुञ्जावतंसोत्तमः
शर्वाणीचरणाम्बुजप्रचरणक्रीडानिकेतान्तरः ।
विद्वत्पादपयोजपावनपरागावाप्य पुण्योत्सुकः
शास्त्रार्थामृतपानसंभृतरसस्तूष्णीं कथं स्यामहम् ॥

बालक्रीडेति नाम्ना जगति निगदिता विश्रुता विश्वरूपा-
चार्यौज्ञाता महत्या विहितबहुमतिर्याज्ञवल्क्यस्य कृत्या ।
या रेजे वैदिकोढा विमलतरलसत्कीर्तिवासोवृतास्या
बालक्रीडा ममेयं परमत(र?)सखी सन्ततं बोभवीतु ॥

एषा हि वचनमाला निरन्तरा वचननिवहकुसुमेन ।
यदि सान्तरा सुमतिभिः साधु निरूप्यैव परिपूर्या ।
मयैषा रचना कार्या गृह्येत यदियं बुधैः ।
स्तोतुं वा निन्दितुं वा स्याद् व्याख्येयार्थः प्रकाश्यते ॥

भवभूतिनिबन्धनोदधौ तिमिभीमप्रतिवादिके गुरोः ।
स कटाक्षनिरीक्षणप्लवः पतितं मामयमुद्धरिष्यति ॥

यः पद्यैर्मनुयाज्ञवल्क्यरचितैरन्योन्यमापादितः
संबन्धो मणिकाञ्चनैरिव चिरं विद्वद्भिरभ्यर्थितः ।
तद्विश्लेषभयादिवान्यवचनैरन्योन्यसंश्लेषिभिः
पर्यूढः परमोत्सवं न कुरुते केषां द्विषामप्ययम् ॥

क्वचिदत्राविरोधाय प्रयत्नः क्वचिदन्यथा ।

क्वचित् पाठक्रमायैव क्वचित् परमताय च ॥

क्वचित् प्रासङ्गिकायापि क्वचिद्व्याप्त्यर्थमेव च ।

एवमादि विवेक्तव्यं सर्वथा न तु हापयेत् ॥

अभ्युदयार्थिनः पुंसस्तदुपायज्ञानस्थानानि चतुर्दश सन्ति ।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।

पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

इति वायवीयवचनात् । अङ्गानि षट् शिक्षाव्याकरणनिरुक्त-कल्पछन्दोविचितिसंज्ञानि ।

End:

सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश ।

अपि भ्रूणहनं मासान् पुनन्त्यहरहः कृताः ॥

एतदाद्यं तपः श्रेष्ठमेतद्धर्मस्य लक्षणम् ।

सर्वदोषोपघातार्थमेतदेव विशिष्यते ॥ इति ॥

उदाहरणार्थं चैतत् । स्मृत्यन्तरेभ्यश्चान्विष्योदाहर्तव्यम् । ग्रन्थ-गौरवभयान्न प्रपञ्चितम् । प्राणानित्यादि ।

Colophon—Nil.

Author:

Remarks—This work does not give any clue to the name of its author. It contains only a portion of *Brahmacāriprakaraṇa* of the commentary Bālakṛīda on Yājñavalkyasmṛti. In the course of the work are mentioned Vibhāvana of Vedātman, Tīka and Amṛtasyandinī, other commentaries on Bālakṛīdā. For further

information see introduction to No. 74 of the T S S.

॥ विवादभङ्गार्णवः ॥

No. 123. VIVĀDABHAṄGĀRṆAVA.

C. O. L. No. 1053.

Substance—Palm leaf. Size—$19\frac{3}{8}'' \times 2\frac{1}{4}''$. Leaves—202. 13 lines per page and 88 letters per line. Script—Grantha. No. of Granthas—13700. Incomplete.

Owner—Rāja of Cirakkal.

Subject—Settlement of disputed rights.

Beginning:

श्रीमते हयग्रीवाय नमः । अथ दायभागः । तत्र नारदः—

"विवादोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥"

यत्र यस्मिन् व्यवहारपदे प्रकल्प्यते क्रियत इति रत्नाकरः । पितृत आगतं पित्र्यम् । तच्च पितृमरणोपजातस्वत्वमुच्यते । पित्र्यस्येति पुत्रैरिति द्वयमपि सम्बन्धिमात्रोपलक्षणम् । सम्बन्धिमात्रधनविभागेऽपि दायभागपदप्रयोगात् । अत एव दायभागविभागपदमुपक्रम्य नारदोऽपि मात्रादिधनविभागमप्युपदर्शितवान् । तथा मनुरपि पित्र्यादिपदमदत्त्वैव,

"एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसं(ज्ञकः?हितः) ।
आपद्यपत्यप्राप्तिश्च दायभागं निबोधत ॥"

इत्युपक्रम्य यावत्सम्बन्धिधनविभागमुक्तवानिति ।

End:

तथाच समं निष्कलं पितामहस्य सकलमृणं पौत्रेण निष्कलं देयम् । पितुः प्रातिभाव्यगतमृणं पौत्रेण निष्कलं देयमिति रत्नाकरः । अत्र पितामहस्य सकलमृणमिति पितामहेन वृद्धिं स्वीकृत्य यदृणं गृहीतमित्यर्थः । तत्सुतौ पौत्रपुत्राः पुत्रपुत्रश्च । पितामहर्णं प्रपौत्रो न दद्यात् । पितामहप्रातिभाव्यगतं पौत्रो न दद्यादित्यर्थः । कात्यायनोऽपि—

प्रातिभाव्यगतं पौत्रैर्दातव्यं न तु तत् क्वचित् ।
पुत्रेणापि समं देयमृणं सर्वत्र पैतृकम् ॥

पितामहप्रातिभाव्यगतमृणं पौत्रेर्न देयम् । पुत्रेण तु ।

Colophon:

(१)इति पञ्चमे दायविभागद्वीपे वज्राभिधानं प्रथमरत्नम् । इति ज्येष्ठांशविवेचनम् । (18th leaf).

(२) परिच्छेदातीताखिलविद्याधरपरिशीलनविमलीकृतपालश्रीकूलप्रसूतजाह्नवीसमलंकृतत्रिवेणीनिलयश्रीरुद्रतर्कवाणीशभट्टाचार्यात्मजश्रीजगन्नाथतर्कपञ्चाननभट्टाचार्यविरचिते विवादभङ्गार्णवे दायभागद्वीपे द्वितीयमत्यवदातं मौलिकरत्नम् । (34th leaf).

Author—Śrī Jagannāthatarkapañcānanabhaṭṭacārya, son of Rudratarkavāṇīśa who flourished during the close of the 18th century.

Remarks—The work is divided into five *Dvīpas*. The first *Dvīpa* is divided into 9 sub-divisions called *Ratnas*, the second into two and the third into seven. The seventh *Ratna* in the third *Dvīpa* is incomplete.

॥ वैखानसधर्मसूत्रम् (सभाष्यम्) ॥

No. 124. VAIKHĀNASADHARMASŪTRAM with commentary.

C. O. L. No. 234.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—84. About 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1000. Complete.

Owner—C. O.

Subject—The different rights and duties of persons belonging to different Varṇas.

Beginning:

स्मार्तं सर्वं प्रभाष्याथ रामं नत्वाहमच्चित् ।
तद्वर्णाश्रमधर्मस्य भाष्यं वक्ष्यामि सम्प्रति ॥

स्मार्तं निषेकादिप्रायश्चित्तमुक्त्वेदानीं तद्दृढीकरणार्थं तद्धर्ममाह—अथ वर्णाश्रमधर्मम् । अथशब्द आरम्भार्थः । वर्णाश्रमधर्ममारभ्यत इति । वर्णश्च आश्रमश्च धर्मश्च गुणधर्मश्च निमित्तधर्मश्च तद्वर्णाश्रमधर्मम् । अष्टमे ब्राह्मणमुपनयीतेत्यादिर्वर्णधर्मः ।

समिद्धोमभैक्षाचर्याद्याश्रमधर्मः । पाशुपाल्यादयो गुणधर्माः प्राय-
श्चित्तादयो निमित्तधर्मा इति ।

End;

समस्तविशेषगुणोच्छेदे सुस्तारावस्थायामाकाशवदात्मनोऽत्य-
न्तावस्थानेऽक्षोऽक्ष इति वैशेषिकास्तदनुपपन्नं सुखदुःखयोर्विना-
भावित्वेन पानोत्पत्तेः(?) । तस्मात् परमानन्दस्वरूपिणा ब्रह्मणा
सहान्तावस्थानमेव मोक्षः ।

आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते ।

'विज्ञानमानन्दं ब्रह्मे'त्यादिश्रुतेः । इह ग्रन्थविस्तरभीत्या मया
स्थूलमात्रमुक्तम् । अन्यदखिलं तच्छास्त्रेषु वेदितव्यम् ।

Colophon :

इति वाजपेययाजीये श्रीवैखानससूत्रभाष्ये षट्पटले
योगशास्त्रमोक्षोपयोगः परिसमाप्तः ।

माधवाचार्यपुत्रेण नृसिंहाग्निचिता कृते ।
वाजपेयकृता भाष्ये प्रश्नमष्टमनिर्गतः ? ॥
गोष्ठीपुरे निवसितं सौम्यनारायणं गुरुम् ।
नत्वा भाष्यं तु सूत्रस्य लिखितं रामशर्मणा ॥

* * * *

दृष्ट्वा शास्त्रबहूनिकान् तदपरं निष्ठे च नान्यं परं (?)
श्रीसौम्यस्य च पूजने च निरतं लोकेषु विख्यातितम् ? ।
भूम्यामालयजीर्णकान् बहुविधानुद्धारणे चाग्र्यज-
श्रीगोष्ठीपुरवासिनं तमनघं वन्दे च सौम्यं गुरुम् ॥

Author—Nṛsimhāgnicit, son of Mādhavācārya.

Remarks—The work consists of 6 *paṭalas* and extends from *Varṇāśramadharma* to the attainment of *Mokṣa.*

॥ व्यवहारमाला ॥

No. 125. VYAVAHĀRAMĀLĀ.

C. O. L. No. 457.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—224. About 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—2100. Complete.

Owner—C. O.

Subject—Details of litigation.

Beginning—End—Same as No. 71, D C S M, M P L, Vol. I.

Colophon :

प्रकीर्णकम् ।

व्यवहारमाला समाप्ता ।

... ...

Author :

Remarks—The work contains the views of Nārada, Kātyāyana, Manu, Bṛhaspati, Vyāsa, Yājñavalkya, Prajāpati, Hārīta etc., on the duties of different officials.

॥ षट्कर्मनिरूपणम् ॥

No. 126. ṢAṬKARMANIRŪPAṆAM.

C. O. L. No. 768.

Substance—Paper. Size—$11\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—308. About 20 lines per page and 30 letters per line. Script—Devanāgarī. No. of Granthas—5700. Incomplete.

Owner—C. O.

Subject—The six karmas prescribed for a person's subsistence.

Beginning :

... ...स्पतिः ।
बहवो वर्धनोपाया ऋषिभिः परिकीर्तिताः ।
सर्वेषामपि चैतेषां कुसीदमधिकं विदुः ॥
अनावृष्टया राजभयान्मूषिकाद्यैरुपद्रवैः ।
कृष्यादिके भवेद्धानिः सा कुसीदे न विद्यते ॥
शुक्लपक्षे तथा कृष्णे रजन्यां दिवसेऽपिवा ।
उष्णे वर्षति शीते वा वर्तते न निवर्तते ॥
देशं गतानां या वृद्धिर्न सा पण्योपजीविनाम् ।
कुसीदं कुर्वतः सम्यक् सा च तस्यैव जायते ॥
एवं च ब्राह्मणः सीदन् जीवेत् क्षात्रेण कर्मणा ।
जीवेदलाभे तु विशां न वा शूद्रेण च स्थितः ॥
इति मनुः ।

End :

आपस्तम्बः—अविहिता ब्राह्मणस्य वणिज्या । आपदि

व्यवहरेत पण्यानाम् । अपण्यानि व्युदस्य......मनुष्यान् रसान् रागान् गन्धानन्नं चर्म गवां वशां श्लेष्मोदके तोक्मकिण्वे पिप्पलीमरीचे धान्यं मांसमायुधं सुकृताशां च तिलतण्डुलांस्त्वेव ।

Colophon :

Author :

Remarks—The work opens with a description of gifts and donations. The details of marriage and the adoption of children are also dealt with. Some portion in the beginning is missing.

॥ स्मार्त्तप्रायश्चित्तम् ॥

No. 127. SMĀRTTAPRĀYAŚCITTAM.

C. O. L. No. 375.

Substance—Palm leaf. Size—10″ × 2″. Leaves—107. About 10 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—2900. Complete.

Owner—Citran Nampūri, Vezhapparampu, Paiūr.

Subject—The observances followed by Bahvṛcas and the penalties for the infringement of religious rules.

Beginning :

श्रीमन्तं दक्षिणामूर्तिं विघ्नेशं भारतीं गुरून् ।
नमामि पुरुषार्थाः स्युर्यत्प्रसादेन देहिनाम् ॥

बोधायनं जैमिनिं च कौषीतक्याश्वलायनौ ।
वाधूलकापस्तम्बादीन् नौमि शाखाप्रवर्तकान् ॥
तत्प्रोक्तकल्पसूत्रादिव्याख्यानकृतमानसान् ।
आचार्यानपि सिद्धान्तिभवस्वामिमुखान् भजे ॥
प्रायश्चित्तं पुरा प्रोक्तमृग्यजुःसामवेदिनाम् ।
स्मार्तं तदेव संक्षिप्य बह्वृचानां विभज्यते ।
विनाशः प्राय इत्युक्तश्चित्तं सन्धानमुच्यते ।
विनष्टस्य तु सन्धानं प्रायश्चित्तपदेरितम् ॥

End:

सन्ध्योपास्त्यादिनित्यानि कुर्यात् काम्यानि नाचरेत् ।
सहस्रकृत्वः पक्षादिसामत्रितयमेव वा ॥
पक्षाद्यन्तसमन्तान्त्यमभ्यसेदथवासकृत् ।
आदौ सङ्कल्पितं यावत्तावत्यभ्यसने कृते ।
विप्रेभ्योऽन्नादिकं दद्यादश्नीयादथ च स्वयम् ॥
अनश्नन् संहिताकल्पं यः करोति यथोदितम् ।
सर्वान् कामानवाप्यासौ ब्रह्मलोके महीयते ॥

Colophon:

इति स्मार्तप्रायश्चित्ते जैमिनीयविशेषकथनं नाम एकादशोऽध्यायः ।

Author:

Remarks—This work comprises eleven chapters. It throws light on many *acāras* prevalent in Keraḷa in ancient times. It is written in easy and elegant style. Since the author's tutelary deity is said to be Dakṣiṇāmūrti he may

be identical with Taikāṭṭu Vaidikan, an authority on Veda.

॥ स्मार्तप्रायश्चित्तम् ॥

No. 128. SMĀRTTAPRĀYAŚCITTAM.

C. O. L. No. 1677.

Substance—Palm leaf. Size—11″ × 1¾″. Leaves—109. 10 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—3052. Complete.

Owner—Parameśvaran Nampūrippād, Kaḍuttu-rutti, Vaikom.

Subject—Expiatory rites for shortcomings in the performance of *Smārta Karmas.*

Beginning—Same as No. 89.

End:

स्त्रीणां नामसु दान्तत्वं न भवेज्जैमिनेर्मते ।
कौषीतकिमते तूक्तन्यायभेदः क्वचिद् भवेत् ॥
स्त्रीणां नाम कृतौ नाम कृतं दान्तं हि यद्यपि ।
प्रतिश्रुताख्ये होमे च द्वितीये सेककर्मणि ॥
नामोक्तौ दान्तता न स्यात्तथा वृत्तिकृदुक्तितः ।

Colophon:

इति स्मार्तप्रायाश्चित्ते नवमोऽध्यायः ।

Author:

Remarks—This work contains 9 chapters Maṇi-pravāḷa verses of the type of:

അപ്പയെന്നോരു പെണ്ണിൻ പേക്ഷയാ സംസ്കൃതം ഭവേത്
ഗോപാലികാ സ്യാത് കോപാലിപ്പെണ്ണ് കോതാലിയെങ്കിലും

found in the end furnish Sanskrit equivalents of colloquial names for the performance of *Vedic Karmas.*

॥ स्मार्तप्रायश्चित्तम् ॥

No. 129 A. SMĀRTTAPRĀYAŚCITTAM.

C. O. L. No. 722 A.

Substance—Palm leaf. Size—9¾″ × 1¾″. Leaves—147. About 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—3300. Incomplete.

Owner—Maheśvaran Bhaṭṭatiri, Tiruvalla, Travancore.

Subject—Same as No. 128.

Beginning—Same as No. 89.

End—Same as No. 128.

Colophon:

Author:

Remarks—Incorrect readings are found in abundance in this Ms.

॥ आशौचाष्टकम् (भाषा) ॥

No. 129 B. ĀŚAUCĀṢṬAKAM.

C. O. L. No. 722 B.

Substance—Palm leaf. Size—9¾″ × 1¾″. Leaves—5.

9 lines per page and 40 letters per line. Script —Malayāḷam. No. of Granthas—100.

Owner—Same as No. 129 A.

Subject—Details of pollution.

Beginning:

आशौचाष्टककर्तारं नत्वा वररुचिं मुनिम् ।
तदर्थो लिख्यतेऽस्माभिः पद्यैर्भाषावलम्बिभिः ॥

തന്നോട്ടുകൂടെപ്പൂരുഷാന്തരങ്ങ-
ളേഴേഴ്കീഴേലപി തേ സപിണ്ഡാഃ ।
പിന്നെസ്സമാനോദകരെന്നു് സംജ്ഞാം
വദന്തി സന്തഃ പതിനൊന്നിനോളം. ॥

End:

ബാലാശൌചങ്ങൾ കൊൾവില്ല ബാന്ധവന്മാരൊരുത്തരും
ശിവപേരുക്ക് തെക്കുള്ളോർ വടക്കു....മൂന്നുനാൾ
ബാലതോ ഗുരുച്ചേദേകമവരഞ്ജാതിതോ യദി
ശാപസ്യാപി ലഘുത്വം സ്യാത് പ്രബലം കാലതോ ഗുരുഃ
ഭ്രാതുസ്സുതേ ദത്തപുത്രേ സപത്നീതനയേപി ച
ഭർത്തുർഭ്രാതരി ച പ്രേതേ സപിണ്ഡവദഘം ഭവേത്

उपनीयस्तु यः शिष्यं वेदमध्यापयेद् द्विजः
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते

Colophon:

Author:

Remarks—Towards the end of the work, the method of finding out *Khaṇḍa* and *Dhruva* is mentioned. Vararuci's Āśaucāṣṭakam has been published as No. 37 in the T S S.

॥ स्मार्तप्रायश्चित्तम् ॥

No. 130. SMĀRTTAPRĀYAŚCITTAM.

C. O. L. No. 1931.

Substance—Palm leaf. Size—11″ × 2″. Pages—145. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2900. Complete.

Owner—Govindan Potti, Putumana Maṭham, Harippād.

Subject—Same as No. 127.

Beginning—Same as No. 127 excluding the following stanza:

श्रीकैलासे शुकाद्यैः शिवकरवटमूले निषण्णो निषेव्यः
कृत्वोरौ वामपादं किसलयमृदुलं दक्षिणे दक्षवैरी ।
बिभ्राणो दोर्भिरक्षस्रजममृतघटं पुस्तकं ज्ञानमुद्रां
भूयाद् भुक्त्यै च मुक्त्यै मम रजतनिभो दक्षिणामूर्तिशम्भुः ॥

End:

गुरून् प्रणम्य विघ्नेशं वाणीं च स्मार्तनिष्कृतौ ।
अध्यायार्थक्रमं वक्ष्ये सद्यो विज्ञानसिद्धये ॥
चित्तं नान्दीमुखस्याग्रेः संस्कृतेश्चाङ्गकर्मणः
क्रमेण प्रतिपत्तेश्च प्रथमेऽध्याय उच्यते ॥
हविर्हवनतद्दोषमध्यगत्यग्निनाशजम् ।
चन्द्रसूर्यग्रहाशौचपात्रकृत्यं द्वितीयके ॥

विवाहविषयं तत्र चाशौचरजसोः पथि ।
द्वितीयहोमदीक्षाग्निदोषचित्तं तृतीयके ॥
पञ्चयज्ञश्च दर्शादिस्थालीपाकश्च नैत्यकः ।
नैमित्तिकाः स्युरुद्वाहो द्वितीयादिचतुर्थके ॥
गार्भिकेष्वत्र चाशौचे जातसंस्कृतिकर्मसु ।
चौलान्तेषूदितं चित्तमध्याये पञ्चमे भवेत् ॥
उपनीतिविधेश्चित्तं तत्राशौचे गुरोरपि ।
तदूर्ध्ववर्तिसन्ध्यादेर्व्रात्यस्यापि च षष्ठके ॥
नैमित्तिकोपनीत्यादिकृच्छ्रचान्द्रायणावधि
वटोश्चापि क्रमादुक्तं सप्तमेऽत्र विधीयते
उपाकृतिर्व्रतस्नानं संस्काराश्च दयादयः ।
उत्पातगणकूश्माण्डहोमश्चाष्टम उच्यते ॥
पित्र्यप्रेतविधिः शान्तिहोमस्त्रीयमृतिभ्रमात्
दाहादिकरणे तस्य कृत्यं नवम उच्यते ॥
ग्रहशान्तिरथ स्मार्ते भेदो बौधायनस्य तु
नारायणबलिश्चेति दशमेऽत्र विधीयते ॥
जैमिनेश्चात्र भेदोक्तिर्गृहशान्तिरथादरात् ।
अनश्नन् संहिताकल्पश्चरमेऽध्याय उच्यते ॥

Colophon :

इति बह्वृचस्मार्तप्रायश्चित्ते द्वादशोऽध्यायः

൧൯ മേടം ൯-൧൦൬ എഴുതിത്തിൎന്നു. സുബ്രഹ്മണ്യോരക്ഷതു. മുട്ടത്തു പുതുമനവക ഏൎക്കര പ്രായശ്ചിത്തം.

श्रीमहात्रिपुरसुन्दरीसमेतश्रीमहादेवाय नमः ।

Author:

Remarks—The work contains 12 chapters. In the 12th chapter the subject-matter is codified. The closing portion of the Ms. deals with the details of आतुरस्नानं in Malayāḷam. This is a different work from No. 127.

॥ स्मार्तप्रायश्चित्तम् ॥

No. 131. SMĀRTTAPRĀYAŚCITTAM.

O. L. No. 2308.

Substance—Palm leaf. Size—$9\frac{1}{4}'' \times 2''$. Leaves—119. 7—9 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Owner—Vāsudevan Nārāyaṇan Nampūri, Mūvāttupuzha.

Subject—Beginning—End—Colophon—Same as No. 127.

Author:

Remarks—Another work known as Bhāvārtha Dīpikā, a commentary on the 10th skandha of the Bhāgavata is included herein. The Ms. is much damaged.

॥ स्मार्तप्रायश्चित्तम् ॥

No. 132. SMĀRTAPRĀYAŚCITTAM.

C. O. L. No. 191.

Substance—Paper. Size—11″ x 9″. Pages—61.
About 20 lines per page and 16 letters per line.
Script—Devanāgarī. No. of Granthas—610.
Incomplete.

Owner—C. O.

Subject—Beginning—Same as No. 128.

End :

अत्राश्वलायन......त्रिः समूह्य परिषेचनम् ।
कर्ममध्ये रजःप्राप्तौ पत्न्यास्तद्विधिरुच्यते ॥
तत्र कौषीतकानां प्राग्विवाहे सप्तमाद्रजः ?
रजःप्राप्तौ कृतं कर्म सन्त्यज्यावर्तनं भवेत् ॥
नोदकेन च वाचा वा कन्यायाः पतिरुच्यते ।
पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे ॥
पाणिग्रहणम... ....॥

Colophon :

इति स्मार्तप्रायश्चित्ते द्वितीयोऽध्यायः ।

Author :

Remarks—The Ms. comprises the first two chapters and a portion of the 3rd.

॥ स्मार्तप्रायश्चित्तविमर्शिनी ॥

No. 133. SMĀRTAPRĀYAŚCITTAVIMARŚINĪ.

C. O. L. No. 125.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—168. 19 lines per page and 16 letters per line. Script—Davanāgarī. No. of Granthas—1600.

Owner—C. O.

Subject—Same as No. 128.

Beginning:

बोधायनं च मन्वादीनाश्वलायनमेव च ।
प्रणम्य क्रियते स्मार्तप्रायश्चित्तविमर्शिनी ॥
वसाशुक्लमसृङ्मज्जाविण्मूत्रव्रणजं जलम् ।
पूयमांसरसास्थीनि नराणां गृहमेव च ॥
होमानर्ह... ... ...गर्दभौ श्वापशूद्रकाः ।
रजस्वला च पतितः सूतिकादाहकस्तथा ॥
अत्यन्ताशुद्धविप्राश्च चण्डालाश्चेति कीर्तिताः ।
तार्तीयकोपसृष्टिश्चेदेषामग्निर्विनश्यति ॥

End:

रजस्वला यदि स्नाता पुनरेव रजस्वला ।
अष्टादशदिनादर्वागशुचित्वं न विद्यते ॥
स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।
पात्रान्तरेण तोयेन स्नानं कृत्वा व्रतं चरेत् ॥
सिक्तपात्रा भवेदद्भिः साङ्गोपाङ्गा कथञ्चन ।
न वधूपीडनं कुर्यान्नान्यद्वासश्च धारयेत् ॥

ज्वराभिभूता या नारी रजसा च परिप्लुता ।
कथं तस्या भवेच्छौचं शुद्धिः स्यात् केन कर्मणा ॥
चतुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियम् ।
सा सचेलावगाह्याप्सु पुनः स्नात्वा तु तां स्पृशेत् ॥
दशद्वादशकृत्वो वा आचमेच्च पुनः पुनः ।
अन्ते च वाससस्त्यागस्ततश्शुद्धा भवेत्तु सा ॥
दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यति ।

Colophon :

Author :

Remarks—This commentary is composed in verse to facilitate conning.

॥ स्मार्तप्रायश्चित्तविमार्शिनी ॥

No. 134. SMĀRTAPRĀYAŚCITTAVIMARŚINĪ.

C. O. L. No. 947.

Substance—Paper. Size—11″ × 9″. Pages—158. About 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—2370.

Owner—C. O.

Subject—Same as No. 128.

Beginning :

बोधायनं च मन्वादीनाश्वलायनमेव च ।
प्रणम्य क्रियते स्मार्तप्रायश्चित्तविमर्शिनी ॥
तत्र प्रथममग्निनाशकदोषा उच्यन्ते । तत्र बोधायनो यज्ञ-

प्रायश्चित्ते एवमाह—'अथातोऽरण्योर्व्यापत्तिं व्याख्यास्यामोऽष्टा-भिर्निमित्तैः विनश्यत्यमेध्यश्च चण्डालशूद्रवायसपतितरासभरज-स्वलाभिश्च संस्पर्शनेऽरण्योर्विनाश' इति। अत्रारणिविनाशेनाग्नि-विनाशोऽप्युक्तः। उभयोः कार्यकारणसम्बन्धसद्भावात्। तदुक्तं प्रायश्चित्तसमुच्चये–'अरणिविनाशेनाग्निविनाश उक्त' इति।

End:

न पुरस्तात् परिदधातीति श्रुतेः प्राग्दिशि परिध्यभावात् तत्राङ्गारस्कन्दने परिस्तरणाद् बहिश्चरणात् प्रायश्चित्तमेवं कर्तव्यम्। तथा च सिद्धान्ती बहिष्परिधीत्यत्र परिध्यभावेऽपि तद्वदुपचारः प्रत्येतव्य इति। परिधिनिधानादूर्ध्वं प्रयाजेभ्यः पूर्वमङ्गारस्कन्दने... ... ...
... ...

Colophon:

इति स्मार्तप्रायश्चित्तविमर्शिन्यां प्रथमः परिच्छेदः।

Author—Nārāyaṇan.

Remarks—This is in prose unlike the previous work.

॥ स्मार्तप्रायश्चित्तविमर्शिनी ॥

No. 135. SMĀRTAPRĀYAŚCITTAVIMARŚINĪ.

C. O. L. No. 988.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 2''$. Leaves—156. About 11 lines per page and 60 letters

per line. Script—Malayāḷam. No. of Granthas—6800. Complete.

Owner—Same as No. 122.

Subject—Same as No. 128.

Beginning—Same as No. 134.

End:

एवं सामान्येन कर्मणामस(त्य?म्य)क्त्वे प्रायश्चित्तमुक्तम् । अनेन न्यायेन सर्वत्रापि प्रायश्चित्तमूह्यम् । विषयाणामानन्त्याद् अस्माकमल्पप्रज्ञत्वाद्वा तत् कृत्स्नशो वक्तुं न शक्यम् । तदुक्तं प्रयोगसारे—

"वचनन्यायमार्गस्य कः क्षणः कृत्स्ननिर्णये ।
मुनिर्वेदास्तदग्वापि किमुतान्यत्र सम्भवः" ॥ इति ॥

अत एवान्यानि धर्मशास्त्राण्यप्यध्येतव्यानि । अन्यथा दोषस्मरणात् । तदुक्तं ब्रह्मपुराणे—

"धर्मशास्त्राण्यविज्ञाय प्रायश्चित्तं ददाति यः ।
राजयक्ष्मा भवेत् तस्य रोगपीडाविदारणः" ॥ इति ॥

Colophon:

विश्वामित्रजदेवरातमुनिसम्भूतो दलस्यान्वये
ग्रामे चापि महावने महिषपूर्वे मङ्गलाख्ये गृहे ।
जातः शङ्करनन्दनो गणितविन्नारायणाख्यो द्विजः
प्रायश्चित्तविमर्शिनीमरचयत् स्मार्तापराधेष्विमाम् ॥

इति नारायणीये स्मार्तप्रायश्चित्तविमर्शिन्यां पञ्चमः परिच्छेदः । समाप्तोऽयं पञ्चमः परिच्छेदः ।

Author—Mazhamaṅgalam Nārāyaṇan Nampūri.

Remarks—The movement of the planets and the effects thereof are calculated usually by

Parahitagaṇita. The author found out the inherent defects of that system and revolutionized the astrological science by the invention of Dṛggaṇita. He may be identical with the inventor of that new method of computation.

॥ स्मार्तप्रायश्चित्तसंग्रहः ॥

No. 136. SMĀRTAPRĀYAŚCITTASAṄGRAHA.

C. O. L. No. 2251.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—150. About 12 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—5625. Complete.

Owner—Maṇiyar Kṛṣṇa Bhaṭṭatiri Budhanūr, Ceṅṅannūr.

Subject—Same as No. 128.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

गुरुपादाम्बुजद्वन्द्वं नमस्कार्यतमं मया ।

नत्वा विलिख्यते स्मार्तप्रायश्चित्तस्य सङ्ग्रहः ॥

तत्र तावत् प्रथमतो वक्ष्ये निष्कृतिषूदिताः ।

क्रियाः सतन्मन्त्रगणाः सनिमित्ताश्च तद्यथा ॥

(भाषा)

അവിടെ നടെ ഇന്ന നിമിത്തമുണ്ടാകയാൽ ഇന്ന ക്രിയചെ

യ്യണമെന്ന യജ്ഞപ്രായശ്ചിത്താദികളിൽ ചൊല്ലിക്കിടക്കുന്ന

ക്രിയകളും അതിൻെറ മന്ത്രഗണങ്ങളും യാവ ചിലവ അവറ്റെറ നടെ ചൊല്ലുന്നു. അതു് ഏതുപ്രകാരമെന്നു്.

End :

द्विशस्त्रिशो वातिपणे प्रतिहोमं तु पूर्णया ।
पूर्णाहुतिमनस्वत्या सप्तहोत्रा ततः परम् ॥

രണ്ടുതാൻ മൂന്നുതാൻ മുട്ടുകിൽ പ്രതി ഹോമം. പൂർണ്ണാഹുതി പിന്നെ മനസ്വതികൊണ്ടും സപ്തഹോതനെക്കൊണ്ടും ഇങ്ങനെ മൂന്നുപൂർണ്ണാഹുതി (ശ്രീരാമ).

Colophon—Nil.

Author:

Remarks—This Ms. includes the Smārtaprāyaś-citta and its commentary in Malayāḷam.

॥ स्मृतिमाणिक्यमालिका ॥

No. 137. SMṚTIMĀṆIKYAMĀLIKĀ.

C. O. L. No. 1988.

Substance—Palm leaf. Size—$18\frac{1}{4}'' \times 1\frac{3}{8}''$. Leaves—165. About 7 lines per page and 68—70 letters per line. Script—Grantha. No. of Granthas—4400. Incomplete.

Owner—S. Nīlacaṇṭha Iyer, Kariyamāṇikyapuram.

Subject—Daily duties pertaining to different castes.

Beginning:

यस्याङ्घ्रिपद्मं सेवन्ते सर्वे स्वाभीष्टसिद्धये ।

तं गणाधिपतिं वन्दे सर्वप्रत्यूहशान्तये ॥

नमस्क्रिया यस्य सकृत्प्रयुक्ता
दत्ते स्म राज्यं विमतानुजाय ।
यस्याङ्घ्रिपद्मप्रभवः परागः
पाषाणमेणीदृशमाततान ॥

कृपासमुद्रं कृतधर्मसेतुं
तं जानकीशं प्रणमामि नित्यम् ।
श्रीमहाकालवसतिः सुधीर्वाधूलवंशजः
वैद्यनाथाध्वरी कुर्वे स्मृतिमाणिक्यमालिकाम्

अथैतत्प्रतिपाद्यधर्मस्य इतिहासपुराणमन्वादिप्रणीतशास्त्राणामेव प्रमाणत्वात् तदुपयोगितया तत्प्रणेतारः तानि चेतिहासपुराणानि प्रथमं निरूप्यन्ते ।

तत्र याज्ञवल्क्यः—

End:

उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् ।
कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वा ॥
ब्रह्माण्डोदरमध्ये तु यानि क्षुद्रानि सन्ति वै ।
संस्थितानि भवन्तीह भूतायां पारणे कृते ॥
तिथीनामेव सर्वासामुपवासव्रतादिषु ।
क्रियान्ते पारणं कुर्याद्विना शिवचतुर्दशीम् ॥ इति ॥

बाढमस्ति । तद् द्विविधं शास्त्रम् । तस्य च द्विविधस्य शास्त्रस्य प्रतिपत्प्रकरणोक्तन्यायेन व्यवस्था द्रष्टव्या । यदा यामत्रयादर्वागेव चतुर्दशी समाप्यते, तदा तिथ्यन्ते पारणम् । यदा चतुर्दशी यामत्रयमतिक्रामति, तदा चतुर्दशीमध्ये पूर्वाह्णे वा पारणं कुर्यात् ।

इति चतुर्दशीनिर्णयः ।

Colophon:

Author—Vaidyanāthadīkṣita.

Remarks—The Ms. is damaged.

॥ स्मृतिमाणिक्यमालिका ॥

No. 138. SMṚTIMĀṆIKYAMĀLIKĀ.

C. O. L. No. 2008.

Substance—Palm leaf. Size—$16\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—117. 10 lines per page and 48—50 letters per line. Script—Grantha. No. of Granthas—3700.

Owner—A. Rāmasubba Iyer, Āyikkudi.

Subject—Beginning—Same as No. 137.

End:

वसीत चर्म चीरं वा सायं स्नायात् प्रगे तथा ।
जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ॥
यद्भक्षः स्यात् ततो दद्यात् बलिं भिक्षां च शक्तितः ।
अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतम् ॥
स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः ।
दाता नित्यमनादाता सर्वभूतानुकम्पनः ॥
वैतानिकं च जुहुयादग्निहोत्रं यथाविधि ।
दशमं स्कन्दयन् पर्व पौर्णमासं च योगतः ॥

ऋक्षेष्टया ग्रहणे चैव चातुर्मास्यानि चाहरेत् ।
तुरायणं च क्रमशो दक्षस्यायनमेव च ॥

ऋक्षेष्टिस्तुरायणं संवत्सरसाध्यः क्रतुविशेषः । दाक्षायणं दर्शत्रिकृतिः । क्रमशः तत्र काले

सुस्वन्नशारदैर्मध्यैर्मुन्यन्नैः स्वयमाहृतैः ।
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत् पृथक् ॥

Colophon :

Author—Same as No. 137.

Remarks—This Ms. is worn-out. It is written in neat legible hand.

॥ स्मृतिमाणिक्यमालिका ॥

No. 139. SMṚTIMĀṆIKYAMĀLIKĀ.

C. O. L. No. 2032.

Substance—Palm leaf. Size—18½″×1½″. Leaves—149. 8 lines per page and about 60 letters per line. Script—Grantha. No. of Granthas—4500. Complete.

Owner—Cintāmaṇi Śāstrial Yajñeśvara Śāstrial.

Subject—Beginning—Same as No. 137.

End :

एवं विष्णुभादियोग उपवासादौ अस्तमयव्यापी ग्राह्यः दान-

व्रतयोरुदयादिति । मुहूर्त.........बावादिकारणानां तिथ्यर्धपरि-
मितत्वेन दिनद्वयव्यापित्वसन्देहो भावा.........,मये...,
नेकरण.........क्रान्तिग्रहणादिकाले नैमित्तिकस्नानादिप्रकरणे
निरूपितः

Colophon :

इति श्रीवैद्यनाथदीक्षितविरचितस्मृतिमाणिक्यमालायां
नक्षत्रादिनिर्णयः समाप्तः ॥ श्रीरामचन्द्राय नमः ।

Author—Same as No. 137.

Remarks—In addition to the subject-matter contained in No. 137. Parvaṇiyoga and Nakṣatrādinirṇaya are dealt with in this work.

॥ स्मृतिमाणिक्यमालिका ॥

No. 140. SMṚTIMĀṆIKYAMĀLIKĀ.

C. O. L. No. 2382.

Substance—Palm leaf. Size—$17\frac{1}{4}'' \times 1\frac{3}{8}''$. Leaves—53. 9—11 lines per page and about 62 letters per line. Script—Grantha. No. of Granthas 2100. Complete.

Owner—Kāśī Vādhyār of Mahādānapuram.

Subject— Application of rules regarding the performance of Śrāddha.

Beginning :

हरिः । ओं । ओं । सोदकुम्भविधिमाह गौतमः—

अदैवं पार्वणं श्राद्धं सोदकुम्भमधर्मकम् ।
कुर्यात् प्रत्याब्दिकश्राद्धात् सङ्कल्पविधिनान्वहम् ॥

अदैवं विश्वेदेवविष्णुरहितम् । पार्वणं त्रिपुरुषात्मकम् । सोदकुम्भं उदकुम्भसाहितम् । अधर्मकं दन्तधावनताम्बूलादिवर्जनपुनर्भोजनादिवर्जनरूपककुम्भोक्तधर्मरहितं सङ्कल्पविधिना।

आवाहनाग्नौ करणं स्वधानिनयनं तथा ।
विकिरं पिण्डदानं च सङ्कल्पे पञ्च वर्जयेत् ॥
इत्युक्तविधिना आब्दिकश्राद्धात् पूर्वं प्रत्यहं कुर्यादित्यर्थः ।

End :

येनाग्नौ करणं कुर्यात् पिण्डस्तेनैव निर्वपेत् ।

होमपिण्डदानसन्नियोगशिष्टत्वादवधारणाच्च सङ्कल्पयाने त्वग्नौ होमाभावे पिण्डदानं नास्तीति गम्यते । तथा पितृमेधसारे— यद्यद्विप्रेभ्यो दद्यात् तेनैव होमस्तेनैव गृहादाहुतान्नेन वा पिण्डं दद्यादाहोमस्तदा पिण्डदानहोमाभावे पिण्डदानाभावः आमश्राद्धे चरोरभावात् तद्धर्माणामुपस्तरणावदानादीनां तत्सम्बन्धिनां पात्राभिमर्शनादीनामित्यर्थः ।

Colophon :

इति वृद्धिश्राद्धं निरूपितम् ।

Author—Same as No. 137.

Remarks—The work deals with Śrāddhakāṇḍa alone.

॥ स्मृत्यर्थनिर्णयः ॥

No. 141. SMṚTYARTHANIRṆAYA.

C. O. L. No. 2462.

Substance—Palm leaf. Size—$6\frac{3}{8}'' \times 1\frac{1}{4}''$. Leaves—103. 7 lines per page and 26 letters per line. Script —Malayāḷam. No. of Granthas—1200. Incomplete.

Owner—Valia Rāja of Edappaḷḷi.

Subject—The determination of the topics dealt with in *smṛti.*

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

कालदोषान्मनुष्याणां विवादे लुप्तधर्मके ।
निर्णयः क्रियतेऽस्माभिर्युक्तिस्मृत्यनुरोधतः ॥
सकलविवादनिर्णयार्थं स्मृत्यर्थनिर्णयः क्रियते

अत्र नारदः—

मनुः प्रजापतिर्यस्मिन् काले राज्यमबूभुजत् ।
धर्मैकतानाः पुरुषास्तदासन् सत्यवादिनः ॥
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः ।
नष्टे धर्मे मनुष्येषु व्यवहारः प्रवर्तितः ॥
द्रष्टा च तस्य न्यायस्य राजा धारयिता कृतः ।

धर्मैकताना धर्मविस्तरास्तदानीं सर्वेषां धर्मप्राधान्याद्व्यवहारहेतुभूतद्वेषमत्सरबीजाधर्माभावान्नास्ति व्यवहारः । कलियुगे

कालदोषान्मनुष्याणामधर्मप्राधान्यात् तन्निबन्धनान्य।यनिवृत्त्यर्थं मन्वादिभिः शिष्टैर्व्यवहाराख्यो न्यायः प्रवर्तितः ।

End:

" हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत् " ।

धनरहितं ब्राह्मणं यथासम्भवं दाप्यम् । अत्र हीनग्रहो-त्कर्षाभावप्रतिपादनद्वारेण समस्याप्युपलक्षणार्थम् । ब्राह्मणग्रहणं श्रेयोमात्रोपलक्षणाद् इति विप्रवरणोक्तम् । यथाह मनुः—

Colophon:

... ...

श्रीमद्वरदराजीये व्यवहारनिर्णये व्यवहारपरिकरकाण्डः समाप्तः ।

Author—Śrīmad Varada Rāja.

Remarks—The Ms. is legibly written. This is a concise treatise on Vyavahāra based on the works of Smṛtikāras like Manu etc. describing briefly, Śubhalakṣaṇa, Vādilakṣaṇa, Prativādilakṣana, Sākṣilakṣaṇa, Nyāyavidhi etc. After the words " यथाह मनुः " occur the following sentences:

ആയിരത്തിഇരുപത്തിരണ്ടാമത്തു വൃശ്ചികമാസം പതിനെട്ടാം തീയതി എഴുതിത്തീൎന്നു. ശുഭം ഭവതു.

॥ हेमाद्रिप्रायश्चित्तकाण्डः ॥

No. 142. HEMĀDRIPRĀYAŚCITTAKĀṆḌA.

C. O. L. No. 635.

Substance—Paper. Size—11″ × 8¾″. Pages—351,

About 18 lines per page and 16—22 letters per line. Script--Devanāgarī. No. of Granthas —6750. Incomplete.

Owner—C. O.

Subject—Discussion on the different legal penances

Beginning :

वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥
कमला.........कृष्णं कमलासनवन्दितम् ।
कमलाक्षमहं वन्दे कमला.......शायिनम् ॥

अथेदानीं हेमाद्रिकारिणा लोकोपकारार्थं सर्वपुराणस्मृतिसंहितावेदज्योतिषवैद्यागमश्रौतस्मार्तसूत्रश्रेष्ठग्रन्थानालोक्य ब्रह्मक्षत्रियविशां शूद्रादीनां ब्रह्महत्या.........पापानि वाङ्मनःकायसंभवानि संभवन्ति तेषां पापानाम् अपनोदनं प्रायश्चित्ताध्यायो लिख्यते ।

End :

Colophon :

Author—Hemādri.

Remarks—The author enumerates the expiatory rites mentioned in other eminent works such as Itihāsa, Smṛti etc. The work extends up-to the end of *mānasa snāna*.

॥ पुराणम् ॥

॥ आर्यारामायणम् ॥

No. 143. ĀRYĀRĀMĀYAṆAM.

C. O. L. No. 354.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{4}''$. Pages—133. About 20 lines per page and 10 letters per line. Script—Devanāgarī. No. of Granthas—1500. Incomplete.

Owner—C. O.

Subject—Story of Śrī Rāma.

Beginning :

हरिः । श्रीगणपतये नमः ।

यत्सेवानिरतानामीप्सितलाभः पदे पदे सिद्धः ।
तं प्रणमामि गणेशं नन्दनमनुकूलमादिदम्पत्योः ॥
प्रणमामि तामपि गिरं यस्यां भक्तिं निरन्तरं कुर्वन् ।
मूकोऽपि वाक्पटुत्वं सम्प्राप्य सभासु रञ्जयेत् प्राज्ञान् ॥
प्रणमन् प्रथमकवीन्द्रं कृष्णेन्द्रसरस्वतीमुनीन्द्रं च ।
कथितेऽपि रामचरिते कविभिर्वाल्मीकिकालिदासाद्यैः ॥
अनुयामि तत्पथमहं गरुडगतं वर्त्म किं त्यजन्ति खगाः ॥
स्खलितानि सन्ति यद्यपि तानि सहध्वं बुधाः प्रबन्धेऽस्मिन् ।
पदविक्षेपदशायां स्खलितानि शिशोर्हि सम्मतायैव ॥
अस्ति जगति प्रसिद्धा विस्तारितसकलवस्तुसद्भावा ।
पुण्या पुरीषु पूज्या परैरयोध्येति सिद्धशब्दार्था ॥

यत्र महीरुहसन्ततरचिताध्वरजातधूमसन्दोहैः ।
पूरितनयनसरोजा देवा निन्दन्ति नूनमनिमिषिकाम् ॥

End:

अथ राघवो मरुत्सुतसुग्रीवविभीषणाङ्गदप्रमुखैः ।
सौमित्रिणा च साकं विलोकयामास विस्मितो लङ्काम् ॥
मणिमयगोपुरमहसा महता शोणायमानसकलाशाम् ।
परिवीतामिव परितो मारुतिनिहिताश्रयाशकीलाभिः ॥
रावणरावणमृगयां नरसिंहमयात्मने प्रदर्शयितुम् ।
आन्तकमृगयुनिबद्धैरङ्घ्रिपवप्रैरिवान्वितं सालैः ॥

Colophon:

इत्यार्यारामायणे चतुर्दशः सर्गः ।

Author:

Remarks—The story of Rāmāyaṇa is described herein *Āryā* metre. This work closes with the arrival of Śrī Rāma at Laṅka with a large army. The author refers to Kṛṣṇendra Sarasvati in the beginning. Though included in the Purāṇic category the work has the traits of a *Kāvya*.

॥ इतिहासपुराणसारसंग्रहः ॥

No. 144. ITIHĀSAPURĀṆASĀRASAṄGṚAHA.

C. O. L. No. 823.

Substance—Palm leaf. Size—17½″ × 2″. Leaves—70. About 12 lines per page and 100 letters

per line. Script—Telugu. No. of Granthas—4375. Complete.

Owner—Raṅga Vādhyār, Kallaḍakkurucci.

Subject—The essence of Purāṇa and Itihāsa.

Beginning:

त्रिषये सज्ज्ञानां.... ....वगमनं.... ....व्याप्ति.... ....
....उक्त्वा.... ....
इदानीं... ... .इति वा

End:

प्रकाशयति यो विश्वम्.... ....
प्रकाशे साम्प्रतं.... ....अंशवान्....
... .

Colophon:

इति श्रीदक्षिणामूर्ति.... ....
र्थप्रतिपादने प्रथम.... ....

Author:

Remarks—The Ms. is much decayed. It is written in neat legible hand.

॥ कन्याकुमारीक्षेत्रमाहात्म्यम् ॥

No. 145. KANYĀKUMĀRĪKṢETRAMĀHĀTMYAM.

C. O. L. No. 2176.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—

82. 6 lines per page and 52 letters per line. Script—Tamil Grantha. No. of Granthas—1510. Complete.

Owner—Kāśi Vādhyār, Mahādānapuram, Travancore.

Subject—The glory of the Kumārī temple at Cape Comorin.

Beginning

शुक्लाम्बरधरं * * *

तदा तु नैमिशारण्ये शौनकाद्यास्तपस्विनः ।

दीर्घसत्रं समास्थाय तस्थुरेकान्तमानसाः ॥

End :

सूतोऽपि तद्दत्तवस्तु गृहीत्वा परमेश्वरीम् ।

कन्याकुमारीं मनसा ध्यायन्नानन्दसंयुतः ॥

उवास नैमिशक्षेत्रे मुनीनां सन्निधौ मुदा ।

Colophon :

इति श्रीस्कान्दे पुराणे स्थानवैभवखण्ड उपरिभागे कन्यक्षेत्रे-माहात्म्ये द्वाविंशोऽध्यायः ॥

Author :

Remarks—A few verses are devoted to the praise of the Goddess at Kanyākumārī. The last four leaves contain eulogistic verses on the holy waters.

॥ कन्याकुमारीक्षेत्रमाहात्म्यम् ॥

No. 146. KANYĀKUMĀRĪKṢETRAMĀHĀTMYAM.

C. O. L. No. 2266.

Substance—Palm leaf. Size—$16\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—81. 8 lines per page and 48 letters per line. Script—Tamil. No. of Granthas—1450. Incomplete.

Owner—Sūryanārāyaṇa Vādhyār Rāma Subrahmaṇya Iyer, Śucīndram.

Subject—Beginning—Same as No. 145.

End:

इत्युक्त्वान्तरधाद्देवी स्वधाम्नि मुनिसेविते ।
सोऽपि तत्रैव वसति ध्यायमानः परात् पराम् ॥
एतत् क्षेत्र(स्य) माहात्म्यं मनोवाचामगोचरम् ।
इयत्तया वंर्णयितुं शक्तः कः सनकादयः ॥

Colophon:

इति श्रीस्कान्दे महापुराणे स्थानवैभवखण्डे उपरिभागे कन्याकुमारिक्षेत्रमाहात्म्ये एकविंशोऽध्यायः ॥

Author:

Remarks—This Ms. contains only 21 chapters and a portion of the 22nd.

॥ कावेरीमाहात्म्यम् ॥

No. 147. KĀVERĪMĀHĀTMYAM.

Substance—Paper. Size—11″ × 8¾″. Pages—211.
About 20 lines per page and 16 letters per line.
Script—Malayāḷam. No. of Granthas—2110.
Incomplete.

Owner—C. O.

Subject—The greatness of the river Kāverī and the effects of ablutions therein.

Beginning—Same as No. 157, D C S M, M P L, Vol. I.

End:

ब्राह्मे मुहूर्त उत्थाय स्नात्वा सूर्योदयात् पुरा ।
पूजयित्वा हरिं सम्यक् सन्ध्यावन्दनमाचरेत् ॥

चातुर्मास्यद्वादशीषु पायसं विष्णवेऽर्पयेत् ।
सहस्रवार्षिकी पूजा दिनेनैकेन लभ्यते ।
चातुर्मास्यद्वादशीषु शाकाहारं प्रकुर्वतः ।
निन्दकस्य गुरुं विप्रं निष्कृतिर्नैव विद्यते ॥

मदुत्थाने मच्छयने मदङ्गपरिवर्तने ।
शाकाहारं प्रकुर्वाणो हृदि शल्यं ममार्पयेत् ।
इति लोकान् पुरा विष्णुः शशास तदनुग्रहात्
तस्मादाचार्य सेन्द्रोऽपि शाकादी च पतेदधः ॥

एतद्द्वयं पुरा कृत्वा काश्चिद्विप्रः स नारकी ।
कोमलैस्तुलसीपत्रैरभ्यर्च्य हरिमाप्तवान् ॥

Colophon :

इति कावेरीमाहात्म्ये षड्विंशोऽध्यायः ।

Author :

Remarks—The date of this treatise may be ascertained if the identity of Dharmavarma, the king of Niculapuri, is established.

॥ काशिखण्डम् ॥

No. 148. KAŚĪKHAṆḌAM.

C. O. L. No. 135.

Substance—Paper. Size—$11\frac{1}{4}'' \times 8\frac{3}{4}''$. Pages—434. About 20 lines per page and 19 letters per line. Script—Malayāḷam. No. of Granthas—5000.

Owner—C. O.

Subject—The greatness of Benares.

Beginning :

अथवा स कथं मेरुस्तथोच्चैः स्पर्धते मया ।
नूनं.........प्रायो भवति भ्रान्त्यभूमयः ॥
अलीकवाक्यमथवा सम्भाव्यं नारदे कथम् ।
ब्रह्मचारिणि वेदज्ञे सत्यलोकनिवासिनि ॥
अनाथनाथः सर्वेषां विश्वनाथो हि गीयते ।

End :

आपोहिष्ठेति तिसृभिर्मार्जनं तु ततश्चरेत् ।

भूमौ शिरसि चाकाश आकाशे भुवि मस्तके ॥
मस्तके च तदाकाशे भूमौ च नवधा क्षिपेत् ।

Colophon :

इति काशीखण्डे पञ्चत्रिंशोऽध्यायः ।

Author :

Remarks—This work is an extract from Skānda-purāṇa and consists of 35 chapters and a portion of the 36th.

॥ काशीखण्डः ॥

No. 149. KĀŚĪKHAṆḌA.

C. O. L. No. 489.

Substance—Palm leaf. Size—16″ × 2¼″. Leaves—28. 11—13 lines per page and 58 letters per line. Script—Grantha. No. of Granthas—1200.

Owner—Keśava Śāstrial, Karamana, Trivandrum.

Subject etc.—Same as No. 148.

Colophon :

इति स्कान्दे काशीखण्डे सदाचारो नाम पञ्चत्रिंशोऽध्यायः ।

Author :

Remarks—The following subjects occurring at the close of the 35th chapter are dealt with herein:

सदाचारः । ब्रह्मचारिसमाचारः । स्त्रीलक्षणम् । सदाचारवर्णनम् । अविमुक्तेशाविर्भावः । गृहस्थाश्रमवर्णनम् । योगाख्यानम् । कालज्ञानपञ्चकोपायः । दिवोदासप्रतापः । योगिनिर्गमप्रस्थानम् ॥

This work has been printed in Bombay.

॥ कृष्णगीता ॥

No. 150. KṚṢṆAGĪTĀ.

C. O. L. No. 560.

Substance—Paper. Size—11″ × 8½″. Pages—115. About 20 lines per page and 25 letters per line. Script—Devanāgarī. No. of Granthas—1840. Complete.

Owner—C. O.

Subject—Exposition of the Mahābhārata.

Beginning :

कृष्णगीतां नाम पौलोमव्याख्यां संप्रदायक्रमेणार्थप्रदर्शनाय कर्तुमारभते । पूर्वमवान्तरतमा नाम विष्णुमूर्तिः हिमवद्गिरिगुहायां स्वस्मिन्नाश्रमे तपस्तप्त्वा... ... ...द्वापरावसाने भविष्यद्वृत्तान्तवेत्ता भूत्वा कृष्णद्वैपायननामा भगवान् पराशराद्यमुनाद्वीपे सत्यवत्यामवान्तरतमस्यावतारोऽपि लोकानुग्रहणार्थाय तथा खलु भगवतः प्रवृत्तिः । सत्त्व.........भिमानी ब्रह्मरूपेण सृजते तमोभिमानी भूत्वा रुद्ररूपी संहरते विष्णुरूपेण स्थितपरिपालनं च करोति । नारायणस्य प्रवृत्तिरेवं त्रिधा....

End:

सर्पाणां वधमधिकृत्य विहितमुपायं विवृणोति जनमेजयस्येत्यादिना । सर्पाणां हिंसने जनमेजयस्य कर्म विहितम् । तस्मात् त्वया न कर्तव्यमित्यर्थः । तर्हि सर्वेषां सर्पाणां विनाशः स्यादिति चेत् । किन्तु सर्पसत्रे दुष्टानां सर्पाणां विनाशो भविता, अन्येषां रक्षा विहितेत्याह—परित्राणमित्यादिना । भीरूणां सर्पाणां ब्राह्मणात् परित्राणं विहितं चेत्यन्वयः । विहितः कथितः अतः कारणादिदं कर्म मा कृथाः ।

Colophon:

इति पौलोमव्याख्यायाम् अष्टमोऽध्यायः । पौलोमव्याख्या समाप्ता ।

Author:

Remarks—The author attempts to relate the story of the Mahābhārata succinctly. This commentary on Aśvistotra is more lucid than that of Nīlakaṇṭha. Different readings in the text are made note of.

॥ केरलमाहात्म्यम् ॥

No. 151. KERAḶAMĀHĀTMYAM.

C. O. L. No. 1206.

Substance—Palm leaf. Size—9″ × 2″. Leaves—84. 12 lines per page and 37 letters per line.

Script—Malayāḷam. No. of Granthas—2520. Complete.

Owner—P. Velukurup, Pallippuram Pravṛtti, Çerttala.

Subject—Purāṇic importance of Keraḷa.

Beginning :

कृतादौ सोमवंशे हि जातः कश्चिन्महीपतिः ।
नर्मदायास्तटे सोऽपि कृतवीर्याभिधः पुरा ॥

End—Same as No. 130. D C S M, M P L, Vol. I.

Colophon :

इत्यार्षे श्रीमत्परशुरामायणे अगस्त्यसंहितायां केरलमाहात्म्ये त्रिशत्तमोऽध्यायः ।

श्रीकृष्णाय परब्रह्मणे नमः । श्रीगुरुभ्यो नमः ।

൧൦൮൨- മേടം ൧൭-൧൦ന്ന- എഴുതിത്തീൎന്നു.

Author :

Remarks—This work was printed in 1912 by Śeṣu Śāstrial. The introductory and closing portions of that work are different. Whereas the former work comprises 100 chapters, the latter consists of 103. Differences of this kind are to be seen in the respective colophons also.

॥ कोलनृपोत्पत्तिः ॥

No. 152. KOLANṚPOTPATTI.

C. O. L. No. 362.

Substance—Paper. Size—13″ × 8½″. Pages—3.
About 14 lines per page and 16 letters per line.
Script—Devanāgarī. No. of Granthas—21.

Owner—C. O.

Subject—The origin and growth of the dynasty of Kolattiri Kings.

Beginning :

घटजस्य प्रसादेन चन्द्रवंशांशसंभवः ।
युयुत्सुवंशे देवेशि सुकुमारक्रमाह्वयः ॥
संभविष्यति मद्भक्तः सर्वशास्त्रविशारदः ।

End :

कल्यन्ते च महादेवि विष्णुना च त्वया सह ।
चिदंबरे कालहस्त्यां काश्यां मध्यार्जुनेऽम्बिके ॥
हालास्ये चैव कुद्दाले सेतौ चैव शुचीन्द्रके ।
कन्याकुब्जे पद्मनाभे तोताद्रौ च महेन्द्रके ॥
कण्वारण्ये च जायेते श्रीवाञ्छे निवसाम्यहम्? ।

Colophon :

इति भविष्यत्पुराणे उमामहेश्वरसंवादे एकादशोऽध्यायः ।

Author :

Remarks—This work is of historical importance. The published edition of Bhaviṣyatpurāṇa does not contain this portion.

॥ जैमिनीयसंहिता ॥

No. 153. JAIMINĪYASAMHITĀ.

C. O. L. No. 904.

Substance—Paper. Size—$11\frac{1}{2}'' \times 9''$. Pages—711. 20—22 lines per page and 11—19 letters per line. Script—Devanāgarī. No. of Granthas—700.

Owner—C. O.

Subject—The creation of the Universe.

Beginning—End etc. Same as No. 134, D C S M, M P L, Vol. I.

॥ ताम्रपर्णीमाहात्म्यम् ॥

No. 154. TĀMRAPARṆĪMĀHĀTMYAM.

C. O. L. No. 525.

Substance—Paper. Size—$14'' \times 8\frac{3}{4}''$. Pages—583. About 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—5830.

Owner—C. O.

Subject—The merits of the river Tāmraparṇi in Tinnevelly district.

Beginning—Same as No. 151, D C S M, M P L, Vol, I,

End:

तस्मात् सर्वगुरोरस्य प्रसादाय दिने दिने ।
श्रोतव्यं पठितव्यं हि ब्राह्मणेन विजानता ॥
यस्त्वेतद् भगवत ईश्वरस्य विष्णो-
वीर्याढ्यं वृजिनहरं सुमङ्गलं च ॥
आख्यानं पठति शृणोत्यनुस्मरेद्वा
दुष्कीर्तिं दुरितमपोह्य याति शान्तिम् ॥

Colophon:

इति श्रीमच्छैत्रे पुराणे उपरिभागे तीर्थक्षेत्रवैभवखण्डे श्रीमत्ताम्रपर्णीमाहात्म्ये श्रीताम्रासागरसङ्गमुखमाहात्म्यवर्णनं नाम चतुःषष्टितमोऽध्यायः ।

Author:

Remarks—64 chapters are embodied in this work against 37 chapters in No. 151 noted above.

॥ तुलसीमाहात्म्यादि ॥

No. 155 A. TULASĪMĀHĀTMYĀDI.

C. O. L. No. 1958 A.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—13. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—200.

Owner—Śūran Kaṇḍan Nampūri, Udayamperūr.

Subject—The merits of Tulasi plant.

Beginning—End—Colophon—Same as No. 154. D C S M, M P L, Vol. I.

Author :

Remarks—A portion of Bhāratacampu of Anandabhaṭṭa, some verses from Yudhiṣṭhiravijaya and a part of Viṣavaidya (in Malayāḷam) are also attached to the work of which the last is noticed as 155 B.

॥ विषवैद्यचिकित्सा ॥

No. 155 B. VIṢAVAIDYACIKITSĀ.

C. O. L. No. 1958 B.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—14. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—216.

Owner—Same as No. 155 A.

Subject—Prescription of antidotes for snake-bites.

Beginning :

അമ്പിളിത്തെല്ലു ചൂടുന്ന തമ്പുരാനെ വണങ്ങി ഞാൻ
അമ്പിനോടിത ചൊല്ലുന്നേൻ വമ്പേറും വിഷമോചനം.
നാരായണീയമൊഡ്ഡീശം ഉൽപലം ഹരമേഖലാം
ലക്ഷണാമൃതമഷ്ടാംഗഹൃദയം കാലവഞ്ചനം
വിഷസംഹരണത്തിന്നു വിശേഷിച്ചിവ ഏഴിലും
ഉപായമുണ്ടു ചൊല്ലുന്നേൻ വിസ്തരേണ വിപഞ്ചിതം
എല്ലാം കണ്ടു വിചാരിച്ചു ഗുരുക്തേനൈകവർത്മനാ
എളുതായല്പബുദ്ധീനാം ഹിതായ കഥയാമ്യഹം
കത്തിക്കാളുംവിഷജ്വാലാലേലിഹാനസ്യ ദേഹിനഃ
രക്ഷണായ പ്രവൃത്താ മേ പ്രസന്നാസ്തു സരസ്വതീ.

End:

കാഞ്ഞിരമൂട്ടിൽ മുളച്ച്വ തമ്മേൽ ചുററിക്കരേറും കറളേകമൂലം
അരച്ച്വ തേച്ച്വോരു കാരണം സർപ്പം പിടിച്ച്വകൊള്ളാം കടി
യാ തദാനീം.

ശ്രീ ഗരുഡായ നമഃ.

Colophon:

Author:

Remarks—A concise description is herein found of the treatment for poison caused by snake-bites and of the methods of determining the possibility of cure or otherwise from Dūtalakṣaṇa, day of the week, the moment of intimation etc.

॥ देवीचारितगूढार्थदीपिका ॥

No. 156. DEVĪCARITAGŪḌHĀRTHADĪPIKĀ.

C. O. L. No. 992.

Substance—Palm leaf. Size—15″ × 2″. Leaves—39. About 11 lines per page and 47 letters per line. Script—Grantha. No. of Granthas—1260. Complete.

Owner—Tuppan Tuppan Nampūri, Punnorkkoṭṭu Mana, Kunnattunād.

Subject—Exposition of Devīmāhātmya known as Saptaśatī.

Beginning :

संविद्रूपा पराशक्तिस्त्रिगुणानन्तरूपिणी ।
जगज्जन्मस्थितिध्वंससाक्षिण्यस्तु शिवाय नः ॥
आत्मानन्दसुधाधाम्नो गुरुदुग्धाम्बुधेर्मम ।
कटाक्ष ... ... कल्लोलाः क्षालयन्तु मनोमलम् ॥
श्रीमद्गुरुपदाम्भोजभावनावासनामयी ।
देवीचरितगूढार्थदीपिका प्रोच्यते मया ॥

इह खलु पुरा शशिमौलेरन्तेवासी समस्तविद्याविशारदः श्रीमार्कण्डेयः परमेश्वरप्रसादलब्धाष्टादशविद्यः क्रोष्टुकिनाम्ने स्वशिष्याय ताः समुपदिदेश । प्रसिद्धाश्च ता अष्टादशविद्याः । तथा च श्रूयते—

End :

सावर्णिः सूर्यतनय इति हि पुरस्तादुपक्रान्तम् । अत्रापि सावर्णिर्मनुर्भविता इत्युपसंहारः कृतः । तेन चात्र सवर्णशब्दस्य अजामेकां लोहितशुक्लकृष्णामिति श्रुतेः गुणसामान्यरूपिण्याः प्रकृतेर्वाचकत्वात् उपक्रमोपसंहारैकरूप्यादिषड्विधतात्पर्यलिङ्गपर्यालोचनया पराशक्त्येकरूपत्वमवधार्येते । सुरथवैश्यौ च तत्सेवया भुक्तिमुक्तिफलसाधनत्वख्यापनाय उदाहियेते इति ।

Colophon :

इति श्रीदेवीचारितगूढार्थदीपिकायां त्रयोदशोऽध्यायः । श्रीदेव्यै नमः ।

या चक्रे मधुकैटभासुरवधं संभूय देहाद्धरे-
र्या चक्रे महिषं च देवमहसा संभूतदिव्याकृतिः ।
भूत्वा चन्द्रशिखामणेः प्रियतमा देहाच्च या सानुगान्
सुम्भादीन् निजघान सास्तु सततं भक्त्यै च मुक्त्यै च नः ॥

श्रीमद्गुरुपदाम्भोजभावनावासनामयीम् ।
सन्तो विमत्सराः सन्तः शोधयन्तु गिरं मम ॥
श्रीदेव्यै नमः । इति श्रीदेवीचरितगूढार्थदीपिका समाप्ता ।

Author :

Remarks—This is a commentary on Devīmāhātmya covering 13 chapters.

॥ देवीमाहात्म्यदीपिका ॥

No. 157. DEVĪMĀHĀTMYADĪPIKĀ.

C. O. L. No. 2202.

Substance—Palm leaf. Size—12″ × 1¼″. Leaves—96. About 6 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Owner—Kuñjan Nampūrippād, Chittūr Manakkal Cerpu.

Subject—A lucid and sublime description of Devīmāhātmya.

Beginning:

गुणैरुपात्तदेहां तां विदेहां परमेश्वरीम् ।
नमामि परया भक्त्या दैत्यदानवमर्दिनीम् ॥
रदेन दारिता येन भजतां विघ्नभित्तयः ।
भवतां तमहं वन्द ईशानं जगतां ... ... ॥
अनुगृह्णातु वाग्देवी देवीमाहात्म्यवेदने ।
तस्या अनुग्रहो नाम कस्मिन् कुर्यात् ... ... ॥

व्यासाचार्यं महीयांसं परं गुरुमुपास्महे ।
वेदाब्जभास्करं यं वै प्र ... ... दो जनाः ॥
श्रीमाधवपुरीसंज्ञं श्रीमाधवपरायणम् ।
गुरुं तं परया भक्त्या नमस्कुरुत नित्यशः ॥
... ... देवीमाहात्म्यदीपिकाम् ।
गुरवस्तत्प्रसादाय भूयासुः परया मुदा ॥
दृष्टं हि विदुषां ... . सव्यासधारणम् ॥

इति न्यायमाश्रित्य सूर्यतनयस्य महाभागस्य सावर्णेर्मनोस्सं.. .... पत उत्पत्तिः कथिता । इदानीं तस्यैव प्राक्तनजन्मारभ्योत्पत्तिं विस्तरेण शुश्रूष .... शुकिमुन .... तां कथां तस्य वक्ष्यमाणार्थैर्मनस्समाधानं नियुञ्जान(ः) श्रीमार्कण्डे... .... रतस्तत्कथनं प्रतिजानीते सावर्णिः सूर्यतनय इति ॥

End—Colophon—Author—Same as No. 175, D C S M, M P L, Vol. I.

Remarks—Half of the Ms. is worn out, but the work is complete. Some ślokas from the Candrotsava Kāvẏa and a prose portion of the Rāmāyaṇa Campu in Malayāḷam are inserted herein.

॥ देवीमाहात्म्यदीपिका ॥

No. 158. DEVĪMĀHĀTMYADĪPIKĀ.

C. O. L. No. 2298.

Substance—Palm leaf. Size—$12\frac{3}{4}'' \times 1\frac{1}{2}''$. Leaves—59. About 7—9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—944. Incomplete.

Owner—Bhāskaran Jayantan Mūttatu, Vaṭṭappaḷḷi Illam, Kumāranallūr.

Subject etc.—Same as No. 157.

Colophon :

ശ്രീകുമാരനല്ലൂർ ഭഗവതി ശരണം. ഇത വട്ടപ്പള്ളിഗ്രന്ഥം.

൲൦൨൰ാമാണ്ട കന്നിമാസം ൨൰ ൬-എഴുതിതീർന്ന ഗ്രന്ഥം.

അന്ന തിങ്കളാഴ്ചയും നവമിയും പുണർതവും കൂടെ.

Remarks—The Ms. commences only from verse 72, chapter I. The first 25 leaves are missing.

॥ देवीमाहात्म्यम् (भाषाव्याख्योपेतम्) ॥

No. 159. DEVĪMĀHĀTMYAM with Malayāḷam commentary.

C. O. L. No. 170.

Substance—Palm leaf. Size—$13\frac{3}{4}'' \times 2''$. Leaves—116. About 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3480.

Owner—Kurūr Nārāyaṇan Nārāyaṇan Bhaṭṭatiri; Edappaḷḷy.

Subject—Same as No. 157.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद् वदतो मम ॥

ശ്രീമാൎക്കണ്ഡേയൻ ക്രോഷ്ടുകിക്കു് വിദ്യകളെ ഉപദേശിക്കുന്നു. അവിടെ പതിനെട്ടല്ലൊ വിദ്യകൾ. വേദങ്ങൾ നാലു്. വേദാംഗങ്ങൾ ആറു്. മീമാംസ, ന്യായശാസ്ത്രം, പുരാണം, ധൎമ്മശാസ്ത്രം, ആയുർവേദം, ധനുർവേദം, ഗാന്ധർവം, വേദം, അൎത്ഥശാസ്ത്രം, എന്നിങ്ങനെ. അതിനു തക്കവാറു് വചനമുണ്ടു്.

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥

ഇങ്ങനെ പതിനാലു്.

आयुर्वेदो धनुर्वेदो गान्धर्वो वेद एव च ।
अर्थवेदश्चतुर्थश्च विद्या ह्यष्टादश स्मृताः ॥

ഇങ്ങനെ പതിനെട്ടു വിദ്യകൾ; അവററിൽ വച്ചു് വേദങ്ങൾ നാലിനേയുമുപദേശിച്ചു നടേ. വിദ്യകളിൽ വച്ചു് വേദങ്ങൾക്കെല്ലാം വൈശിഷ്ട്യം. വേദങ്ങൾക്കു് ശേഷമായി മററുള്ള വിദ്യകൾ. അവിടെ ശിക്ഷാദികളോ വേദാംഗങ്ങളായി പ്രസിദ്ധങ്ങളല്ലോ.

End:

इत्थं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णो भविता मनुः ॥

ഇങ്ങനെ എഴുവർ മനുക്കളുടെ ഉത്പത്തിചരിതങ്ങളെ ചൊല്ലി ഉപസംഹരിച്ചു് എട്ടാം മനു സാവർണ്ണകൻെറ ഉത്പത്തി

ചരിതങ്ങളേയും ചൊല്ലി ഉപസംഹരിച്ചു. ശ്രീമാൎക്കണ്ഡേയൻ ക്രോഷ്ടുകിക്കു്,

इत्थं देव्या वरं लब्ध्वा ....

....मनुः

Colophon :

